Gopīnātha has not written a regular commentary on chapter 5 of the *HS*, but he has composed a *Prayoga* of the Cāturmāsya sacrifices which is called *Cāturmāsyaprayogendu*. In this *Prayoga* Gopīnātha has referred to many *sūtras* from chapter 5 and has commented upon them. For all practical purposes, therefore, that work may as well be regarded as a commentary. While explaining certain *sūtras*, Gopīnātha has cited various authorities, but this he has done in a random manner[47]. Indeed in some contexts he has quoted so many authorities that he seems to have become particularly conscious of that. He cleverly remarks: *sūtrapradarśaṁ tu kautukavaicitryādyarthaṁ* (The citations from the different *Sūtra*-texts are intended only by way of curiosity and for manifoldness). Therefore, all the citations given by Gopīnātha have not been taken into consideration here. Only such citations as are relevant to the *sūtras* from chapter 5 of the *HS* are here noted.

---

46. See, for instance, his commentary on *sūtras* 1.2; 7.2; 14.6 and 18.3.
47. See, his explanation of *sūtras* 1.1-2 18.2-4 etc.

While tracing the various citations to their original sources, it is observed that the readings adopted by the commentators are, in some cases, different from those found in the printed editions of these texts. In some other cases they are evidently defective. In all such cases, the readings found in the printed editions have been given in the foot-notes. The figures preceding the citations denote the Khaṇḍa and the *sūtra* from chapter 5 of the *HS*, commenting on which the particular citations have occurred. As for the text from which the citation is made, the number of its chapter is given first. This is followed by the number of the Khaṇḍa or Khaṇḍikā and the particular *sūtra*. The citation, which cannot be traced to the printed texts, is shown as *nopalabhyate* (untraced). Sometimes the commentators have not reproduced the actual citations, but have only referred to the names of authors. Even in such cases, the exact *sūtras* have been indicated. These citations are given at the end of this chapter in the appendix.

॥ श्री : ॥

अथ हिरण्यकेशिसूत्रे पञ्चमः प्रश्नः

अक्षय्यँ ह वै सुकृतं चातुर्मास्ययाजिनः ॥१॥ तान्यालभमानः[१] फाल्गुन्यां पौणमास्यां चैत्र्यां[२] वा पूर्वस्य पर्वण औपवसथ्येऽहनि पञ्चहोतारं मनसानुद्रुत्य सग्रहँ हुत्वान्वारम्भणीयामिष्टिं निर्वपति वैश्वानरं द्वादशकपालं पार्जन्यं चरुम् ॥२॥ प्राचीनप्रवणे वैश्वदेवेन यजते[३] ॥३॥ उदवसायानुदवसाय[४] वा ॥४॥ अग्नेरावृताग्निं प्रणीय ॥५॥ अग्न्यायतन ऊर्णास्तुकां निधायाग्निं प्रतिष्ठाप्य ॥६॥ अग्नीनन्वाधायामिक्षायै वैश्वदेव्यै सायंदोहाय वत्सानपाकरोति ॥७॥ सप्तदश सामिधेन्यः ॥८॥ प्रसूनं[५] बर्हिस्त्रीन् कलापान्[६] [७]सन्नह्यैकध्यं पुनः सन्नह्यति ॥९॥ एवमिध्मम्[७] ॥१०॥ पुनः सन्नहने धर्माः[८] ॥११॥ पात्रसँसादनकाले यथार्थं पात्राणि

---

१. **शब्रा** २.६.३.१ 'अक्षय्यँ ह वै सुकृतं चातुर्मास्ययाजिनो भवति'.

२. **तैसं** १.६.१०.३ 'चातुर्मास्यान्यालभमानः'; **शांब्रा** ५.१ 'फाल्गुन्यां पौर्णमास्यां वैश्वदेवेन यजते'; द्र. **मैसं** १.१०.७, **कासं** ३६.२; **तैब्रा** २.२.२ 'चातुर्मास्यान्यालभमानः पञ्चहोतारं मनसानुद्रुत्याहवनीये जुहुयात्...ग्रहो भवति'; द्र. **कासं** ९.१६. कस्मिन्नपि ब्राह्मणग्रन्थे अन्वारम्भणीया नोक्ता.

३. **मैसं** १.१०.७ 'प्रवणे यष्टव्यम्'; **कासं** ३६.२ 'प्रवणे यजेत'. **वाञ्छेश्वरः** –अष्टानामपि यागानां प्राचीनप्रवणसंबन्धोऽनेन वाक्येन नियत इत्यास्तां विस्तरः.

४. वरुणप्रघाससाकमेधब्राह्मणे (**शब्रा** २.५.२.४८, २.६.२.१९) उक्तम् –'उदवसायैव ह्येतेन यजते', अतो वैश्वदेवे विकल्प इति ब्राह्मणस्याभिप्रायः.

५. **गोब्रा** २.१.२१ 'अथ यदग्निं प्रणयन्ति'; द्र. **हिश्रौ** ४.२.

६. **तैब्रा** १.६.२ 'नोत्तरवेदिमुपवपति'.

८. **शांब्रा** ५.१, **गोब्रा** २.१.२१ 'यत् सप्तदश सामिधेन्यः'.

९. **तैब्रा** १.६.३ 'त्रेधा बर्हिः संनद्धं भवति...एकधा पुनः संनद्धं भवति...प्रसुवो भवन्ति'.

१०. **मैसं** १.१०.५, **कासं** ३६.२ 'त्रेधा संनद्ध इध्मः'.

११. **महादेवः** – मन्त्राद्या धर्मा अङ्गानि. **गोपीनाथः** – तूष्णींकृतेनैकेन शुल्बेनैकैकं भागं संनह्य मन्त्रेण मुख्यं शुल्बं कृत्वा तेनैव शुल्बेन कलापत्रयात्मकमेकैकं निधनं मन्त्रेण संभृत्य मन्त्रेण संनह्येत्यादि. **वाञ्छेश्वरः** – पुनः संनहने एकधा संनहने धर्मो मन्त्रादिः.

---

१. म१– °नाः २. म१,२– वा चैत्रीयां ३. श्रौबा२, भां१–२, गो, टि–यजेत ४. म१–°सायं, म२–°सूय ५. अ–प्रसूतं ६. भां१, डे, म२, टि–कगालान्, इ–कपालापान्, म१–कपालपाम् ७–७. म१–संनहचैत्वेवमिध्मम्; म३–संनहचैकधा पुनः ८. एवं इ; अन्येषु लिखितपुस्तकेषु, मु–धर्मः

प्रयुनक्ति ।।१२।। जुहूं द्वे चोपभृतौ पृषदाज्यधानीं [1]द्वितीयां ध्रुवां द्वे आज्यस्थाल्यौ दधिधानीं द्वितीयां पालाशं[1] वाजिनपात्रँ स्रुचं[2] चमसं वा ।।१३[3]।। निर्वपणकाल आग्नेयमष्टाकपालं [4]निर्वपति सौम्यं चरुँ सावित्रं द्वादशकपालँ सारस्वतं चरुं पौष्णं चरुमेतानि पञ्च सञ्चराणि ।।१४।। मारुतँ सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालम्[4] ।।१५।। उत्तरेषु[5] पर्वसु सावित्रमष्टाकपालमेके[6] समामनन्ति ।।१६[7]।। त्रिष्फलीकृतेषु विभागमन्त्रेण पौष्णमपच्छिद्य सह पुरोडाश्यैः पिनष्टि ।।१७।। प्रातर्दोहस्यावृता[8] प्रातर्दोहं दोहयति ।।१८।। तप्ते प्रातर्दोहे सायंदोहमानयत्यामिक्षां[9] करोति ।।१९।। सँहतामन्यस्मिन्[10] पात्र[11] उद्धृत्य वाजिनेनोपसिच्य प्रज्ञातां[12] निधायोत्करे वाजिनशेषं निदधाति ।।२०[13]।। [१]

संयुतानां पिष्टानां[14] विभागमन्त्रेण पौष्णमपच्छिद्य चरुकल्पेन श्रपयति ।।१।।

---

१४. **तैसं** १.८.२ 'आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुँ सावित्रं द्वादशकपालँ सारस्वतं चरुं पौष्णं चरुम्'; **शांब्रा** ५.३ 'पञ्च संचराणि हवींषि पौष्णान्तानि'; द्र. **गोब्रा** २.१.२१.

१५. **तैसं** १.८.२ 'मारुतँ सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालम्'.

१६. **मैसं** १.१०.१, **कासं** ९.४–५ इत्यत्र वैश्वदेव एव सावित्रो द्वादशकपाल उत्तरेषु पर्वसु सावित्रोऽष्टाकपालो विहितः; **शब्रा** २.५.१.१० इत्यत्र तु वैश्वदेव एव विकल्पः प्रदर्शितः. **गोपीनाथः** – वैश्वदेवपर्वण्येव सर्वेषां हविषां निर्वापमुक्त्वा उत्तरेषु पर्वसु सावित्रमष्टाकपालमावपत् सूत्रकरणात् । यदि प्राप्तस्थान एव सावित्रमष्टाकपालनिर्वाप इष्टो भवेत् तदा सावित्रं द्वादशकपालमित्येतत् सूत्रानन्तरमेवैतत् सूत्रं कृतं भवेत् । न हीत्थं कृतं ततो ज्ञायते स्थानोत्कर्षोऽत्र विधीयते हविषामन्त इति व्याख्यानकर्तुराशयः. **वाञ्छेश्वरः** – उत्तरेषु वरुणप्रघासादिषु सावित्रमष्टाकपालं द्वादशकपालस्थाने एके शाखिनः समामनन्ति.

१७. द्र. **हिश्रौ** ३.८ 'पौष्णमपच्छिद्य सह पुरोडाश्यैः पिनष्टि'. **वाञ्छेश्वरः**–तत्र प्रयोगक्रममाह त्रिष्फलीकृतेषु हविष्षु.

१८. द्र. **हिश्रौ** १.४.

१९. **वाञ्छेश्वरः** – आमिक्षावाजिनसंपादनक्रममाह.

२०. **तैब्रा** १.६.२ 'वैश्वदेव्यामिक्षा भवति . . . वाजिनमानयति'; **मैसं** १.१०.६ 'मिथुनं वै दधि च शृतं च अथ यत् सँसृष्टं . . . वैश्वदेव्यामिक्षा'; द्र. **कासं** ३६.१. **गोपीनाथः** – तत आमिक्षां कृत्वा तां घनीभूतां स्वच्छवस्त्रस्थितां कुंभ्यामन्तर्लम्बयित्वा सुरक्षितां निदधाति. **वाञ्छेश्वरः** – सिक्ते दध्नि संहतां कठिनामामिक्षां करोति कठिणांशमामिक्षात्वेन गृह्णातीत्यर्थः.

१. द्र. **हिश्रौ** ३.८ 'चरुकल्पान् व्याख्यास्यामः'.

१–१. म१, २–द्वितीयामपालां; म३–द्वितीयां ---- व द्वे आज्यस्थाल्यदधिस्थाली द्वितीयां पालाशं २. म१–स्रुवं च ३. मु–१२–१३ इत्यनयोरेकमेव सूत्रम् ४–४. म१–नास्ति ५. श्रौवा२–मुत्तरेषु; वैश्रौबा–मुरेत्रु ६. म१, २–सावित्रीमष्टा° ७. मु–१५–१६ इत्यनयोरेकमेव सूत्रम् ८. म१, २ नास्ति; म३–°व्रता ९. म१, २– °मानयन्त्यामिक्षां १०. इ, म१, २–सँहिताम° ११. भां१–पात्रम् १२. म१, २–प्रज्ञातं १३. मु–१८–२० इत्येषामेकमेव सूत्रम् १४. वैअ– युक्तानाम्

उत्तरं परिग्राहं परिगृह्य संप्रैषेण प्रतिपद्यते ।।२।। **आज्येन दध्ना चोदेहि** इति संप्रैषस्यान्तँ संनमति[1] ।।३[2]।। फाल्गुन्यां यथा पशावेवं पृषदाज्यं गृह्णाति ।।४।। चैत्र्यां[3] तु द्विराज्यस्योपस्तीर्य द्विर्दधि[4] गृहीत्वा सकृदाज्येनाभिघारयति ।।५।। उद्वासनप्रभृतीनि कर्माणि प्रतिपद्यते ।।६।। अन्यस्मिन् पात्र एककपालमुद्वास्य प्रभूतेन सर्पिषाभ्यानीयाविःपृष्ठं[5] करोति ।।७।। व्याहृतीभिर्हवीँष्यासादयति[6] तथा[7] संवत्सरे ।।८।। निर्मन्थ्यस्यावृता[8] निर्मन्थ्येन[9] प्रचरति[10] ।।९।। वेदं निधाय सामिधेनीभ्यः संप्रेष्यति ।।१०।। नव प्रयाजान् यजति ।।११।। चतुर्थे[11] समानीयाष्टमे[11] सर्वँ समानयते ।।१२[12]।। सर्वत्रोपाँशु सावित्रैककपालयोर्देवता[13] यजति ।।१३।। कृत्स्नमेककपालमवदायाशयमनु पर्यस्यर्जु[14] प्रतिष्ठितमपर्यावर्तयन्[15] जुहोति ।।१४।।

---

४. **तैब्रा** १.६.३ 'पृषदाज्यं गृह्णाति...पञ्चगृहीतं भवति'; द्र. **हिश्रौ** ४.२.

५. **मैसं** १.१०.७ 'यदि वसन्ता यजेत द्विरुपस्तृणीयात् सकृदभिघारयेत्', द्र. **कासं** ३६.२.

६. **गोपीनाथः** – दृँहेत्यामिक्षामुद्वास्य तामन्यस्मिन् पात्रे उद्धृत्य वाजिनं पात्रान्तरे उद्धृत्य स्वल्पेन वाजिनेनामिक्षामुपसिच्य.

७. **तैब्रा** १.६.३ 'यदेककपाल आज्यमानयति ... बह्वानीयाविःपृष्ठं कुर्यात्'.

८. **तैसं** १.६.१०.३ 'चातुर्मास्यान्यालभमान एताभिर्व्याहृतीभिर्हवीँष्यासादयेत् ... संवत्सरे पर्यागत एताभिरेवासादयेत्'. **गोपीनाथः** – प्रथमप्रयोगे वैश्वदेवपर्वणि व्याहृतिभिर्हवीँष्यासादयति। एवं शुनासीरीये च। तथा संवत्सर इति सूत्रात्। इदं सांवत्सरिकयथाप्रयोगादिषु सर्वेषु समानम्। द्वितीयादिप्रयोगेषु तु प्रियेणेत्येवम्.

९. **तैब्रा** १.६.३ 'अग्निं मन्थन्ति'; द्र. **हिश्रौ** ४.३.

११. **तैब्रा** १.६.३ 'नव प्रयाजा इज्यन्ते'.

१२. **शब्रा** ३.८.१.४ 'चतुर्थे चतुर्थे प्रयाजे समानयमानो दशभिः प्रयाजैश्चरति'; द्र. **शब्रा** १.५.३.१६.

१३. **मैसं** १.१०.५ 'सविता प्रासुवत्...उपाँशु यजति', द्र. **कासं** ३५.२०. **वाञ्छेश्वरः**– उपांशु यजतीत्येव सिद्धे सर्वत्रेति वचनमुक्तरीत्या सर्वप्रयोगेषूपांशुत्वप्राप्त्यर्थम्.

१४. **तैब्रा**. १.६.३ 'सकृदेव होतव्यः ... प्रतिष्ठितो होतव्यः'; **कासं** ३६.१ 'ऋजुः प्रतिष्ठितो होतव्यः', द्र. **मैसं** १.१०.७. वैजयन्तीमतं विविच्य सूत्रस्यास्यार्थं भेदेन करोति

---

१. म३–नमति २. मु– २–३ इत्यनयोरेकमेव सूत्रम् ३. म१, २–चैत्र्यायां ४. म१–द्विर्दघाति ५. एवं केषुचिल्लिखितपुस्तकेषु; भां२–°विःपृष्टं, म१, २–°पाहृचानीया°; म३–°पानीया°; मु–°विष्पृष्ठं ६. एवं केषुचन लिखितपुस्तकेषु, टि; वैश्रौवा, भां१, वैअ, गो, मु–व्याहृतिभि° ७. भां१–यथा ८. म१–निर्मथ्यस्या° ९. म१–निर्मथ्येन १०. गो–चरति ११. म१–स चतुर्थं मानीया°; म२–स चतुर्थं समानीया° १२. मु– ११–१२ इत्यनयोरेकमेव सूत्रम् १३. म२– सावित्र्यैककपालयोर्देवतां; म१, ३–°देवतां १४. म१–पश्यस्य जुहूं; म२–र्प्यस्य जुहूं; म३–पर्यस्यजं १५. एवं आ२, अ, डे, वैश्रौवा, वैआ१, वैअ; श्रौबा१ – °मपर्यावर्तपयन्; श्रौबा२, इ, बा, वैआ२ – °पर्यावर्तयं; म१– °पर्यावर्तय; म२– °मुपपर्यावर्तय; मु –°पर्यावर्तयन्

यदि[1] हुतः[2] पर्यावर्तेत वरे दत्ते स्रुचोऽग्रेण कल्पयेत् ॥१५॥ प्रत्यादाय वा पुनर्जुहुयान्न पाणिनेत्येकेषाम् ॥१६[3]॥ **मधुश्च माधवश्च** इति चतुर्भिर्मासनामभिरेककपालमभिजुहोति **मधवे स्वाहा माधवाय स्वाहा** इति वा[4]॥१७॥ पृषदाज्येन नवानूयाजान् यजति ॥१८॥ [२]

संवत्सरीणाँ स्वस्तिमाशास्ते दिव्यं धामाशास्ते इति सूक्तवाकस्याशीष्षु[5] होतानुवर्तयति[6] ॥१॥ प्रहृतेषु परिधिषु सँस्रावेणाभिहुत्य वाजिनेन चरति[7] ॥२॥ वाजिनपात्र[8] उपस्तीर्य बर्हिषि विषिञ्चन् वाजिनं गृह्णाति ॥३॥ पूरयित्वा नाभि-

---

गोपीनाथः– वस्तुतस्तु सूत्रादप्ययमर्थो वर्णयितुं शक्यते । आशयमनु इत्येतस्य कृत्स्नमेककपालमवदायेत्येतस्मात् पूर्वमन्वयः । पर्यस्येत्यस्यानन्तरमन्वयः । तथा च आशयमनु कृत्स्नमेककपालमवदाय पर्यस्येत्येवमन्वयो भवति । तथा चायमर्थो भवति – आशयमनु स्रुच्युपस्तरणार्थं गृहीतमाशयाज्यमनु उपस्तरणार्थगृहीताशयानन्तरमिति यावत् । पर्यस्येत्यत्राशयमित्यस्यानुवृत्तिः.

१५. **तैब्रा १.६.३** 'यत् प्राङ पद्येत ...'; **मैसं १.१०.७** 'यत् प्राङ पद्येत ... पुनरादायाभिघार्य होतव्यः ... वरो दक्षिणा'.

१६. द्र. **मैसं १.१०.७; तैब्रा १.६.३** 'यद्धस्तेन जुहुयात् । सुवर्गाल्लोकाद्यजमानमवविध्येत् स्रुचा जुहोति'. **गोपीनाथः** – न पाणिनेत्येकेषामित्यत्र पाणिव्यतिरिक्तं संदंशादि यत् पर्यावर्तैककपालसमीकरणयोग्यं साधनं तत् स्रुचा विकल्पते.

१७. **तैसं १.४.१४** 'मधुश्च माधवश्च शुक्रश्च शुचिश्च'; **तैब्रा १.६.३** 'हुत्वाभिजुहोति'; **मैसं १.३.१६** 'मधवे त्वा माधवाय त्वा'; द्र. **कासं ४.७, वासं ३.३०; मैसं १.१०.८** 'वैश्वदेवेन चतुरो मासोऽयुक्त'.

१८. **तैब्रा १.६.२** 'नवानूयाजाः'.

१. **तैब्रा १.४.१०** 'तस्माद्वैश्वदेवेन यजमानः । संवत्सरीणाँ स्वस्तिमाशास्त इत्याशासीत'.

२. **तैब्रा १.६.३** 'वाजिनो यजति ... प्रहृत्य परिधीन् जुहोति'; **मैसं १.१०.९** 'सँस्थिते प्रहृतेषु परिधिषु जुहोति', द्र. **कासं ३६.४; मैसं ४.१.१४** 'सँस्रावभागा ... इति परिधीन् प्रहृत्याभिजुहोति'. **वाञ्छेश्वरः** – संस्रावान्तं कृत्वेत्येतावतैव सिद्धे गुरुतरसूत्रकरणं प्रहृत्य परिधीन् जुहोतीति वाजिनब्राह्मणस्यापि अयमेवार्थ इति ज्ञापयितुम् । वाजिनयागः प्रयाजादिवदारादुपकारकस्वतन्त्र एवेति कृत्स्नप्रयोगान्ते निवेशो युक्त एवेत्यास्तां विस्तरः.

३. **तैब्रा १.६.३** 'बर्हिषि विषिञ्चन् वाजिनमानयति'; **मैसं १.१०.९** 'बर्हिरनुषिञ्चन् गृह्णाति', द्र. **कासं ३६.४. गोपीनाथः** – ध्रौवाज्येन स्रुचं चमसं वोपस्तीर्य. अतो गोपीनाथमते 'वाजिनपात्रम्' इति पाठः.

---

१. म१–नास्ति २. म१–३–हुतं ३. मु–१५–१६ इत्यनयोरेकमेव सूत्रम् ४. म१– नास्ति ५. श्रौबा १–२, बा, वैअ, गो– °शीःषु; इ– °शिषु; अ–°शीषु; आ २– °शीःष्षु; म२– °शीःर्षु ६. म १– °यते ७. एवं इ, म १–३, गो; मु–प्रचरति ८. भां. १, वैआ २–वाजिनपात्रम्

घारयति ॥४[1]॥ **वाजिभ्योऽनुब्रूहि[2] वाजिनो[3] यज** इति संप्रेष्यति ॥५॥ ऊर्ध्वज्ञुरासीनो होतानवानं यजति ॥६॥ वषट्कृते विषिच्यमानया[4] जुहोति ॥७॥ **वाजिनस्याग्ने वीहि** इत्यनुयजति॥८॥ वाजिनोद्रेकेण दिशः प्रति[5] यजति[5] यथा वसाहोमोद्रेकेण ॥९॥ समुपहूय सर्वे वाजिनं भक्षयन्त्यन्योन्यस्मिन्नुपह्वमिच्छन्तः ॥१०॥ **उपह्वयस्व** इत्यामन्त्रणः **उपहूतः** इति प्रतिवचनः ॥११[6]॥ **वाजिनां भक्षो अवतु वाजो अस्मान् रेतः सिक्तममृतं बलाय । स न इन्द्र इन्द्रियं द्रविणं दधातु मा रिषाम वाजिनं भक्षयन्तस्तस्य ते वाजिन् वाजिभिर्भक्षंकृतस्य मधुमत उपहूतस्योपहूतो भक्षयामि** इति भक्षयन्ति[7] ॥१२॥ यजमानः प्रथम उत्तमो वा ॥१३॥ श्वोभूते पौर्णमास्येष्ट्वोदवसायानुदवसाय[8] वा ॥१४॥ **प्रसूता देवेन सवित्रा दैव्या आप उन्दन्तु दीर्घायुत्वाय[9] वर्चसे[9]** इति शिरोऽभ्युनक्ति[10] ॥१५॥ **ऋतमेव परमेष्ठचृतं[11] नात्येति किंचनर्ते समुद्र आहित ऋते भूमिरियँ श्रितागिनस्तिग्मेन शोचिषा तप आक्रान्तमुष्णिहा शिरस्तप-**

---

५. **शब्रा** २.४.४.२२ 'वाजिभ्यो वाजिनं जुहोति'.

६. **मैसं** १.१०.९ ऊर्ध्वज्ञुरासीनो यजति; **कासं** ३६.४ 'ऊर्ध्वज्ञुरासीनो यजति... यदनवानँ होता यजति'. **गोपीनाथः** – पुरोनुवाक्यायामूर्ध्वज्ञुरासीनोऽनवानमिति न यजतीत्यनेन याज्याया एव ग्रहणात् ... वषट्कारान्तमूर्ध्वज्ञुता. **वाञ्छेश्वरः** – ऊर्ध्वज्ञुरूर्ध्वजानुरासीन उपविष्टः अनवानमर्धर्चविरामरहितं होता यजति याज्यां ब्रूते.

८. **मैसं** १.१०.९, **कासं** ३६.४ 'अनुयजति'; **शब्रा** २.४.४.२३ 'अग्ने वीहीत्यनु वषट्करोति'.

९. **मैसं** १.१०.९ 'दिग्भ्यो जुहोति ... प्राचीमुत्तमां जुहोति'; **शब्रा** २.४.४.२४ 'अथ दिशो व्याघारयति दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहेति'; द्र. **हिश्रौ** ४.५. **गोपीनाथः** – यथा वसाहोमोद्रेकेणेत्यनेनानुपरिषेचनमुपस्थानं चात्रापि प्रापितम्.

१०. **तैब्रा** १.६.३ 'समुपहूय भक्षयन्ति'; **कासं** ३६.४ 'सर्व ऋत्विजः प्राश्नन्ति'.

११. **शब्रा** २.४.४.२५ 'उपहूत उपह्वयस्वेति'.

१२. **वाकासं** ३.९ 'वाजिनां वाजोऽवतु भक्षो अस्मान् रेतः सिक्तममृतं बलाय। विश्वे देवा अभि यत् संबभूवस्तन्मा धिनोतु प्रजया धनेन। वाज्यहं वाजिनस्योपहूत उपहूतस्य भक्षयामि'.

१३. **तैब्रा** १.६.३ 'यजमान उत्तमो भक्षयति'; **शब्रा** २.४.४.२५ 'प्रथमो यजमानो भक्षयति ... अथो अप्युत्तमः'.

१४. **गोपीनाथः** – सांवत्सरिकप्रयोगपक्षे श्वोभूते पौर्णमासेनेष्ट्वा उदवसायानुदवसाय वा वपेत्.

---

१. मु–३–४ इत्यनयोरेकमेव सूत्रम् २. म १–२–°ब्रूहीति वा ३. म १–३–वाजिभ्यो ४. श्रौवा २, भां१, आ १–२–विषिच्यमानं वा ; म२– °माना ; म ३–°मानायां ५. मु– प्रतियजति ६. म–१०–११ इत्यनयोरेकमेव सूत्रम् ७. वैअ, म२– भक्षयति ८. वै, गो, मु–पौर्णमासेनेष्ट्वो° ९. इ.–जीवस; भां१–जीवसे १०. म १–३– दीर्घायुत्वाय वर्चस; म१– ते तनुम–दीर्घा° ; म २–ते तनुर्म–दीर्घा°; म३– ते तनूः दीर्घा° °भ्यानक्ति ११. वैश्रौवा, वैआ २, मु–परमेष्ट्यृतं

स्याहितं वैश्वानरस्य तेजसर्तेनास्य निवर्तये सत्येन परिवर्तये तपसास्यानुवर्तये शिवेना-स्योपवर्तये शग्मेनास्याभिवर्तये इति त्रेण्या शलल्येक्षुलाकया[1] वा[2] केशान् विनायन्[3] ।।१६।। लौहेन[4] क्षुरेणौदुम्बरेण केशान्[5] निवर्तयति[6] ।।१७।। वपति[6] श्मश्रूणि सर्वं वा वापयते ।।१८।। [३]

।। इति हिरण्यकेशिसूत्रे[7] पञ्चमप्रश्ने[8] प्रथमः पटलः ।।

ततश्चतुर्षु[9] मासेष्वाषाढ्यां श्रावण्यां[10] वा वरुणप्रघासैर्यजते ।।१।। तेषां[11] वैश्वदेवेन कल्पो व्याख्यातः ।।२।। द्वावाहवनीयावुभयत्रावापः[12] ।।३।। कृत्स्नमुत्तरे विहारे तन्त्रं क्रियते तथा दक्षिणे ।।४[13]।। अध्वर्युर्गार्हपत्यसंयुक्तानि ।।५।। यानि साधा-

---

१६. **तैब्रा** १.५.६ 'त्रेण्या शलल्या निवर्तयेत'. **गोपीनाथः**– अयं छेदनमन्त्रः.

१७. **तैब्रा** १.५.६ 'लोहितायसेन निवर्तयते'; **शब्रा** २.६.४.५ 'लोहः क्षुरः. . . तेन परि-वर्तयते.' **वाञ्छेश्वरः** – लौहेन लोहविकारेण क्षुरेणौदुम्बरेण ताम्रेण केशान् निवर्तयति छिनत्ति । अत्रौदुम्बरेणेति विशेषणं लोहितायसेन निवर्तयत इति श्रुत्यनुसारात् ताम्रस्य केवलस्य वपनासामर्थ्यात् तन्मिश्रेण कालायसेन क्षुरं कृत्वा इक्षुशललीभ्यां गृहीतेन तेन क्षुरेण केशान् छिन्द्यादित्यर्थः.

१८. **तैब्रा** १.५.६ 'स श्मश्रूण्यग्रेऽवपत । अथोपपक्षौ । अथ केशान्'; **शब्रा** २.६.३.१७ 'तस्माद्वै परिवर्तयेत . . .यदपि सर्वाण्येव लोमानि वपेत । यद्वै त्रिः संवत्सरस्य यजते . . . तस्मान्नाद्रियेत परिवर्तयितुमिति'. **गोपीनाथः** – मूलसहिता यत्र छेद्यन्ते तद् वपनमित्युच्यते। श्मश्रूणि उपपक्षौ केशांश्चेत्येतत् सर्वं वापयत एव न तु केशानां निवर्तनम् इतरेषां वपनमिति विधिः । मूलं विना यत्र छेद्यन्ते तन्निवर्तनमित्युच्यते.

१. **तैब्रा** १.५.७.७ 'चतृषु चतृषु मासेषु निवर्तयेत'; **शब्रा** २.५.२.४ 'अथ यदेष एतैश्चतुर्थे मासि यजते'; **तांब्रा** १७.१३.७ 'ततश्चतुर्षु मासेषु वरुणप्रघासानां लोके द्विदिवः'. **वाञ्छेश्वरः**– चतुर्षु मासेष्वाषाढ्यामिति वचनात् नाधिकमासयुक्ते संवत्सरे चातुर्मास्यानि कार्याणि.

२. **वाञ्छेश्वरः** – तस्य वैश्वदेवेनेति वचनाद्दक्षिणविहारस्यापि वैश्वदेवतन्त्रम्.

३. **शब्रा** २.५.२.५ 'द्वे वेदी द्वावग्नी भवतः'.

५. **वाञ्छेश्वरः** – विहारभेदेन व्यवस्थामुक्त्वा गार्हपत्यसंयुक्ताङ्गविषये व्यवस्थामाह अध्वर्यु-र्गार्हपत्यसंयुक्तानि गार्हपत्यादौ क्रियमाणानि पत्नीसंयाजहोमादीनि.

---

१. म १–२–शलल्येशलाक्या २. म३–वेक्षुकाण्डेन ३. श्रौबा २–वितायं; म१–वीरायां ता; म २–वीरा––तौ; म ३–विकायां ४. म १–२–ह्येन ५. म १–नी केशान्; म ३– नि केशान् ६. इ–निर्वपति; म १–२–वर्तयति वपति ; म३–वर्तयति वपन्ति ७. वैश्रौवा, भां १, श्रौबा१–हिरण्यकेशी° ; मु–सत्याषाढहिरण्यकेशि° ८. वैश्रौवा–पंचमे चातुर्मास्यप्रश्ने ९. श्रौबा २, इ, भां १, वा–ततश्चतृषु; म १, ३–ततश्च त्रिषु; म २–ततश्चस्त्रिषु ११. म १–३–श्रावणायां ११. इ–नास्ति १२. भां१– °वापं १३. मु–३–४ इत्यनयोरेकमेव सूत्रम्

रणानि ॥६॥ तन्त्रमङ्गानां हौत्रं तदध्वर्युः संप्रेष्यति ॥७॥ एकवदग्निसंयुक्तानि सामिधेनीष्वग्निप्रणयनेऽग्निसंमार्जने[1] च ॥८[2]॥ उभौ ब्रह्माणमामन्त्रयेते द्विवद्-ब्रह्मानुजानाति[3] ॥९॥ यत्राग्नी[4] प्रणेष्यन्तौ[5] भवतस्तस्मिन् देशे समे प्राची वेदी कुरुतः ॥१०॥ द्व्यङ्गुलेन त्र्यङ्गुलेन[6] चतुरङ्गुलेन[6] पृथमात्रेण[7] वा श्रोण्यंसेष्वसंभिन्ने भवतः ॥११[8]॥ यदध्वर्युः करोति तत् प्रतिप्रस्थाता करोति ॥१२॥ उत्तरे विहारेऽध्वर्युः कर्माणि करोति दक्षिणे प्रतिप्रस्थाता ॥१३॥ दक्षिणस्या[9] वेदेरुत्तरस्याः[10] श्रोणेरुत्त-रस्या वेदेर्दक्षिणमंसं स्फ्येनैकस्फ्यामनुसंभिनत्ति[11] ॥१४॥ समान उत्करो होता[12] ब्रह्माग्नीध्रश्च[13] ॥१५॥ अग्रेणोत्तरं विहारं प्रतिप्रस्थातोत्कराय संचरति ॥१६॥ [14]यत् प्रागुत्तरस्मात् परिग्राहात् तत् कृत्वोत्तरवेद्याः[14] कल्पेनोत्तरस्यामुत्तरवेदिं करोति ॥१७॥ उभयत्र[15] संभारेषु[16] पाशुकमग्निप्रणयनम् ॥१८॥ अग्नीनन्वा-धायामिक्षयोर्वत्सानपाकुरुतो मारुत्यै प्रतिप्रस्थाताऽध्वर्युर्वारुण्यै ॥१९[17]॥ सायंदोहस्या-

---

६. **वाञ्छेश्वरः**– यान्यङ्गानि साधारणानि सकृदनुष्ठानेन विहारद्वयकर्तव्यप्रधानोपकारकाणी-त्यर्थः । तान्यध्वर्युः करोतीति शेषः.

८. **वाञ्छेश्वरः**– अग्निप्रतिपादकयुक्तानि एकवदेकवचनयुक्तानि प्रयोजनानीत्यर्थः । तदेव स्पष्टप्रतिपत्त्यर्थमाह सामिधेनीषु . . . .

९. **वाञ्छेश्वरः**– प्रकृतमनुसरामः । अध्वर्युः संप्रेष्यतीत्यस्यापवादमाह उभौ ब्रह्माणमामन्त्रयेते.

१०. **मैसं** १.१०.१३ 'समे प्राची भवतः'; **कासं** ३६.७ 'समे कार्ये'.

११. **तैब्रा** १.६.४ 'पृथमात्राद् वेदी असंभिन्ने भवतः'.

१२. **तैब्रा** १.६.५ 'यदेवाध्वर्युः करोति तत् प्रतिप्रस्थाता करोति'.

१४. **मैसं** १.१०.१३ 'एकस्फ्यां[12] पश्चादनुसंभिनत्ति', द्र. **कासं** ३६.७.

१७. **तैब्रा** १.६.४ 'उत्तरस्यां वेद्यामुत्तरवेदिमुपवपति'; द्र. **हिश्रौ** ४.१.

१८. द्र. **हिश्रौ** ४.२. **गोपीनाथः**– दक्षिणविहारे उत्तरवेदिप्रतिषेधात् यज्ञोत्पत्तौ प्रति-षिद्धे सर्वं प्रतिषिध्येतेत्येतस्मात् प्रतिषेधात् उत्तरवेदिनिवृत्तिवत् संभाराणामपि निवृत्तौ प्राप्तायां सत्यां संभाराणां प्रापणार्थम् उभयत्र संभारेषु पाशुकं प्रणयनमिति वचनम्. **वाञ्छेश्वरः**– उभयत्र विहारद्वयेऽप्याहवनीयायतनद्वयेऽपीत्यर्थः । संभारा ऊर्णास्तुकादय इत्यर्थः.

१९. **गोपीनाथः**– अग्नीनन्वाधायेति ल्यप्-प्रत्ययेन अग्न्यन्वाधानवत्सापाकरणयोः समानकर्तृत्वस्य अध्वर्याविव प्रतिप्रस्थातर्यपि तथात्वबोधनात्.

---

१. अ–॰मार्जनैव २. मु–सूत्रद्वयं यथा–॰युक्तानि ॥ ॥ सामिधेनी॰ ३. म १–३–द्विर्ब्रह्मा॰ ४. म १–३–यत्राग्नि ५. श्रौबा १–प्रणेष्यतौ ६. म १–२–नास्ति ७. म १–३–प्रथमात्रेण ८. मु–१०–११ इत्यनयोरेकमेव सूत्रम् ९. म ३–दक्षिणस्यां १०. म १–३–नास्ति ११. श्रौबा १–स्फ्येनेकं॰ १२. 'एकस्या' इति मुद्रितपाठः १३. एवं बहुषु लिखितपुस्तकेषु; वै, मु–ब्रह्मा होताग्नीध्रश्च १४–१४. एवं सूत्रपुस्तकेषु; वै– उत्तरवेद्याः; म १–'यत्' नास्ति; म ३–यत् यत् प्रागु॰ १५. म ३–उत्तरत्रयस्सं॰ १६. एवं वै, गो, टि ; म १–२–संहाराः ; मु–संभाराः. १७. मु–सूत्रद्वयं यथा–॰न्वाधाय ॥ ॥ आमिक्षयो॰

वृता दधिनी[1] कुरुतः ॥२०॥ पात्रसँसादनकाले यथार्थं पात्राणि प्रयुङ्क्तः[2]॥२१॥ शमीमय्यः स्रुचो भवन्ति ॥२२[3]॥ [४]

। हिरण्मय्यो वा ॥१[3]॥ निर्वपणकालेऽध्वर्युः पञ्च संचराणि निरुप्यैन्द्राग्नमेकादशकपालं[4] निर्वपति ॥२॥ मारुत्यै मेष्यै प्रतिप्रस्थाता यवान् निर्वपति ॥३॥ अध्वर्युर्वारुणं मेषं निरुप्य कायमेककपालं निर्वपति ॥४॥ सर्वे वा यवा भवन्ति ॥५॥ प्रोक्षण्युद्रेकेण यवान्[5] संयुत्यावहन्ति[5] ॥६॥ ऐन्द्राग्नपर्यन्तेषूपहितेषु प्रतिप्रस्थाता दक्षिणार्धे गार्हपत्यस्यैकादश द्वादश वा कपालान्युपदधाति ॥७॥ अष्टौ मेषस्योपधायाध्वर्युः कायस्योपदधाति[6] ॥८॥ प्रातर्दोहस्यावृता प्रातर्दोहौ[7] दोहयतः ॥९॥ आमिक्षे कुरुतो यथा पुरस्तात् ॥१०॥ ऐन्द्राग्नपर्यन्तेष्वधिश्रितेषु[8] मेषप्रतिकृती[9] कुरुतो[10] मारुतीं मेषीं प्रतिप्रस्थाता करोत्यध्वर्युर्वारुणं[11] मेषम् ॥११॥ स्त्रीव्यञ्जनानि स्त्रियाः करोति[12] पुंव्यञ्जनानि[12] पुँसः ॥१२॥ एकादशसु द्वादशसु वा कपालेषु प्रतिप्रस्थाता मेषीमधिश्रयति ॥१३॥ अष्टसु मेषमधिश्रित्याध्वर्युः कायमेककपालमधिश्रयति ॥१४[13]॥ कुम्भीपाक्यौ वा मेषौ[14] भवतः[15] ॥१५॥ अन्येषां लौकिकानामामपेषाणामीषदुपतप्तानां यवानां करम्भपात्राणि कुरुतो यजमानः पत्नी च ॥१६॥

---

२०. द्र. **हिश्रौ** १.४

२२. **मैसं** १.१०.१२, **कासं** ३६.६ 'शमीपर्णानि भवन्ति . . . कार्या एतस्य स्रुचः'.

१. **वाञ्छेश्वरः** – हिरण्मय्यो वा स्वर्णमय्यो वा स्रुचो भवन्तीत्यन्वयः.

२. **तैब्रा** १.६.४ 'एतद् ब्राह्मणान्येव पञ्च हवीँषि'; द्र. **हिश्रौ** ५.१.१४.

३–४. **तैसं** १.८.३ 'कायमेककपालम्'; **तैब्रा** १.६.४ 'मेषी च मेषश्च भवतः'; **शब्रा** २.५.२.१६ 'यवमयौ भवतः'.

६. **वाञ्छेश्वरः** – प्रोक्षणीशेषेण संयवनं च सर्वेषां यवमयत्वे अवघातसौकर्यार्थम्; अन्यथा यवानां कठिणतयावघातस्य सुकरत्वासंभवात्.

९. द्र. **हिश्रौ** ५.१.१८.

१०. द्र. **हिश्रौ** ५.१.१९-२०.

१५. **वाञ्छेश्वरः** – मेषश्च मेषी च मेषौ पुमान् स्त्रियेत्येकशेषः । भवत इत्यन्वयः.

१६. **तैब्रा** १.६.४ 'प्रतिपूरुषं करम्भपात्राणि'; **शब्रा** २.५.२.१४ 'अतुषानिव यवान् कृत्वा तानीषदिवोपतप्य तेषां करम्भपात्राणि कुर्वन्ति'; **मैसं** १.१०.११, **कासं** ३६.६

---

१. म २–३–दधीनि २. म १–३–प्रयुङ्क्ते ३. मु–२१–२२ इत्यनयोः अग्रिमायाः कण्डिकायाः प्रथमस्य चैतेषां सूत्राणामेकमेव सूत्रम् ४. म १–कुरुते ऐन्द्राग्न° ५. वैश्रौबा, वैआ २–यवात्सं°; भां १–यवा सं°; श्रौबा२ –यवात्सं°; अ–यवान् संयुवत्या°; म १–यवान् संयुक्त्यावहति; म २–३–°वहति ६. म १–३–कायमुपदधाति ७. म १–२–प्रातर्दोहं ८. म ३–ऐन्द्राग्नपर्यन्तेषूपहितेषु प्रतिप्रस्थाता दक्षिणार्धे गार्हपत्येष्वधिश्रितेषु ९. श्रौबा२, वैश्रौबा, भां १, म १–२–°प्रकृती १०. मु– अत्र सूत्रच्छेद अवशिष्ट उत्तरस्य भागः ११. इ, बा, डे, भां २, म १–३– अध्वर्युर्वारुणं १२. म १–२–नास्ति १३. मु– १३–१४ इत्यनयोरेकमेव सूत्रम् १४. श्रौबा २, वैश्रौबा–मेषीमेषौ १५. म १–२ भवत्यतः

यावन्तो यजमानस्य[1] प्रेष्यामात्याः[1] सस्त्रीकास्तत एकाधिकानि ।।१७।। उत्तरं परिग्राहं परिगृह्य संप्रैषेण प्रतिपद्येते[2] ।।१८।। **आज्येन दध्ना चोदेहि** इति संप्रैषस्यान्तँ संनमतः[3] ।।१९[4]।। आषाढ्यां यथा[5] फाल्गुन्यामेवं पृषदाज्यं गृह्णीतः ।।२०।। श्रावण्यां[6] तु सकृदाज्यस्योपस्तीर्य द्विर्दधि गृहीत्वा द्विराज्येनाभिघारयतः[7] ।।२१।। उद्वासनप्रभृतीनि कर्माणि प्रतिपद्येते[8] ।।२२।। ऐन्द्राग्नपर्यन्तेष्वलंकृतेष्वनैडकीभिरूर्णाभिर्मेषप्रतिकृती[9] लोमशौ[10]कुरुतः ।।२३।। तास्वविद्यमानासु कुशोर्णा[10] निश्लेषयतः ।।२४[11]।। [12]मारुत्यां मेषमवदधाति वारुण्यां मेषीम् ।।२५।। [५]

उत्तरस्यां वेद्यामन्यानि हवीँषि सादयति दक्षिणायां मारुतीं करम्भपात्राणि च[12] ।।१।। आसाद्य[13] मेषप्रतिकृती[14] विपरिहरतः ।।२।। मारुत्यां मेषीमवदधाति वारुण्यां मेषम्।।३[15]।।तयोः परःशतानि परःसहस्राणि वा शमीपर्णकरीराण्युपवतः।।४।।

'आमपेषा भवन्ति'. **गोपीनाथः**– करम्भशब्देन शमीकरीराणि च उच्यन्ते याज्ञिकसंकेतात् तदाधारभूतानि पात्राणि करम्भपात्राणि संप्रदायात् दीपाकाराणि. **वाञ्छेश्वरः** – शमीपर्णमिश्राणि करीराणि करम्भः तद्धारणार्थानि पात्राणि.

१७. **मैसं १.१०.११, कासं ३६.६** 'एकमधि भवति'; **शब्रा २.५.२.१४** 'यावन्तो गृह्याः स्युः . . . एकेनातिरिक्तानि'. **गोपीनाथः** – सस्त्रीका अप्रत्तकन्यकाश्चोच्यन्ते.

२०. द्र. **हिश्रौ ५.२.४.**

२१. **मैसं १.१०.७** 'यदि प्रावृषि सकृदुपस्तृणीयाद् द्विरभिघारयेत्'.

२३. **तैब्रा १.६.४** 'लोमशौ भवतः'; **शब्रा २.५.२.१५** 'यद्यनैडकीरूर्णा विन्देत् ताः प्रणिज्य निश्लेषयेत्'.

२४. **शब्रा २.५.२.१५** 'यद्यु अनैडकीर्न विन्देदथो अपि कुशोर्णा एव स्युः'.

२५. **शब्रा २.५.२.१७** 'स उत्तरस्यामेव पयस्यां मेषीमवदधाति दक्षिणस्यां मेषम्'. **गोपीनाथः** – अवदधातीत्येकवचनाद् उभयोरवधानमध्वर्युकर्तृकमिति केचित्.

१. **तैब्रा १.६.५** 'उत्तरस्यां वेद्यामन्यानि हवीँषि सादयति दक्षिणायां मारुतीम्'.

२. **शब्रा २.५.२.३६** 'पयस्याभ्यां प्रचरिष्यन्तो विपरिहरतः'.

३. **शब्रा २.५.२.३६** 'स यो मेषो भवति मारुत्यां तं वारुण्यामवदधाति या मेषी भवति वारुण्यां तां मारुत्यामवदधाति'.

४. **तैब्रा १.६.४** 'शमीपर्णान्युपवपति . . . यत् परःशतानि'; **मैसं १.१०.१२, कासं ३६.६** 'परःशतानि कार्याणि. . .परःसहस्राणि कार्याणि'; **शब्रा २.५.२.११-१२** 'तयोरुभयोरेव करीराण्यावपति . . . शमीपलाशानि'.

---

१. म १–३–यजमानस्यामात्याः २. एवं श्रौबा१, अ, इ, बा, डे, म ३; म १–प्रतिपाद्यते; म २–प्रतिपाद्येते; वै, मु– प्रतिपद्यते ३. म३–नमतः ४. मु– १८–१९ इत्यनयोरेकमेव सूत्रम् ५. श्रौबा१, डे, भां२–नास्ति ६. म १–२–श्रवणायां; म ३–श्रावणायां ७. एवं बहुषु लिखितपुस्तकेषु; वैआ १, वैअ, मु–सकृदाज्येना° ८. एवं बहुषु लिखितपुस्तकेषु; मु–प्रतिपद्यते ९. श्रौबा२, भां १–°प्रकृती; वैश्रौबा, म १–२–°प्रकृति १०–१०. एवं बहुषु लिखितपुस्तकेषु; श्रौबा २–कुरुतः–स्तास्व°; म १–कुरुतः तास्तास्वाज्येनाभिघारयत उद्वासनप्रथ्यमानासु कृशोर्णा; मु–कुरुतस्तास्तास्ववि° ११. मु–२३–२४ इत्यनयोरेकमेव सूत्रम् १२–१२. म १–२–नास्ति १३. म १–२–चाद्य; म ३–अत्र १४. श्रौबा१, भां १, वैश्रौबा, म १–२– °प्रकृती १५. मु–२–३ इत्यनयोरेकमेव सूत्रम्

करम्भपात्रेषु चावपति[1] ।।५[2]।। निर्मन्थ्यस्यावृता निर्मन्थ्येन प्रचरतः ।।६।। वेदं निधाय सामिधेनीभ्यः संप्रेष्यति ।।७।। संमृष्ट[3] उत्तरेऽग्नावसंमृष्टे दक्षिणे[4] प्रतिप्रस्थाता पत्नीं पृच्छति **पत्नि[5] कति ते जाराः[6]** इति ।।८।। सा यावतः प्रब्रूयात्[7] **तान् वरुणो गृह्णातु** इति निर्दिशति ।।९।। यज्जारँ सन्तं न प्रब्रूयात् प्रियं ज्ञातिँ रुन्ध्यात् ।।१०[8]।। **प्रघास्यान् हवामहे** इति प्रतिप्रस्थाता पत्नीमुदानयति ।।११।। ऐषीके शूर्पे करम्भपात्राण्युप्तानि[9] पत्नी[10] शीर्षन्नधि निधायान्तरा वेदी[11] गत्वाग्रेण दक्षिणमग्निं प्रत्यञ्चाववतिष्ठेते[12] यजमानः पत्नी च ।।१२।। **मो षू णः** इति यजमानः पुरोनुवाक्यामन्वाह **यद् ग्रामे** इत्युभौ संनिगद्य[13] शूर्पेण दक्षिणेऽग्नौ जुहुतः ।।१३।। अध्वर्युर्वा जुहोत्यन्वारभेते इतरौ ।।१४।। **अक्रन् कर्म कर्मकृतः** इति विपरायन्तौ जपतः ।।१५।।

---

५. **गोपीनाथः** – सूत्रे आवपतीत्येकवचनादध्वर्युरेव करम्भपात्रेष्वावपति क्षिपति. **वाञ्छेश्वरः** – करम्भपात्रेषु च शमीपर्णकरीराण्यावपति प्रतिप्रस्थाता.

६. **शब्रा** २.५.२.१९ 'आसाद्य हवीँष्यग्निं मन्थति'; द्र. **हिश्रौ** ५.२.९. **वाञ्छेश्वरः** – अग्नये मथ्यमानायानुब्रूहीत्येव संप्रैष इति केचित् संप्रैषकार्यानुवचनस्य होतृकर्तव्यतयाऽनुब्रूहीत्येकवचनसंभवेऽपि अग्निभ्यां मथ्यमानायानुब्रूहीति द्विवचनस्यावश्यकत्वादित्यन्ये.

७. **गोपीनाथः** – अध्वर्युप्रतिप्रस्थातारौ वेदं निधत्तः । अग्नये समिध्यमानायानुब्रूहीत्यध्वर्युरेव.

८. **तैब्रा** १.६.५ 'पत्नीं वाचयति'; **शब्रा** २.५.२.२० 'अथ प्रतिप्रस्थाता... पत्नीमुदानेष्यन् पृच्छति केन चरसि इति'.

९. **तैब्रा** १.६.५ 'निर्दिश्यैवैनं वरुणपाशेन ग्राहयति'. **गोपीनाथः** – तान् वरुणो गृह्णात्वित्यस्य निर्देशस्य अध्वर्युकर्तृत्वमेव । अग्रे पुनः प्रतिप्रस्थातुर्ग्रहणात् । जारासत्वे जारा न सन्तीति ब्रूयात् तदा तानिति नास्ति.

१०. **तैब्रा** १.६.५ 'यज्जारँ सन्तं न प्रब्रूयात् प्रियं ज्ञातिँ रुन्ध्यात्'.

११. **तैब्रा** १.६.५ 'प्रघास्यान् हवामह इति पत्नीमुदानयति'.

१२. **तैब्रा** १.६.५ 'शीर्षन्नधि निधाय जुहोति'; **मैसं** १.१०.११, **कासं** ३६.६ 'पुरस्तात् प्रत्यञ्चौ तिष्ठन्तौ जुहुतः'.

१३. **तैब्रा** १.६.५ 'यत् पत्नी पुरोनुवाक्यामनुब्रूयात्... यजमानोऽन्वाह ...उभौ याज्याम् ...दक्षिणेऽग्नौ जुहोति... शूर्पेण जुहोति'. **वाञ्छेश्वरः** – जुहुतः पत्नीशीर्षस्थान्यपि करम्भपात्राणि कानिचिद् यजमानो गृहीत्वा जुहुयात् । अवशिष्टानि च पत्नी स्वयं जुहुयादित्यर्थः.

१४. **गोपीनाथः** – अयं शाखान्तरीयः पक्षः परंतु ब्राह्मणे (**तैब्रा** १.६.५) जुहोतीत्येकवचनेन अध्वर्युरेव करम्भपात्राणि जुहोतीति विधिर्निर्दिष्टः.

---

१. वैअ–वाचयति २. मु–४–५ इत्यनयोरेकमेव सूत्रम् ३. भां१–संमृष्टम्; आ२–संसृष्ट ४. इ–च दक्षिणेन; भां १–दक्षिणेन; वैश्रौवा–दक्षिणे च ५. इ, भां २, आ १–२, म १–३–पत्नी ६. म१–चारभ्य; म२–जारान्य ७. म १–३–प्रतिब्रूयात् ८. मु–८–१० इत्येषामेकमेव सूत्रम् ९. म १–२–°पात्राणि भ्योप्तानि; म ३–°त्राण्योप्तानि १०. वैश्रौवा, म २–नास्ति ११. म१–२–वेदिं १२. म१–°वपितिष्ठते ; म २–°वपतिष्ठेते १३. म१–२–संनिगद्येण

संमार्ष्टि[1] दक्षिणमग्निम् ॥१६॥ ऐन्द्राग्नपर्यन्तैः प्रचरिते[2] ॥१७॥ प्रतिप्रस्थाता मारुत्याः पूर्वेण सहावदानेन कृत्स्नां मेषीमवद्यत्युत्तरेण शमीपर्णकरीराणि ॥१८॥ अध्वर्युर्वारुण्याः पूर्वेण सहावदानेन कृत्स्नं मेषमवद्यत्युत्तरेण शमीपर्णकरीराणि ॥१९॥ **कायानुब्रूहि कं यज** इति ॥२०[3]॥ [६]

एककपाले संप्रेष्यति ॥१[3]॥ **नभश्च नभस्यश्च** इति चतुर्भिर्मासनामभिरेककपालमभिजुहोति **नभसे स्वाहा नभस्याय स्वाहा** इति वा ॥२॥ **परिवत्सरीणाँ स्वस्तिमाशास्ते दिव्यं[4] धामाशास्ते[4]** इति सूक्तवाकस्याशीष्षु[5] होतानुवर्तयति ॥३॥ प्रहृतेषु परिधिषु सँस्रावेणाभिहुत्य वाजिनेन चरतो[6] यथा पुरस्तात् ॥४[7]॥ **यन्मे रेतः प्रसिच्यते यन्म आजायते पुनः । यद्वा मे प्रतितिष्ठति तेन मा[8] वाजिनं कुरु तेन सुप्रजसं[9] कुरु[9] तस्य ते वाजिन् वाजिभिर्भक्षंकृतस्य मधुमत उपहूतस्योपहूतो भक्षयामि** इति दक्षिणे विहारे भक्षयन्ति ॥५॥ **आ मा विशन्त्विन्दव आ गल्गा[10] धमनीनाम् । रसेन मे रसं पृण तस्य ते वाजिन् वाजिभिर्भक्षंकृतस्य मधुमत उपहूतस्योपहूतो भक्षयामि** इत्युत्तरे ॥६॥ सँस्थाप्य वारुण्या[11] निष्कासेन[11] तुषैश्चावभृथमवयन्ति[12] ॥७॥ तस्य सौमिकेनावभृथेन[13] कल्पो व्याख्यातः ॥८[14]॥ न साम गीयते

---

१६. **मैसं** १.१०.१२ 'यदा पात्राणि जुह्वत्यथाग्निँ संमार्ष्टि'; **कासं** ३६.६ 'पात्राणि हुत्वाग्निं संमार्ष्टि'.

१८. **शब्रा** २.५.२.३८ 'प्रतिप्रस्थाताथास्यै मारुत्यै पयस्यायै द्विरवद्यति । सोऽन्यतरेणावदानेन सह मेषीमवदधाति'.

१९. **शब्रा** २.५.२.३७ 'अथाध्वर्युः ...वारुण्यै पयस्यायै द्विरवद्यति । सोऽन्यतरेणावदानेन सह मेषमवदधाति'.

२०. **वाञ्छेश्वरः**– कं यजेत्येककपाले संप्रेष्यतीत्यग्रेणान्वयः.

२. **तैसं** १.४.१४ 'नभश्च नभस्यश्चेषश्चोर्जश्च'; **कासं** १.६.३ 'हुत्वाभिजुहोति'. **मैसं** १.३.१६ 'नभसे त्वा नभस्याय त्वा'; द्र. **कासं** ४.७, **वासं** ७.३०.

३. **तैब्रा** १.४.१० 'परिवत्सरीणाँ स्वस्तिमाशास्त इत्याशासीत'.

४. द्र. **हिश्रौ** ५.३.२. **वाञ्छेश्वरः** – प्रहृतेषु इत्यादि प्रयोगसंधानार्थमेतत्.

७. **तैब्रा** १.६.५ 'तुषैश्च निष्कासेन चावभृथमवैति'; **मैसं** १.१०.१३ 'यन्निष्काषेणावभृथमभ्यवयन्ति'. **वाञ्छेश्वरः** – संस्थाप्येति वचनं प्रणीताननयनान्तप्रयोगसमाप्तिद्योतनार्थम्.

८. द्र. **हिश्रौ** ९.५.

---

१. भां१–सन्निमार्ष्टि २. श्रौबा१, भां १–प्रचरति ते; वैअ, टि–प्रचरितैः; म१–प्रतिऋचीते; म२–प्रतिरिचीते ३. मु–इदं सूत्रम् अग्रिमायाः कण्डिकायाः प्रथमं चेत्यनयोरेकमेव सूत्रम् ४. एवं सूत्रपुस्तकेषु; वै, मु–नास्ति ५. एवं केषुचिल्लिखितपुस्तकेषु; श्रौबा१, वैश्रौबा–°शीष्पु; इ–°शिष्पु; भां२–°शिष्पु; बा–°शीःष्षु; म १–°कस्या; वैआ१, मु–°शीःपु ६. एवं श्रौबा१, इ, अ, डे, म१–३, गो; मु–प्रचरतः ७. मु–सूत्रद्वयं यथा–प्रचरतः ॥ ॥ यथा ८. म १–मे ९. अ–नास्ति १०. इ–गल्दा; भां १, म ३–गल्गा; भां २–गल्सा; म१–गल्फा; म २–गल्था ११. वैआ २, टि–वारुण्यामिक्षानिष्कासेन १२. भां१–°वभृतार्थमवयन्ति १३. म १–सौमिकेना; म ३–सौमिकानाव° १४. मु–७–८ इत्यनयोरेकमेव सूत्रम्

।।९।। तूष्णीमेव परेत्य[1] ।।१०।। वारुणस्य धर्मेण निष्कासं प्रतिपाद्य तुषानृजीषकल्पेन[2] प्रतिपादयति ।।११।। अवभृथादुदेत्य वाससी यस्मै कामयेते तस्मै दत्तः ।।१२।। श्वोभूते पौर्णमास्येष्ट्वोदवसायानुदवसाय[3] वा **प्रसूता[4] देवेन सवित्रा** इत्युन्दति[5] ।।१३।। **यद् घर्मः पर्यवर्तयदन्तान् पृथिव्या दिवोऽग्निरीशान ओजसा वरुणो धीतिभिः सहेन्द्रो मरुद्भिः[6] सखिभिः सहाग्निस्तिग्मेन शोचिषा** इति निवर्तनं वापनं[7] यथा पुरस्तात् ।।१४।। [७]

।। इति हिरण्यकेशिसूत्रे[8] पञ्चमप्रश्ने[9] द्वितीयः पटलः ।।

ततश्चतुर्षु[10] मासेषु कार्तिक्यां मार्गशीर्ष्यां वा द्व्यहं[1] साकमेधैर्यजते ।।१।। अग्नयेऽनीकवते पुरोडाशमष्टकपालं निर्वपति साकं[2] सूर्येणोद्यता । साकं[11] रश्मिभिः प्रचरन्तीत्येकेषाम् ।।२।। मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुम् । न[12] बर्हिरनुप्रहरतीत्येकेषाम् ।।३।। अपराह्णे गृहमेधीयाय वत्सानपाकरोति यावन्तो यजमा-

---

९. **शब्रा २.५.२.४९** 'तत्र न साम गीयते'. **गोपीनाथः** – यदि निषेधो न क्रियते तदा 'सामवेदेनोद्गाता' (**हिश्रौ १.१**) इति परिभाषासूत्रात् उद्गातुर्वरणं प्रसज्यते । 'सर्वत्रानादेशे परिसामानि प्रस्तोता गायेत् स्वाध्यायवत्स्वासु तृचापत्तीनि तृचेषु त्रिरितराणि' (**लाटचाश्रौ १.५.१-२**) इति छन्दोगसूत्रात् प्रस्तोता वा प्रसज्येत । तत्प्रसक्तौ 'तस्माच्चातुर्मास्यानां यज्ञक्रतोः पञ्चर्त्विजः' (**तैब्रा २.३.६:२**) इति पञ्चत्वसंख्या व्याहन्येत । अतः सामगाननिषेधः कृतः.

१०. **शब्रा २.५.२.४९** 'तूष्णीमेवेत्याभ्यवेत्योपमारयति'.

१२. **शब्रा २.५.२.४७** 'कामं हैते यस्मै कामयेत तस्मै दद्यात्'.

१३. द्र. **हिश्रौ ५.३.१५**.

१४. द्र. **हिश्रौ ५.३.१६**.

१. **शब्रा २.५.३.१** 'अथैतैः साकमेधैः . . . एतैश्चतुर्थे मासि यजते . . . स वै द्व्यहमनूचीनाहं यजते'; **तांब्रा १७.१३.१२** 'ततश्चतुर्षु मासेषु साकमेधानां लोके त्रिरात्रः'.

२. **तैसं १.८.४** 'अग्नयेऽनीकवते पुरोडाशमष्टाकपालं निर्वपति साकं सूर्येणोद्यता'; **मैसं १.१०.१, कासं ९.५** 'अग्नयेऽनीकवते प्रातरष्टाकपालः'. **गोपीनाथः** –निर्वापशब्देन निर्वापः प्रचारो वा.

३. **तैसं १.८.४** 'मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुम्'. **गोपीनाथः** – अनीकवतेष्टौ यदि बर्हिर्न प्रहृतं तदा गृहमेधीयान्तं नैव प्रहरणम् । यदा तु प्रहृतं तदात्र प्रहरणे विकल्पः । यदा तु अस्यामिष्टौ प्रहृतं तदा गृहमेधीयेष्टौ बर्हिरेव न.

---

१. म१–३–परीत्य २. एवं बहुषु लिखितपुस्तकेषु; म१–तुषानुजुष°; वैआ १–२, गो, मु–°जीषधर्मेण ३. वैअ–पौर्णमासेष्ट्वो°; म ३–पौर्णमासीमिष्ट्वो°; मु–पौर्णमासेनेष्ट्वो° ४. म १–३–प्रसूतो; वैआ २, टि–प्रसूतेत्यादि ५. टि–°न्दन्ति ६. भां २–नास्ति ७. श्रौबा २–वा वपनं ८. एवं श्रौबा १–२, इ. अ, डे; भां १, बा–हिरण्यकेकेशीसूत्रे; मु–सत्याषाढहिरण्य° ९. श्रौबा१–पंचमस्य १०. श्रौबा२, इ, भां १, बा, आ १–२–°चतृषु; म १–२–ततश्च त्रिषु ११. म १–३– साकं सूर्यस्य १२. भां २–नास्ति

नस्य । अयजुष्केण वत्सानपाकरोतीत्येकेषाम् ।।४[1]।। सायँ हुतेऽग्निहोत्रे गृहमेधीयस्य तन्त्रं प्रक्रमयति ।।५।। तत्र[2] यावत् क्रियते तद्[3] व्याख्यास्यामः ।।६।। अग्नीनन्वाधाय वेदं कृत्वाग्नीन् परिस्तीर्य पाणी प्रक्षाल्योलपराजीँ[4] स्तीर्त्वा[4] यथार्थं पात्राणि प्रयुनक्ति ।।७।। कुम्भीं[5] तिस्रश्च पात्रीः[6] ।।८।। निर्वपणकाले[7] मरुद्भ्यो गृहमेधिभ्यः प्रभूतान् व्रीहीन् निर्वपति यावत् पयो मन्यते ।।९।। पवित्रे[8] गां दोहयति ।।१०।। न[9] तण्डुलानुत्पुनाति यजुरुत्पूतेनैतेन[10] पयसा श्रपयतीत्येकेषाम् ।।११।। दक्षिणाग्नौ प्रतिवेशमोदनं पचति ।।१२।। स्फ्यमादाय स्तीर्णाया वेदेर्लोमभ्योऽधि स्तम्बयजुर्हरति ।।१३।। उत्तरं परिग्राहं परिगृह्य संप्रैषेण प्रतिपद्यते ।।१४।। यदन्यदिध्माबर्हिषः[11] पत्नीसंनहनाच्च तत्[12] संप्रेष्यति[13] ।।१५।। यत् प्रागाज्यग्रहणात् तत् कृत्वा ध्रुवायामेव गृह्णाति ।।१६।। प्रोक्षणीरभिमन्त्र्य ब्रह्माणमामन्त्र्य वेदिं प्रोक्ष्य[14] प्रोक्षण्यवशेषं[15]

---

४. **तैसं** १.८.४ 'मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे'; **शब्रा** २.५.३.४ 'शाखया वत्सानपाकृत्य'. **गोपीनाथः** – यजमानस्य सर्वान् वत्सानपाकरोति. **वाञ्छेश्वरः** – यजमानस्य यावन्तो वत्सास्तान् सर्वानपाकरोतीत्यन्वयः.

५. **तैसं** १.८.४ 'सायं चरुम्'. **गोपीनाथः** – तन्त्रशब्देन कर्मकलाप उच्यते.

६. **गोपीनाथः** – तत्र यावत् क्रियते तद् व्याख्यास्याम इत्येतावतैव सिद्धे तन्त्रं प्रक्रमयतीत्यधिकवचनमध्वर्युविषय एवास्मिन् कर्मण्यपूर्वत्वं न होतुर्विषय इत्येतादृशार्थं ज्ञापयितुम्.

९. **तैसं** १.८.४ 'मरुद्भ्यो गृहमेधिभ्यः'.

१०. **शब्रा** २.५.३.४ 'पवित्रवति सन्दोह्य तं चरुं श्रपयति'. **गोपीनाथः** – शाखापवित्रं कुम्भ्यां प्रागग्रं निदधाति। पवित्रेण गां दोहयतीति पवित्रदोहशब्दाभ्यामितरधर्माणां परिसंख्यानां निवृत्तिः.

११. **वाञ्छेश्वरः** – यजुरुत्पूतेन समन्त्रकोत्पवनसंस्कृतेन एतेन पूर्वसूत्रोक्तसर्वगवां दुग्धेन श्रपयतीत्येकेषां मतं स्वमते पयसोऽप्युत्पवनं नास्तीत्याशयः.

१२. **तैब्रा** १.६.७ 'प्रतिवेशं पचेयुः'; **कासं** ३६.९ 'अपि प्रतिवेशमोदनं पचेत'.
गोपीनाथः – दक्षिणाग्नौ प्रतिवेशमोदनं पत्नी तूष्णीं पचति। गृहस्य यदग्रतो गृहान्तरं स प्रतिवेशः तत्सादृश्याद् गार्हपत्यस्याहवनीयस्य च दक्षिणाग्निः प्रतिवेशः तत्र पच्यमान ओदनो गृहमेधीयस्य प्रतिवेशः इत्युपचर्यते. **वाञ्छेश्वरः** – गृहस्याग्रभागे यत् गृहान्तरं तत् प्रतिवेश इत्युच्यते तत्सादृश्याद् गार्हपत्याहवनीययोर्दक्षिणाग्निः प्रतिवेश इत्युच्यते। पत्नीप्राशनार्थं तत्र पच्यमान ओदनो गृहमेधीयस्य प्रतिवेश इत्यर्थः.

१३. **शब्रा** २.५.३.५ 'सैव स्तीर्णा वेदिर्भवति या मरुद्भ्यः सान्तपनेभ्यः'. **गोपीनाथः** – वेदेः स्तीर्णत्वपक्षे न वेदिसंमार्जनम्.

१५. **तैब्रा** १.६.६ 'यन्नेध्माबर्हिर्भवति'.

१६. **तैब्रा** १.६.६ 'न प्रयाजा इज्यन्ते नानूयाजाः'.

---

१. मु–२–४ इत्येषामेकमेव सूत्रम् २. भां १–यत्र ३. भां१, म१–तावद् ४. वैश्रौबा, म १–३–ँजीस्तीर्त्वा ५. म३–कुम्भी ६. इ–पात्रीं; म १, ३–पात्रो; म २–पात्रीयो ७. वै, टि–नास्ति ८. एवं म १–३; मु–पवित्रेण ९. म १–नास्ति १०. एवं श्रौबा १–२, भां १, अ, डे, आ १–२; भां २– °त्पूतेनैवतेनैव; म १–३–ँत्पूतैनैकेन; वै, मु–ँत्पूतेनैव ११. म ३–अन्यदिध्मा° १२. म १– नास्ति १३. इ–प्रेष्यति १४. वैअ, वैआ१–नास्ति १५. वैअ, वैआ१–२, गो–प्रोक्षणीशेषं; म १–प्रोक्षाण्यवशेषं; मु–प्रोक्षणावशेषं

निनीय पवित्रे अपिसृज्य[1] ध्रुवाँ स्रुवं च सादयति ।।१७।। **एषासदत्**[2] इति[2] मन्त्रँ संनमति ।।१८।। **विष्णवसि वैष्णवं धाम**[3] **प्राजापत्यम्** इत्याज्यमभिमन्त्रयते ।।१९।।

[८]

यदानीकवतस्य[4] बर्हिस्तत् सान्तपनीयस्य[5] तद् गृहमेधीयस्य तत् स्तीर्णमेवेत्येकेषाम् ।।१।। उद्वासनप्रभृतीनि कर्माणि प्रतिपद्यते ।।२।। शृतस्य हविषः शरमुध्दृत्य प्रज्ञातं निधाय ।।३।। पात्रीषूपस्तीर्य[6] त्रीनोदनानुध्दृत्यानिष्कासितां[7] कुम्भीं निदधाति ।।४[8]।। अनिमृष्टं[9] दर्व्युदायुवनमवधाय[10] ।।५।। अभिघार्योत्पूयालंकृत्यौदनानासादयति[11]।।६।। ओदासु देवतास्वग्निमुपवाज्याज्यभागाभ्यां[12] प्रचर्य ।।७।। जुह्वामुपस्तीर्य सर्वेभ्य ओदनेभ्यः[13] समवदायाभिघार्य **मरुद्भ्यो गृहमेधिभ्योऽनुब्रूहि मरुतो गृहमेधिनो यज** इति संप्रेष्यति ।।८।। स्विष्टकृत् प्राशित्रमिडा च क्रियते[14] ।।९।। प्राशितायाममात्येभ्य ओदनानुपहरन्ति[15] ये हविर्भोजना भवन्ति ।।१०[16]।।

---

१७. **शब्रा** २.५.३.६ 'स्रुवं च स्रुचं चासादयति'.

१. **वाञ्छेश्वरः** – तच्च बर्हिस्तीर्णमेव वेद्यां स्तृतमेव न तु तत्तदिष्टचनन्तरं निष्कास्य पुनस्तृतमित्येकेषां मतम्. 'स्तीर्णाया वेदेः' (**हिश्रौ** ५.८.१३) इति वचनेन 'तस्तीर्णमेव' इति सूत्रकाराणामेव स्वीयं मतं कथम् 'एकेषाम्' इत्युक्तमस्मिन् सूत्रे.

४. **तैब्रा** १.६.७ 'इन्द्राय निष्कासं निदध्यात्'; **शब्रा** २.५.३.१६ 'अथैतामनिरशितां कुम्भीमपिधाय निदधाति'. **वाञ्छेश्वरः** – पात्रत्रयेऽप्योदनभागत्रयमुध्दृत्यानिष्कासितां निष्कासेन शेषेण रहितां कुम्भीं चरुपात्रं निदधाति.

६. **शब्रा** २.५.३.६ 'अथैता ओदनावासादयति'. **वाञ्छेश्वरः** – तंडुलानामनुत्पूतत्वाद् ओदनानामेवोत्पवनं कुर्यादित्यर्थः.

७. **तैब्रा** १.६.६ 'न सामिधेनीरन्वाह. . .आज्यभागौ यजति'.

८. **तैब्रा** १.६.६ 'मरुतो गृहमेधिनो यजति'; **शब्रा** २.५.३.९ 'मरुद्भ्यो गृहमेधिभ्योऽनु ब्रूहि . . . मरुतो गृहमेधिनो यज'.

९. **तैब्रा** १.६.६ 'अग्निँ स्विष्टकृतं यजति'; **मैसं** १.१०.१५ 'इडामुपह्वयन्ते'.

१०. **शब्रा** २.५.३.१६ 'उपहूय प्राश्नन्ति । यावन्तो गृह्या हविरुच्छिष्टाशाः स्युस्तावन्तः प्राश्नीयात्'.

---

१. म १, ३– अविसृज्य; म २–विसृज्य   २. वैअ, म १–२–°सदिति; म ३–एषसदतामिति   ३. म३– धामासि   ४. म १–२–यदनीक°   ५. श्रौबा २, इ, भां १, आ १–२, म १–३, टि–सांतपनस्य   ६. म ३– वा त्रिषूपस्तीर्य   ७. एवं श्रौबा १–२, इ, भां १, बा, अ, डे, आ १–२; भां २–°ध्दृत्यात्यनिनिष्का°; म १–२–°ध्दृत्यनिष्कसितां; म ३–°ध्दृत्यनिष्कृपितां; वै, गो, मु–°द्धरति निष्का°   ८. मु–सूत्रद्वयं यथा–°द्धरति ।। ।। निष्कासितां   ९. म २–अनिर्मृष्टं   १०. म१–चर्वोदनं दर्वीदायुवनंवदाय; म २–३–दर्व्योदनं दर्व्युदायुवनमवदाय   ११. म १–३–°दनान्यासादयतीति   १२. भां२–°ग्निमुखवाज्यभागाभ्यां°; म १–°ग्नीध्रपवाज्या°; म २–°ग्नीमुप°   १३. वै, टि–नास्ति   १४. एवं बहुषु लिखितपुस्तकेषु; भां१, श्रौबा २, आ १–२, मु–त्रियन्ते   १५. म १–°नुपवहन्ति   १६. मु–९–१० इत्यनयोरेकमेव सूत्रम्

प्रतिवेशपक्वस्य पत्न्यश्नाति ।।११।। इडान्तो गृहमेधीयः संतिष्ठते ।।१२।। आञ्जतेऽ-भ्यञ्जतेऽनु[1] वत्सान् वासयन्ति ।।१३।। प्रतिवेशाश्च पचन्ते ।।१४।। गाश्च घ्नते ।।१५।। सुहिता[2] एतां रात्रिं वसन्ति प्रतीता[3] अनर्वातिमुखिनः[3] ।।१६।। पराचीन-रात्रेऽभिवान्यवत्साया[4] अग्निहोत्र्याश्च[4] वत्सौ बध्नाति ।।१७।। पुरा प्रातरग्नि-होत्रात् पूर्णदर्व्येण[5] चरन्ति[6] ।।१८।। दर्व्यामुपस्तीर्य शरनिष्कासस्य[7] दर्वीं पूरयित्वा निमृष्टं[8] दर्व्युदायुवनमवदायाभिघार्य[9] ।।१९।। **पूर्णा दर्वि** इत्यनुद्रुत्यर्षभमाहूय **देहि मे** इति तस्य[10] रवते[10] गार्हपत्ये जुहोति ।।२०।। यदृषभो न रुयाद्[11] ब्रह्माणमामन्त्र्य तेनानुज्ञातो जुहुयात् ।।२१।। मरुद्भ्यः क्रीडिभ्यः पुरोडाशं सप्तकपालं निर्वपति साकं सूर्येणोद्यता । साकं रश्मिभिः प्रचरन्तीत्येकेषाम् ।।२२।। [९]

---

११. **तैब्रा** १.६.७ 'यत् पत्नी गृहमेधीयस्याश्नीयात् . . . यन्नाश्नीयात् . . . प्रतिवेशं पचेयुः तस्याश्नीयात्'. द्र. **हिश्रौ** ५.८.१२.

१२. **तैब्रा** १.६.६ 'इडान्तो भवति'.

१३. **तैब्रा** १.६.७ 'आञ्जतेऽभ्यञ्जते । अनुवत्सान् वासयन्ति'.

१४. **तैब्रा** १.६.७ 'आशिता भवन्ति'. **गोपीनाथः** – बहुवचनं व्यञ्जनपरम्. **वाञ्छेश्वरः** – प्रतिवेशाश्च प्रतिवेशे महानसे विद्यमानाः पाचकाः प्रतिवेशाः तेऽपि सर्वेषाममा (त्या) दीनां मृ(मि)ष्टान्नभोजनार्थं यथाकामं भक्ष्यादीनि कुर्वन्तीत्यर्थः

१५. **गोपीनाथः** – गाश्च घ्नत इति युगान्तरविषयं न कलौ युगे धर्मशास्त्रस्य निषेधात्.

१६. **वाञ्छेश्वरः**–अर्वातिशब्दो वेदे दारिद्र्यपरत्वान्मुखशब्देन तत्कार्यं वचनं लक्ष्यते । न विद्यते अर्वातिर्येषां तानि अनवर्तीनि तादृशानि मुखानि येषां ते अनर्वातिमुखिनः दारिद्र्ययुक्तवचन-रहिताः परित्यक्तकार्पण्यवादा इत्यर्थः.

१८. **शब्रा** २.५.३.१७ 'अथ प्रातर्हुते वाहुते यतरथा कामयते'.

१९. **मैसं** १.१०.१६ 'यद्दर्व्या जुहोति'; **शब्रा** २.५.३.१७ 'दर्व्योपहन्ति'. **गोपीनाथः** – शरं निष्कासं च दर्व्यामवधाय निमृष्टं दर्व्युदायुवनलेपं चावधाय. **वाञ्छेश्वरः**–शरनिष्कासस्य तृतीयार्थे षष्ठी । शरेण पूर्वोक्तेन निष्कासेन स्थालीदर्व्युदायुवनलेपेन दर्वीं पूरयित्वा.

२०. **तैब्रा** १.६.७ 'गार्हपत्ये जुहोति. . .ऋषभमाह्वयति'; **शब्रा** २.५.३.१७-१८ 'पूर्णा दर्वि. . . इति यथा पुरोनुवाक्यैवमेषा. . . . स यदि रुयात्. . . .स जुहोति देहि मे. . . . स्वाहेति'.

२१. **शब्रा** २.५.३.१८ 'यद्यु न रुयाद् ब्राह्मण एव दक्षिणत आसीनो ब्रूयात् जुहुधीति'.

२२. **तैसं** १.८.४ 'मरुद्भ्यः क्रीडिभ्यः पुरोडाशं सप्तकपालं निर्वपति साकं सूर्येणोद्यता'; **मैसं** १.१०.१ 'मरुद्भ्यः क्रीडिभ्यः साकं रश्मिभिः'; **मैसं** १.१०.१६, **कासं** ३६.१० 'साकं रश्मिभिः प्रचरन्ति'.

---

१. म ३–आंजतेऽनु २. म १–संहिता ३. म१–प्रतिशाश्च पचन्ते गाश्च अनिवर्तमुखिनं; म २–प्रतीना अनिवर्त–; म ३–प्रतीता अनवत्तिमुखिनः ४. म १–°त्रे हिवान्यवत्सायान्यवत्सायान्यग्निहोत्रीयाश्च; म २–°त्रे हिवान्यवत्साया अग्निहोर्त्रीयाश्च ५. भां २, टि–पूर्णा°; अ–पूर्वा°; डे–पौर्ण°; म १–पूर्णे°; म२–पूर्ण. . .; म ३– °दर्वेण ६. एवं केषुचिल्लिखितपुस्तकेषु; वैआ १–२–प्रचरन्ति; म ३–चरति; वैश्रौबा, वैअ, मु–प्रचरन्ति ७. श्रौबा१, भां १, अ, डे, आ२, टि–शरनिष्कासेन ८. म १–निर्मृष्य; म २–निर्मृष्टच; म ३– निर्मार्ष्टि ९. गो– °वधाया; म१–दर्व्यादायुवनं वदा° १०. म१–२–तस्यावटे; म ३–तस्य रवे ११. वैश्रौबा, अ, डे–ब्रूयाद्

तदानीमेव महाहविर्भिर्यजते ॥१॥ तेषां वारुणप्रघासिकेनोत्तरेण[1] विहारेण कल्पो व्याख्यातः ॥२॥ पञ्च संचराणि निरुप्यैन्द्राग्नमेकादशकपालं निर्वपत्यैन्द्रं[2] चरुं वैश्वकर्मणमेककपालम् ॥३॥ असँसृष्टमैन्द्राग्नमवहृत्य[3] तस्य प्रज्ञाताँस्तुषान् निदधाति ॥४॥ कार्त्तिक्यां यथाषाढ्यामेवं पृषदाज्यं गृह्णाति मार्गशीर्ष्यां तु यथा श्रावण्याम्[4] ॥५॥ **अग्ने वेर्होत्रं वेर्दूत्यमूर्ध्वो अध्वरेष्ठा अवतां त्वा द्यावापृथिवी**[5] **अव त्वं**[6] **द्यावापृथिवी**[5] **अव स्विष्टकृदिन्द्राय देवेभ्यो भव जुषाणो अस्य हविषो घृतस्य वीहि स्वाहा** इति स्रुच्यमाघारयति[7] ॥६॥ **सहश्च सहस्यश्च** इति चतुर्भिर्मासिनामभिरेककपालमभिजुहोति **सहसे स्वाहा सहस्याय स्वाहा** इति वा ॥७॥ **इदावत्सरीणाँ स्वस्तिमाशास्ते दिव्यं धामाशास्ते** इति सूक्तवाकस्याशीष्षु[8] होतानुवर्तयति ॥८॥ ऐन्द्राग्नतुषैश्चावभृथमवयन्ति[9] ॥९॥ गमनसंयुक्तं तुषप्रतिपादनं च[10] क्रियते ॥१०[11]॥ [१०]

॥ इति हिरण्यकेशिसूत्रे[12] पञ्चमप्रश्ने[13] तृतीयः पटलः ॥

तदानीमेव महापितृयज्ञेन यजते ॥१॥ दक्षिणतः पुरस्ताद्दक्षिणाग्नेर्यजमान-

---

१. **शब्रा** २.५.३.२० 'अथातो महाहविषः'. **वाञ्छेश्वरः** –महाहविष्ट्वं च तेषां तत्रैव पञ्चसंचराम्नानात् मासनामादिधर्मोपदेशाच्च.

२. द्र. **हिश्रौ** ५.४.९.

३. **तैसं** १.८.४ 'ऐन्द्राग्नमेकादशकपालमैन्द्रं चरुं वैश्वकर्मणमेककपालम्'; **तैब्रा** १.६.७ 'एतद् ब्राह्मणान्येव पञ्च हवींँषि'; द्र. **शांब्रा** ५.७, **गोब्रा** २.१.३३.

५. द्र. **हिश्रौ** ५.५.१९-२०.

६. **कासं** ९.५ 'अग्ने वेर्होत्रं वेर्दूत्यमूर्ध्वोऽध्वरेऽस्था अवतां त्वा द्यावापृथिवी अव त्वं द्यावापृथिवी स्विष्टकृदिन्द्राय देवेभ्यो भव जुषाणो अस्य हविषो घृतस्य वीहि स्वाहा'; **कासं** ३६.१० 'अग्ने वेर्होत्रं वेर्दूत्यमित्याघारमाघारयति'; द्र **मैसं** १.१०.२.

७. **तैसं** १.४.१४ 'सहश्च सहस्यश्च तपश्च तपस्यश्च'; **मैसं** १.३.१६ 'सहसे त्वा सहस्याय त्वा'; द्र. **कासं** ४.७, **वासं** ७.३०.

८. **तैब्रा** १.४.१० 'तस्मात् साकमेधैर्यजमानः । इदावत्सरीणाँ स्वस्तिमाशास्त इत्याशासीत'.

९. **वाञ्छेश्वरः**–न्वोवसारणे (चावधारणे) ऐन्द्राग्नतुषैरेवावभृथमवयन्ति.

---

१. भां १, म १–२–वरुण° २. इ–ऐन्द्रं ३. भां१– °मपहृत्य; अ, डे– ऐन्द्राग्नमसँसृष्टमवहृत्य; म १–संसृष्टमै° ४. म१–३–श्रवणायाम् ५–५. म १–नास्ति ६. भां१–त्वया ७. एवं बहुषु लिखितपुस्तकेषु; मु– स्रुच्यमाघारमाघारयति ८. इ–°शिष्पु; भां २–°शीःषु; म १–°कस्य; म २–°कस्या– ९. एवं श्रौवा १, भां २, अ, डे; मु–°तुषैरवभृथ° १०. वै, टि–नास्ति ११. मु–९–१० इत्यनयोरेकमेव सूत्रम् १२. एवं श्रौवा२, इ, अ, डे; श्रौवा१, वैश्रोवा, वा, भां १– हिरण्यकेशीसूत्रे; मु– सत्याषाढहिरण्य° १३. श्रौवा १–पंचमस्य

मात्रीं चतुरस्रां[1] वेदिं करोति ॥२॥ तस्याः प्रतिदिशँ स्रक्तयो[2] भवन्ति ॥३॥ अवान्तरदेशातनुमध्यानि[3] ॥४॥ सर्वत्र देवप्रवादमन्त्रं[4] देवपितृवत् संनमति यथा **पृथिवि देवपितृयजनि[5], देवानां पितृणां[6] परिषूतमसि, देवपितृर्बर्हिर्मा त्वान्वङ्‌मा-तिर्यक्, कर्मणे वां देवेभ्यः पितृभ्यः शकेयम्** इति ॥५[7]॥ उद्धननान्तं कृत्वा सर्वतः परिश्रित्योत्तराँ स्रक्ति[8] द्वारं कृत्वा ॥६॥ दक्षिणाग्नेरङ्गारानाहृत्य मध्ये[9] वेदेर्न्युप्योपसमादधाति ॥७॥ एषोऽत्राहवनीयः[10] ॥८॥ आहवनीयं गार्हपत्यं दक्षिणाग्निं चान्वाधायेध्मावर्हिराहरति[11] ॥९॥ द्राघीयः प्रकृतात्[12] समूलं बर्हिर्दा-त्युपमूललूनं[13] वा ॥१०॥ द्वौ परिधी सर्वान् वोपसंनह्यति[14] ॥११॥ पात्रसँ-सादनकाले यथार्थं पात्राणि प्रयुनक्ति ॥१२॥ सोमाय पितृमते षट् कपालानि[15] पितृभ्यो बर्हिषद्भ्यो धानार्थं कपालं पितृभ्योऽग्निष्वात्तेभ्यो मन्थार्थं वारणं[16] पात्रँ शरावं वा[17] ॥१३[18]॥ निर्वपणकालेऽध्वर्युर्दक्षिणतः शकटमारुह्य प्राचीनावीती[19] यवान् निर्वपति ॥१४॥ उत्तरतो वा यज्ञोपवीती[20] ॥१५॥ सोमाय पितृमते पुरो-

---

२. **तैब्रा** १.६.८ 'इमां दिशं वेदिमुद्धन्ति...चतुःस्रक्तिर्भवति'; **तैसं** ६.१.१ 'देवमनुष्या दिशो व्यभजन्त प्राचीं देवा दक्षिणा पितरः'; **मैसं** १.१०.१७ 'न प्राच्युद्धति...न दक्षिणा...उभे दिशा अन्तरोद्धन्ति'; द्र. **कासं** ३६.१२.

४. **गोपीनाथः**–अवान्तरदेशान् प्रति तनूनि मध्यानि. **वाञ्छेश्वरः**–महादिक्षु स्रक्तयः कोणा भवन्ति अवान्तरदेशा न तु कोणदिशः प्रति मध्यमानि वेदिमध्यमानि.

५. **वाञ्छेश्वरः**–देवानां प्रवादो वाचकस्तथाभूतं मन्त्रम्.

६. **तैब्रा** १.६.८ 'परिश्रयति'. **वाञ्छेश्वरः** – उद्धननान्तं कृत्वा खननं न कुर्यात्.

७. **तैब्रा** १.६.८ 'मध्यतोऽग्निराधीयते'; **मैसं** १.१०.१७, **कासं** ३६.१२ 'ओदनपचना-दग्निमाहरन्ति'; **शब्रा** २.६.१.११ 'तन्मध्येऽग्निँ समादधाति'.

१०. **तैब्रा** १.६.८ 'वर्षीयानिध्म इध्माद् भवति...समूलं भवति'; **मैसं** १.१०.१७ 'उपमूललूनं बर्हिर्दाति'; **कासं** ३६.१२ 'उपमूलं बर्हिर्दाति'.

११. **तैब्रा** १.६.८ 'यत् त्रीन् परिधीन् परिदध्यात्। मृत्युना यजमानं परिगृह्णीयात्... द्वौ परिधी परिदधाति'; **शब्रा** २.६.१.१६ 'स दक्षिणैव परिधीन् परिदधाति'.

१४-१५. **तैब्रा** १.६.८ 'दक्षिणतः प्राचीनावीती निर्वपति...अनादृत्य तत्। उत्तरत एवोपवीय निर्वपेत्'; **शब्रा** २.६.१.८ 'स जघनेन गार्हपत्यं प्राचीनावीती भूत्वा

---

१. एवं केषुचिल्लिखितपुस्तकेषु; वैंआ १–२, वैंअ, म १, ३, गो, मु–चतुरश्रां; म२–चतुर्णां २. म १–२–श्रेयो ३. एवं भां२, गो, टि; म १–२–°देशाननुमध्यमानि; म३–°देशानां मध्यमानि; मु–°देशात्तनुमध्यानि ४. इ–°मन्त्रे; अ, डे–°मन्त्रैर्दे°; म ३–°मन्त्रा ५. म १–२–°पितृन् यजन्निति यथा पृथिवीदेवपितृन् यजति; म ३–°पितृन् यजनिति ६. एवं लिखितपुस्तकेषु; मु– पितृणां ७. मु–सूत्रद्वयं यथा–संनमति ॥ ॥ यथा ८. म१–२–सृक्ति ९. म१–२–नास्ति १०. म१–२–°हवनीयो यतः प्रणीयते सर्वगार्हपत्यः; म ३– °हवनीयो यतः प्रणयति स गार्हपत्यः ११. मु–°न्वाधाय इत्यत्र सूत्रच्छेदः १२. एवं श्रौबा १–२, वैंश्रौबा, भां १–२, इ, बा, अ, डे, वैंअ, म १, टि; म २–३, मु–प्राकृतात् १३. म ३–बर्हिर्ददात्यु° १४. म३–श्चोपसंनह्यति १५. म१–कपालं १६. श्रौबा १, भां १–२, डे, आ १–२– वारण; म १–२– वारुणं १७. भां२–नास्ति १८. मु–सूत्रद्वयं यथा–कपालम् ॥ ॥ पितृभ्यो° १९. वैंश्रौबा–°वीति २०. वैंश्रौबा–°वीति

डाशं षट्कपालं निर्वपत्याज्यं[1] वा[1] ॥१६॥ पितृभ्यो बर्हिषद्भ्यो धानाः पितृभ्योऽग्निष्वात्तेभ्यो मन्थं यमाय मन्थमित्येकेषाम् ॥१७॥ प्रोक्षण्युद्रेकेण यवान् संयुत्यावहन्ति[2] ॥१८॥ त्रिष्फलीकृतेषु विभागमन्त्रेण षट्कपालमपच्छिद्य पिनष्टि ॥१९॥ दक्षिणार्धे गार्हपत्यस्य[3] षट् कपालान्युपधाय[4] प्रथमेन कपालमन्त्रेण दक्षिणाग्नौ[5] भर्जनार्थं[6] कपालमुपदधाति ॥२०॥ षट्कपालमधिश्रित्याधिश्रयणमन्त्रेणोप्य[7] धाना[7] भर्जयति ॥२१॥ अनुपदह्यमानाः परिशेरते ॥२२॥ [११]

अखाता वेदिर्भवति[8] ॥१॥ उत्तरं परिग्राहं परिगृह्य संप्रैषेण प्रतिपद्यते ॥२॥ यदन्यत् पत्नीसंनहनात् तत्[9] संप्रेष्यति ॥३[10]॥ न पत्नीं संनह्यति नान्वास्ते गृहेष्वासीनाज्यमवेक्षते[11] ॥४॥ यत् प्रागाज्यग्रहणात् तत् कृत्वा प्रतिहृत्य[12] गार्हपत्य आज्यानि गृह्णाति ॥५॥ सर्वाणि चतुर्गृहीतानि द्विर्वोपभृति ॥६॥ प्रोक्षणीरभि-

---

दक्षिणासीन एतं षट्कपालं पुरोडाशं गृह्णाति'. **गोपीनाथः**—शकटमारुह्येत्यनुवादः । न तु विधिः पक्षान्तरव्यावृत्त्यर्थः । तेन शकटाभावे पात्रीपक्षोऽप्यत्र भवति । यवग्रहणं व्रीहिनिवारणार्थम्. **वाञ्छेश्वरः**—प्रकृतितो विकल्पेन प्राप्तानां यवानां नियमार्थं यवग्रहणम्.

१६. **तैसं** १.८.४, **तैब्रा** १.६.८ 'सोमाय पितृमते पुरोडाशं षट्कपालं निर्वपति'; **कासं** ९.६ 'सोमाय पितृमत आज्यम्'.

१७. **तैसं** १.८.४ 'पितृभ्यो बर्हिषद्भ्यो धानाः पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थम्'; द्र. **तैब्रा** १.६.८. **वाञ्छेश्वरः** – पितृभ्योऽग्निष्वात्तेभ्यो मन्थं दुग्धमिश्रसक्तूनां मन्थ इति संज्ञा.

१८. द्र. **हिश्रौ** ५.५.६.

१९. **गोपीनाथः**—गृहेष्वासीना पत्नी त्रिष्फलीकरोति । गृहेष्वासीना पत्नी पिनष्टि.

२०. **शब्रा** २.६.१.५ 'अन्वाहार्यपचने धानाः कुर्वन्ति'.

२१. **तैब्रा** १.६.८ 'बहुरूपा धाना भवन्ति'. **गोपीनाथः**—कपालस्थानामेव धानानां यथा दाहो न भवति तथा पाकविशेषेण दग्धा अदग्धा ईषद्दग्धा इत्येवंप्रकारेण बहुरूपा नानारूपास्ताः करोति.

१. **तैब्रा** १.६.८ 'अखाता वेदिर्भवति'; द्र. **हिश्रौ** ५.११.६.

२. **शब्रा** २.६.१.१२ 'उत्तरेण परिग्रहेण परिगृह्य प्रतिमृज्याऽह प्रोक्षणीरासादयेति'.

४. **तैब्रा** १.६.९ 'न पत्न्यन्वास्ते'; **काशब्रा** १.६.१ 'नात्र पत्नीं संनह्यति'. **वाञ्छेश्वरः**—प्रयोगकाले पत्नी समीपे न तिष्ठेदित्यर्थः । तर्हि पत्नीकर्तव्याज्यावेक्षणादीनां लोपः स्यादित्यत आह गृहेष्वेव तिष्ठन्ती आज्यावेक्षणं कुर्यात् तदतिरिक्तं पत्नीकर्तृकं सर्वं निवर्तते.

५. **शब्रा** २.६.१.१२ 'स यज्ञोपवीती भूत्वाज्यानि गृह्णाति'.

६. **शब्रा** २.६.१.१३. 'तदाहुर्द्विरुपभृति गृह्णीयात्...अष्टावेव कृत्व उपभृति गृह्णीयात्'.

---

१. म १–२–°पतिज्यं वा; म ३– °र्वपति २. वैआ १– यवांत्सयु°; म १–संयुनक्त्यावहन्ति; म२–संयुक्त्यावहति ३. म १–२–गार्हपत्ये ४. म१–°न्युपनिधाय; म ३–°न्युपदधाति ५. डे, वैआ, टि–नास्ति ६. वै, डे, टि–धानार्थं; अ, बा, टि–धाना भर्जनार्थं, म १– वर्जनार्थं ७. म १–°णाप्याधानलाजांश्च; म २–°णणोप्या धानालाजांश्च; म३–धानालाजांश्च ८. म १–२–वेदीति ९. म२–नास्ति १०. मु–१–३ इत्येषां सूत्रद्वयं यथा– परिगृह्य ॥ ॥ संप्रैषेण ११. एवं बहुषु लिखितपुस्तकेषु; वै, मु–गृहेष्वेवा° १२. म १–२–प्रतिगृह्य; म ३–प्रत्यग्

मन्त्र्य ब्रह्माणमामन्त्र्येध्मं वेदिं बर्हिश्च[1] प्रोक्ष्य[2] प्रोक्षण्यवशेषं निनीय पवित्रे अपिसृज्य ।।७।। अग्रेषु बर्हिर्गृहीत्वा त्रिः प्रसव्यमग्निं[3] धून्वन् पर्येति ।।८।। औध्र्वः[4] प्रस्तरस्तं[5] धारयमाणस्त्रिरधून्वन्[6] प्रतिपर्येति ।।९[7]।। द्वौ परिधी सर्वान् वा परिदधाति ।।१०।। प्रतिषिद्धे विधृती तूष्णीं प्रस्तरं न्यस्यति ।।११।। उद्वासनप्रभृतीनि कर्माणि प्रतिपद्यते ।।१२[8]।। यत् प्रागलंकरणात् तत् कृत्वा विभागमन्त्रेण धाना विभज्य पिष्टानामावृताधर्धान्[9] सक्तून् कृत्वा ।।१३[10]।। अभिवान्यवत्सायै दुग्धे वारणे[11] पात्रेऽर्धशरावे वेक्षुशलाकया दक्षिणासीनोऽन्वारभमाणस्त्रिः[12] प्रसव्यं मन्थमुपमन्थति ।।१४।। [13]शलाकास्तम्बं मन्थं करोति[13] ।।१५[14]।। दक्षिणाग्ने-

---

७. **शब्रा** २.६.१.१४ 'प्रोक्षणीरध्वर्युरादत्ते । स इध्ममेवाग्रे प्रोक्षति । अथ वेदिमथास्मै बर्हिः प्रयच्छन्ति. . .तत् प्रोक्ष्य उपनिनीय '. **गोपीनाथः**–अन्तर्वेदि पुरोग्रन्थीत्यादि प्रत्युक्षतीत्यन्तस्य इध्मं वेदिं बर्हिः प्रोक्ष्य प्रोक्षण्यवशेषं निनीयेति ल्यप्स्वारस्यात् गुरुसूत्रस्वारस्याच्च तस्य निवृत्तिरेव युक्ता । अन्यथा गुरुसूत्रकरणं व्यर्थं स्यात्. **वाञ्छेश्वरः**–प्रयोगसंधानार्थमनुवदति प्रोक्षणीरित्यादि.

८. **तैब्रा** १.६.८ 'दक्षिणा स्तृणाति. . .त्रिः पर्येति '; **कासं** ३६.१२ 'समन्तं बर्हिस्स्तृणन् पर्येति '; **शब्रा** २.६.१.१४–१५ 'विस्रंस्य ग्रन्थिं न प्रस्तरं गृह्णाति. . .अपलसलवि त्रिः परिस्तृणन् पर्येति '.

९. **शब्रा** २.६.१.१५ 'त्रिः परिस्तीर्य यावत् प्रस्तरभाजनं तावत् परिशिनष्टि । अथ पुनः प्रसलवि त्रिः पर्येति '.

१०. द्र. **हिश्रौ** ५.११.११.

११. **तैब्रा** १.६.८ 'यत् प्रस्तरं यजुषा गृह्णीयात्. . .यन्न गृह्णीयात्. . .तूष्णीमेव न्यसेत्'; **शब्रा** २.६.१.१६ 'दक्षिणा प्रस्तरं स्तृणाति । नान्तर्दधाति विधृती '.

१४. **तैब्रा** १.६.८ 'अभिवान्यायै दुग्धे भवति. . .अर्ध उपमन्थति . . . एकयोपमन्थति. . . दक्षिणोपमन्थति. . .अनारभ्योपमन्थति'; **मैसं** १.१०.१७ 'यदेष मन्थः. . .दक्षिणासीना उपमन्थति. . .इक्षुशलाकयोपमन्थति'; **कासं** ३६.११ 'अभिवान्यवत्साया दुग्धे भवति'. **गोपीनाथः**–अभिवान्यवत्साया अर्धशरावं दुग्धं वारणपात्रे शरावे वानीय कृष्णाजिनात् तस्मिंस्तूष्णीं सक्तूनोप्य इक्षुशलाकया रज्वा व्यवधानं त्रिरप्रदक्षिणं दक्षिणामुख आसीनो मन्थति. **वाञ्छेश्वरः**–अन्वारम्भं कुर्वन् शलाकामपरित्यजन्नित्यर्थः.

१५. **गोपीनाथः**– शलाकया स्तम्वं मूलं मन्थं मन्थाकारं करोतीत्यर्थः । मन्थनेन दुग्धे सक्तून् मिश्रयति । तन्मिश्रितं मन्थाख्यं हविर्भवति । तं इक्षुशलाकास्तम्बं मन्थं तस्मिन् मन्थ एव निदधाति.

---

१. **वै**, गो–बर्हिः २. एवं बहुषु लिखितपुस्तकेषु; वैश्रौबा, मु–नास्ति ३. म १– प्रसव्य; म २–पसव्यं; म ३–प्रसव्यं ४. **वै**, म १–३–औध्र्वं ५. भां १, म १–३–प्रस्तरं ६. भां१, म१, ३– धारयमाणंस्त्रिरवधून्वन्; म२– °माणस्त्रिरवधून्वन् ७. मु–७–९ इत्येषां सूत्रद्वयं यथा– गृहीत्वा ।। ।। त्रिः ८. मु–११–१२ इत्यनयोरेकमेव सूत्रम् ९. वैश्रौबा, वैअ, म ३, टि– °र्धाः; म १– °र्धा; म २–°धास् १०. मु–सूत्रद्वयं यथा– कृत्वा ।। ।। विभागमन्त्रेण ११. गो–वारण; म१–३–वारुणे १२. एवं बहुषु लिखितपुस्तकेषु; भां१–दक्षिण आसीनो°; म ३–°नारम्भमा°; म १–२, मु–°नारभ° १३–१३. म १–२–नास्ति; म३–शलाकाया त्रिर्मन्थति करोति १४. मु–१४–१५ इत्यनयोरेकमेव सूत्रम्

रेकोल्मुकं धूपायत् पराचीनमपरेण गार्हपत्यमत्याहृत्याग्रेणाहवनीयं[1] पर्याहृत्य[1] दक्षिणेनाहवनीयमन्तर्वेदि निदधाति ।।१६।। अलंकृत्यैकैकश आज्यानि हवींषि चासादयति ।।१७।। तद्दक्षिणत[2] आञ्जनमभ्यञ्जनं[3] कशिपूपबर्हणमुदकुम्भं च प्रतिष्ठापयति ।।१८।। यज्ञोपवीतं कुरुते[4] यदि प्राचीनावीती[5] भवति[5] ।।१९।। **अग्नये देवेभ्यः पितृभ्यः समिध्यमानायानुब्रूहि** इति संप्रेष्यति ।।२०।। **उशन्तस्त्वा हवामहे** इत्येतां सामिधेनीं[6] त्रिरन्वाह ।।२१।। त्रैधमिध्मं प्रतिविभज्य[7] सर्वमादधाति[8] ।।२२।। ओढासु देवतास्वग्निमुपवाज्य स्रुवाघारमाघार्य **अग्नीत्** [9]**परिधी चाग्निं च**[9] **त्रिस्त्रिः संमृड्ढि** इति संप्रेष्यति ।।२३।। संमृष्टे प्रवरं प्रवृणीते ।।२४।। [१२]

सीद[10] होतः[10] इत्यतावान् प्रवरः ।।१।। अपबर्हिषः प्रयाजान् यजति

वाञ्छेश्वरः – शलाकायां यथा मन्थस्तिष्ठति तथा शलाकां शरावे क्षिप्त्वा क्षिप्त्वा मन्थतीत्यर्थः.

१६. द्र. **हिश्रौ** २.७.

१७. **तैब्रा** १.६.८ 'यत् त्रीणि त्रीणि हवींष्युदाहरेयुः . . . एकैकमनूचीनान्युदाहरन्ति'; **शब्रा** २.६.१.१७ 'स तत्र जुहूमासादयति । अथ पूर्वामुपभृतमथ ध्रुवामथ पुरोडाशमथ धाना अथ मन्थम् । आसाद्य हवींषि संमृशति'. **गोपीनाथः**–धाना अलंकरोति यथा सर्वा धानाः स्निग्धा भवन्ति तथा । तथैव मन्थम्.

१८. **तैब्रा** १.६.८ 'कशिपु कशिपव्याय । उपबर्हणमुपबर्हण्याय । आञ्जनमाञ्जन्याय । अभ्यञ्जनमभ्यञ्जन्याय'. **गोपीनाथः**–ततो हविषां दक्षिणतः कज्जलात्मकमञ्जनं मस्त्वात्मकाभ्यञ्जनं तैलात्मकं वाभ्यञ्जनं तूलिकारूपं कशिपु तूलवच्छिर उपधानमुपबर्हणमुदकपूर्णं कुम्भं च स्थापयति. **वाञ्छेश्वरः**–तद्दक्षिणत आसादितहविषां दक्षिणप्रदेशेऽञ्जनादीनि प्रतिष्ठापयति.

१९. **शब्रा** २.६.१.१८ 'ते सर्वं एव यज्ञोपवीतिनो भूत्वा'. **गोपीनाथः**–निर्वापप्रभृत्येतावत्पर्यन्तं प्राचीनावीतयज्ञोपवीतयोर्विकल्पोऽध्वर्योः.

२०. **तैब्रा** १.६.९ 'अग्नये देवेभ्यः पितृभ्यः समिध्यमानायानुब्रूहीत्याह'.

२१. **तैब्रा** १.६.९ 'एकामन्वाह. . .त्रिरन्वाह'.

२३. **तैब्रा** १.६.९ 'आघारावाघार्य'. **गोपीनाथः**–यदि द्वौ परिधी । त्रयो यथाप्रकृति प्रैषः. **वाञ्छेश्वरः**–परिधिद्वित्वे द्विवचनेनोहः .

१. **तैब्रा** १.६.९ 'नार्षेयं वृणीते न होतारम्'; **शब्रा** २.६.१.२३ 'अथाश्राव्य न होतारं प्रवृणीते . . . सीद होतरित्येवाह'. **वाञ्छेश्वरः**–वरणप्रकारमाह सीद होतरित्येतावान् प्रवर एवकारोऽध्याहार्यस्तथा च सीद होतरित्येतावानेव नाधिक इत्यर्थः.

---

१. श्रौबा२–गार्हपत्यमत्याहृत्य; म१–गार्हपत्यमन्वाहृत्या° २. एवं श्रौबा१, अ, भां२; मु–दक्षिणत ३. इ, म१–आंजनाभ्यंजनं ४. वैआ१–कुर्वते ५. वैश्रौबा–° वीति भवति; अ–यज्ञोपवीती भवति; वैआ १–२–°वीतानि भवन्ति ६. श्रौबा१, अ, डे, भां–सामिधेनीनाम् ७. म ३– विभज्य ८. श्रौबा १, डे, भां २–सर्वमिध्यमादधाति ९–९. एवं इ, वै, गो; म१–परिधींश्च अग्नींश्च; म२–परिधींश्चाग्नींश्च; मु–परिधीं श्चाग्निं च १०. भां १–सीदति होतः; म १–२–सीदति

॥२॥ नोपभृतं समानयते ॥३[1]॥ जीववन्तावाज्यभागौ[2] ॥४॥ ताभ्यां प्रचर्य ॥५॥ विस्रस्य यज्ञोपवीतानि प्राचीनावीतानि[3] कुर्वते[4] आज्यानि हवींषि च[5] विपरिहरन्ति ॥७॥ विपरिक्रामन्त्यृत्विजः[6] ॥८॥ दक्षिणतो जुह्वामुपभृतं सादयति[7] ॥९॥ दक्षिणत[8] उपभृतं[9] ध्रुवाम् ॥१०॥ दक्षिणतः पुरोडाशं धानाः सादयति ॥११॥ दक्षिणं धानाभ्यो मन्थम् ॥१२[10]॥ होताध्वर्युराग्नीध्रश्च दक्षिणा विपरिक्रामन्ति[11] ॥१३॥ उत्तरतो ब्रह्मा यजमानश्च ॥१४॥ समानत्र जुहूः षट्कपालश्च ॥१५॥ ब्रह्मयजमानौ[12] चेत्येकेषाम्[12] ॥१६॥ सर्वेभ्यो हविर्भ्यः[13] समवदायैकैकां देवतां[14] यजति ॥१७॥ जुह्वामुपस्तीर्य पुरोडाशादवदाय धानानामुप-

---

२. **तैब्रा** १.६.९ 'अपबर्हिषः प्रयाजान् यजति'.

४. **तैब्रा** १.६.९ 'आज्यभागौ यजति'; **शांब्रा** ५.७, **गोब्रा** २.१.२५ 'अथ यज्जीवनवन्तावाज्यभागौ'. **वाञ्छेश्वरः**—जीववन्तौ जीवपदयुक्तमन्त्रसाध्यावाज्यभागौ भवत इति शेषः । आ नो अग्ने सुचेतुना, त्वं सोम महे भगमिति मन्त्रद्वयसाध्याविति यावत्.

५. **शब्रा** २.६.१.२३ 'आज्यभागाभ्यां चरित्वा'.

६. **तैब्रा** १.६.९ 'प्राचीनावीती सोमं यजति'; **शब्रा** २.६.१.२४ 'ते सर्व एव प्राचीनावीतिनो भूत्वा'. **गोपीनाथः**—विस्रस्य ... कुर्वत इत्येतावतैव प्रधानविषये प्राचीनावीतित्वसिद्धे जीवनवन्तावाज्यभागौ ताभ्यां प्रचर्येति गुरुसूत्रकरणस्याज्यभागौ यजति यज्ञस्यैव चक्षुषी नान्तरेतीति श्रुतिसंनिधौ प्राचीनावीती सोमं यजतीति पाठात् । आज्यभागान्तर्गतसोमविषये प्राचीनावीतिता स्यात् सा मा भूदित्येतत् प्रयोजनं द्रष्टव्यम्.

८. **गोपीनाथः**—एतस्मिन् सूत्रे ऋत्विग्ग्रहणं यजमानस्याप्युपलक्षणम्.

९. **तैब्रा** १.६.९ 'दक्षिणतोऽवदाय । उदङ्ङतिक्रामति'. **वाञ्छेश्वरः**—विपरिहरणमेव स्पष्टप्रतिपत्त्यर्थमाह दक्षिणत इत्यादि स्पष्टम्.

१३–१४. **शब्रा** २.६.१.२४ 'हविर्भिः प्रचरिष्यन्त इत्थाद्यजमानश्च ब्रह्मा च पुरस्तात् परीतः पश्चादग्नीत्'.

१५–१६. **वाञ्छेश्वरः**—एकेषां शाखिनां समानत्र एकत्रैव जुहूः षट्कपालपुरोडाशो ब्रह्मयजमानौ च समानत्रेत्यन्वयः । तच्चतुष्टयातिरिक्तानामेव विपरिहार इति भावः.

१७. **तैब्रा** १.६.९ 'पञ्चकृत्वोऽवद्यति संततमवद्यति'; **शांब्रा** ५.७ 'त्रीणि वै हवींषि भवन्ति तेषां समवद्यति'.

---

१. मु–२–३ इत्यनयोरेकमेव सूत्रम् २. एवं बहुषु लिखितपुस्तकेषु ; म २– जीवस्ववत्तवा° ; वै, मु– जीवातुमन्तावा° ३. भां १– प्राचीनावीतीनि ; म १–२–नास्ति ४. म ३–कुर्वीत ५. वैअ–नास्ति ६. म१–विपाक्रामन् ऋ° ; म२–विपाक्रामन्त्यृ° ७. म १–२–सावंतदयति; म३–संसादयति ८. श्रौबा १–२, अ, भां १, म १–२, आ १–२, टि–दक्षिणाम् ९. श्रौबा २, भां१, आ १–२, टि–उपभृति ; म १–३–उपभृतौ १०. मु–११–१२ इत्यनयोरेकमेव सूत्रम् ११. म १–३–ँक्रामति १२. एवं सूत्रपुस्तकेषु ; वै, मु–ँमानावित्येकेषाम् १३. श्रौबा१, भां २, अ, डे–नास्ति १४. म १–२–नास्ति

संगृह्णीतेऽथ मन्थस्य ॥१८॥ द्विरभिघारयति चतुरवदानस्य त्रिः पञ्चावत्तिनः[1] ॥१९॥ **सोमाय पितृमतेऽनु स्वधा** इति संप्रेष्यति ॥२०॥ द्वे पुरोनुवाक्ये अन्वाहैकां[2] याज्याँ सप्रणवे स्याताम् ॥२१[3]॥ **परिधीँरपोर्णु** इत्युच्यमाने दक्षिणमुत्तरं[4] परिधिं मध्यम[5] उपसमस्यति[5] ॥२२॥ उदङ्ङतिक्रम्य **आ स्वधा** इत्याश्रावयति **अस्तु स्वधा** इति प्रत्याश्रावयति ॥२३॥ **सोमं पितृमन्तँ स्वधा** इति संप्रेष्यति **ये स्वधामहे** इत्यागूर्भवति **स्वधा नमः** इति वषट्करोति[6] ॥२४[7]॥ एतैनैव कल्पेन यथादेवतमुत्तराभ्यां[8] प्रचरति ॥२५॥ दक्षिणातिक्रम्य जुह्वामुपस्तीर्य धानानामवदाय पुरोडाशादुपसंगृह्णीतेऽथ मन्थस्य ॥२६॥ **पितृभ्यो बर्हिषद्भ्योऽनु स्वधा** इति संप्रेष्यति ॥२७॥ उदङ्ङतिक्रम्य **'आ स्वधा** इत्याश्रावयति **अस्तु स्वधा** इति प्रत्याश्रावयति ॥२८॥ **पितृन् बर्हिषदः स्वधा** इति संप्रेष्यति **ये स्वधामहे** इत्यागूर्भवति **स्वधा नमः** इति वषट्करोति ॥२९॥ दक्षिणातिक्रम्य[9] जुह्वामुपस्तीर्य

१८–१९. **शब्रा** २.६.१.२७ 'स उपस्तृणीत आज्यम् । अथास्य पुरोडाशस्यावद्यति स तेनैव सह धानानां तेन सह मन्थस्य तत् सकृदवदधाति । अथोपरिष्टाद् द्विराज्यस्याभिघारयति'.

२०. **तैब्रा** १.६.९ 'सोममग्रे यजति'; **मैसं** १.१०.१८ 'यत् सोमं पितृमन्तं यजति'.

२१. **तैब्रा** १.६.९ 'प्रैवेभ्यः पूर्वया पुरोनुवाक्ययाह प्रणयति द्वितीयया गमयति याज्यया'; **मैसं** १.१०.१८ 'द्वे वै देवानाँ याज्यानुवाक्ये ... अथात्र तिस्रः कार्याः'; **कासं** ३६.१३ 'द्वे अनुवाक्ये एका याज्या'; **शब्रा** २.६.१.२६ 'स द्वे पुरोनुवाक्ये अन्वाह'. **वाञ्छेश्वरः**–द्वे द्वे पुरोनुवाक्ये सर्वेषु यागेषु भवतः । अनुवाक्याद्वित्वे सति याज्याया अपि द्वित्वं स्यादित्यत आह एकां याज्यां ब्रूयादिति शेषः.

२२. **तैसं** २.६.१२ 'त्वया हि नः पितरः ... परिधीँरपोर्णु वीरेभिः ...'. **गोपीनाथः**–दक्षिणमुत्तरं परिधिं मध्यम उपसमस्यतीत्यस्मिन् सूत्रे चकारो भ्रष्टो ज्ञेयः । यदा तु परिधी तदा दक्षिण उत्तरतो वा परिधिर्मध्यमे परिधावुपसमानीय.

२३–२४. **तैब्रा** १.६.९ 'आ स्वधेत्याश्रावयति । अस्तु स्वधेति प्रत्याश्रावयति । स्वधा नम इति वष्ट्करोति'.

२५. **वाञ्छेश्वरः**–एतेनैव पुरोडाशोक्तप्रकारेणैव यथादेवतं तत्तद्यागीयदेवतामनतिक्रम्य.

२६. **तैब्रा** १.६.९ 'पितृन् बर्हिषदो यजति'; **शब्रा** २.६.१.२८ 'अथाह पितृभ्यो बर्हिषद्भ्योऽनु ब्रूहीति । स उपस्तृणीत आज्यमथासां धानानामवद्यति । स तेनैव सह मन्थस्य तेन सह पुरोडाशस्य । तत् सकृदवदधाति'. **गोपीनाथः**–यत्र कर्मोपयोगि दृष्टं सूत्रप्रयोजनं न लभ्यते तत्रादृष्टमपि सूत्रपाठस्य प्रयोजनं कल्पनीयमेव । अदृष्टार्थं सूत्रं पठित्वा.

---

१. वैश्रौबा, म १–३–पंचावर्तिनः २. एवं श्रौबा, वैश्रौबा, इ, भां२, अ, डे, वैअ, म १–३; आ १–२, वैआ १–२, गो, मु–हैकैंकां ३. मु–२०–२१ इत्यनयोरेकमेव सूत्रम् ४. श्रौबा२, इ, म१–३–°त्तरं च ५. एवं बहुषु लिखितपुस्तकेषु; वैआ २, मु–मध्यममुप°; श्रौबा२–मध्यमस्य उप°; म१–मध्यमध्यमर्धमुपसंनह्यति; म २–मध्यं मध्यम उपसंनह्यति ६. इ–वषट्कृत्य ७. मु–२३–२४ इत्यनयोः सूत्रद्वयं यथा–°स्वधेत्याश्रावयति ॥ ॥ अस्तु ८. एवं श्रौबा २, भां १–२, म १–३, बा, आ १–२, टि; श्रौबा १, इ, अ, डे–यथादैवत°; वै, गो, मु–उत्तराभ्यां. ९–९. म १–३–नास्ति

मन्थादवदाय पुरोडाशादुपसंगृह्णीतेऽथ धानानाम् ॥३०॥ **पितृभ्योऽग्निष्वात्तेभ्योऽनु स्वधा** इति संप्रेष्यति ॥३१॥ उदङ्ङतिक्रम्य **आ स्वधा** इत्याश्रावयति **अस्तु स्वधा** इति प्रत्याश्रावयति ॥३२॥ **पितृनग्निष्वात्तान् स्वधा**[1] इति[1] संप्रेष्यति **ये स्वधामहे** इत्यागूर्भवति **स्वधा नमः** इति वषट्करोति ॥३३॥ एतेनैव कल्पेनाग्निं[2] कव्यवाहनं[3] स्विष्टकृतं यजति ॥३४॥ दक्षिणातिक्रम्य जुह्वामुपस्तीर्य पुरोडाशादवदाय धानानामुपसंगृह्णीतेऽथ मन्थस्य ॥३५॥ **अग्नये कव्यवाहनाय स्विष्टकृतेऽनु स्वधा** इति संप्रेष्यति ॥३६॥ उदङ्ङतिक्रम्य **आ स्वधा** इत्याश्रावयति **अस्तु स्वधा** इति प्रत्याश्रावयति ॥३७॥ **अग्निं कव्यवाहनं स्विष्टकृतं स्वधा** इति संप्रेष्यति **ये स्वधामहे** इत्यागूर्भवति **स्वधा नमः** इति वषट्करोति ॥३८[4]॥ [१३]

मन्थमेके सौविष्टकृतं[5] समामनन्ति ॥१॥ न प्राशित्रमवद्यति ॥२॥ एवमेवेडामवद्यति ॥३॥ मन्थमिडामवद्यति[6] मन्थादिडामवद्यतीत्येकेषाम् ॥४॥ मन्थमवघ्राणार्थं[7] परिशिष्येडायां हविःशेषान् संक्लिश्य[8] ॥५[9]॥ **एतत्ते तत** इति तिसृषु[10] स्रक्तीषु त्रीन् पिण्डान् निदधाति[11] पूर्वाध्यायां दक्षिणाध्यायां

---

३०. **तैब्रा** १.६.९ 'पितृनग्निष्वात्तान् यजति'; **शब्रा** २.६.१.२९ 'अथाह पितृभ्योऽग्निष्वात्तेभ्योऽनु ब्रूहीति। . . . अथास्य मन्थस्यावद्यति। स तेनैव सह पुरोडाशस्य तेन सह धानानाम्। तत् सकृदवदधाति'.

३४. **तैब्रा** १.६.९ 'अग्निं कव्यवाहनं यजति . . . अथो यथाग्निं स्विष्टकृतं यजति.'

३५. **शब्रा** २.६.१.३० 'अथाह अग्नये कव्यवाहनायानुब्रूहीति। . . . अथास्य पुरोडाशस्यावद्यति। स तेनैव सह धानानां तेन सह मन्थस्य। तत् सकृदवदधाति.'

२–३. **शब्रा** २.६.१. ३३ 'तद्धैक एतमेव होत्रे मन्थमादधाति . . . यथा त्वेवेतरस्य यज्ञस्येडाप्राशित्रं समवद्यन्ति। एवमेवैतस्यापि समवद्येयुः'. **गोपीनाथः**–प्रधानयागेष्वपूर्वोऽवदानधर्मः। तद्वदिडायामपि। इडावदाने एवमेवेति वचनाद् बोध्यते। प्रधानयागवदत्रापि द्वितीयावदानस्य निवृत्तिः. **वाञ्छेश्वरः**–एवमेवाग्निष्वात्तदेवताकमन्थद्रव्यकयागक्रमेणैवेत्यर्थः.

४. **गोपीनाथः**–मन्थादिडामवद्यतीति पक्षे यजमानभागः। मन्थमिडामेवावद्यतीति पक्षे न यजमानभागः। यद्येकदेवत्यो मन्थः मन्थादिडामवद्यतीति पक्षश्च तदा चतुर्धाकरणम्। यदि तु मन्थमिडामेवावद्यतीति पक्षः एकदेवत्यश्च मन्थस्तदा चतुर्धाकरणमपि न. **वाञ्छेश्वरः**–एकेषामाचार्याणां मन्थादिडावदानं न तु कृत्स्नस्य मन्थस्यावदानमित्यर्थः.

५. **गोपीनाथः**–सर्वहविःशेषसकाशात् मन्थपरिशेषमवघ्राणार्थं पृथक्कृत्य निदध्यात्। ततोऽवशिष्टायामिडायां पात्रगतान् हविःशेषान् संमेलयित्वा मृदूकृत्य. **वाञ्छेश्वरः**–अवघ्राणार्थं मन्थमवशेष्य इडायामिडापात्रे हविःशेषान् पुरोडाशादीन् संक्लिश्य एकीकृत्य मर्दयित्वा.

---

१. श्रौबा१–नास्ति २. वैअ–अग्निं; म १–एतेनैवेत्यागूर्भवति स्वधा नम इति वषट्करोति दक्षिणे कल्पेनाग्निं; म २– एतेनैव त्यागूर्भवति स्वधा नम इति वषट्करोति दक्षिणा कल्पेनाग्नि ३. वैआ २–नास्ति ४. मु–२६–३८ इत्येतेषामेकमेव सूत्रम् ५. एवं बहुषु लिखितपुस्तकेषु; म १–सास्विष्ट°; म २–सौस्विष्ट°; म ३–स्वौविष्टि°,वै, मु–स्विष्ट° ६. म १–२–नास्ति ७. भां १–°मवजिघ्राणार्थं ८. एवं श्रौबा१–२, भां१–२, आ१–२; वैश्रौबा, वैअ–संप्रक्लिष्य; इ. बा, म १–२, वैआ १–२, टि–संप्रश्लिष्य, मु–संश्लिष्य ९. मु–सूत्रद्वयं यथा–परिशिष्य ॥ ॥ इडायां १०. म २–सृष्टस्य ११. भां १–ददाति

पश्चाध्यर्यायाम्[1] ।।६[2]।। लेपमुत्तरस्यां[3] निर्माष्टि ।।७।। **अत्र पितरो यथाभागं मन्दध्वम्** इत्युक्त्वोदञ्चो निष्क्रामन्ति ।।८।। तत [4]आहवनीयमुपायन्ति ।।९।। **सुसंदृशं त्वा वयम्** इत्याहवनीयमुपतिष्ठन्ते[4] ।।१०।। आतमितोऽस्तिष्ठन्ति[5] ।।११।। **अक्षन्नमीमदन्त हि** इति गार्हपत्यमुपतिष्ठन्ते ।।१२।। **अक्षन् पितरोऽमीमदन्त पितरः** इति प्रतिपद्यन्ते[6] ।।१३।। मन्थं होतावजिघ्रत्यथाध्वर्युरथ ब्रह्माथाग्नीध्रोऽथ यजमानः ।।१४[7]।। मन्थं[8] होतावघ्रायान्तर्वेदि[9] निनयतीत्येकेषाम् ।।१५।। उदकुम्भमादाय[10] **अया[10] विष्ठा जनयन् कर्वराणि** इति त्रिः प्रदक्षिणं परिषिञ्चन् पर्येति ।।१६।। निधाय कुम्भं त्रिरपरिषिञ्चन्[11] प्रतिपर्येति[12] ।।१७।।

६–७. **तैब्रा १.६.९** 'एतत्ते तत ये च त्वामन्विति तिसृषु सक्तीषु निदधाति'; **मैसं १.१०.१८** 'त्रिर्निदधाति ... सर्वासु स्रक्तिषु निदधाति ...नामुष्यां निदधाति... अथ यत् तस्यां निमार्ष्टि'; द्र. **कासं ३६.१३.**

८. **तैब्रा १.६.९** 'अत्र पितरो यथाभागं मन्दध्वमित्याह... उदञ्चो निष्क्रामन्ति'; **मैसं १.१०.१९** 'अत्र पितरो मादयध्वमित्युक्त्वा परायन्ति'.

९–११. **तैब्रा १.६.९** 'आहवनीयमुपतिष्ठन्ते ... आतमितोरुपतिष्ठन्ते । सुसंदृशं त्वा वयमित्याह'; **मैसं १.१०.१९** 'त आहवनीयमुपतिष्ठन्ते सुसंदृशं त्वा वयमिति । आतमितोस्तिष्ठन्ति'; **कासं ३६.१३** 'त आहवनीयमुपायन्ति सुसंदृशं त्वा वयमिति । त आतमितोस्तिष्ठन्ति'.

१२. **तैब्रा १.१०.१९** 'अक्षन्नमीमदन्त हीति गार्हपत्यमुपतिष्ठन्ते'.

१३. **शब्रा १.६.९** 'अमीमदन्त पितरः सोम्या इत्यभिप्रपद्यन्ते'.

१४. **शब्रा २.६.१.२३** 'तं होतोपहूयावैव जिघ्रति तं ब्रह्मणे प्रयच्छति तं ब्रह्मावैव जिघ्रति तमग्नीधे प्रयच्छति तमग्नीदवैव जिघ्रति'. **गोपीनाथः**—इडागतस्य हविःशेषस्य मन्थव्यतिरिक्तस्य पिण्डेषु विनियोगदर्शनात् मन्थमात्रस्यावघ्राणार्थे परिशेषणविधानाच्च पुरोडाशसंबन्धिशेषस्य धानासंबन्धिशेषस्य वचनादवघ्राणभक्षणमपि. **वाञ्छेश्वरः**—मन्थग्रहणमितरेषां पुरोडाशादीनामप्युपलक्षणं तेन सर्वेडानामवघ्राणमेव न भक्षणमिति बोध्यम्.

१५. **महादेवः**—नान्येऽवजिघ्रन्ति. **गोपीनाथः**—अवघ्रातस्यैकशेषस्यान्तर्वेदि प्रक्षेपणं होतुरेव नान्येषाम् । अन्यैस्तु बहिर्वेदि प्रक्षेपणं कर्तव्यमित्यर्थसिद्धम् । इतरेषामवघ्राणं नास्तीति व्याख्यानं त्वसमञ्जसमेव. **वाञ्छेश्वरः**—एकेषामाचार्याणां मते होतैव मन्थमवघ्रायान्तर्वेदि निनयतीति मतम्.

१६–१७. **तैब्रा १.६.९** 'अपः परिषिञ्चति'; **कासं ३३.१३** 'पुनरपरिषिञ्चन् पर्येति...यदेतामनिरुक्तां प्राजापत्यामन्वाह अया विष्ठा जनयन् कर्वराणीति', द्र. **मैसं १.१०.१९**; **शब्रा २.६.१.३४** 'स उदपात्रमादाय अपसलवि त्रिः परिषिञ्चन् पर्येति'; **शब्रा २.६.१.४१** 'अथोदपात्रमादाय पुनः प्रसलवि त्रिः परिषिञ्चन् पर्येति'.

---

१. म १–पश्चिमाध्यर्यायां वा; म २–३–पश्चिमाध्यर्यायाम् २. मु–सूत्रद्वयं यथा– निदधाति ।। ।। पूर्वाध्यर्यायाम् ३. म१–ल्लेपनमुत्तरं; म२–ल्लेपमुत्तरं; म ३–ल्लेपमुत्तरार्धायां ४–४. वैआ २–नास्ति ५. श्रौबा१, भां१–°तिष्ठति; म १–३–°तिष्ठत् ६. श्रौबा २, भां १, आ २, म १–३–प्रपद्यन्ते ७. मु–सूत्रद्वयं यथा–°होतावजिघ्रति ।। ।। अथाध्वर्यु° ८. वै, गो–नास्ति ९. श्रौबा १–२, वैश्रौबा, बा, भां.१–२, अ, डे, आ १–२–°वजिघ्राया° १०. श्रौबा २, वैश्रौबा, भां २, डे–°मादाया ११. भां १– त्रिः परिषिंचन् १२. वैश्रौबा–पर्येति

अत्राञ्जनाभ्यञ्जने[1] वासोदानं नमस्कारानुत्थापनीयं[2] प्रवाहणीं[3] सँसाधनीं मनस्वतीं[4] पङ्क्तिप्राजापत्याश्च समामनन्ति यथा पिण्डपितृयज्ञे[5] ॥१८[6]॥ व्यवच्छादयन्ति[7] परिश्रितम् ॥१९॥ संप्रसारयन्ति[8] परिधीन्[9] ॥२०॥ विस्रस्य प्राचीनावीतानि यज्ञोपवीतानि कुर्वते[10] ॥२१[11]॥ आज्यानि[12] विपरि-हरन्ति ॥२२॥ विपरिक्रामन्त्यृत्विजः ॥२३॥ अपबर्हिषावनूयाजौ यजति[13] **देवौ यज**[14] इति पूर्वमनूयाजँ संप्रेष्यति **यज** इत्युत्तरम् ॥२४॥ सूक्तवाकं प्रति होता निवीतं[15] कुरुते ॥२५॥ न[16] पत्नीः संयाजयन्ति न समिष्टयजुर्जुहोति सर्वमन्यत् क्रियते ॥२६॥ [१४]

॥ इति हिरण्यकेशिसूत्रे[17] पञ्चमप्रश्ने चतुर्थः पटलः ॥

रौद्राँस्त्रैयम्बकान् प्रतिपूरुषमेककपालान् निर्वपति ॥१॥ यावन्तो यजमा-

---

१८. द्र. **हिश्रौ** २.७.

१९. **गोपीनाथः**–बहुवचनं परिकर्म्यृत्विजामन्यतमप्राप्त्यर्थम् । एतेन कर्तृनियमः सिद्धो भवति.

२१. **शब्रा** २.६.१.४३ 'ते सर्वे एव यज्ञोपवीतिनो भूत्वा अनुयाजाभ्यां प्रचरिष्यन्तः'.

२२. **गोपीनाथः**–जुह्वामाज्यं नास्ति तथापि संस्रावरूपमाज्यमस्त्येव । हवींषि च विपरिहरन्ति हवींषि पात्रसहिततत्तद्धविर्लेपानित्यर्थः. **वाञ्छेश्वरः**–आज्यान्याज्यधारणार्थाः स्रुचः विपरिहरन्ति पूर्ववैपरीत्येन स्थापयन्ति.

२३. **शब्रा** २.६.१.४३ 'इत्थाद्यजमानस्य ब्रह्मा च पश्चात् परीतः पुरस्तादग्नीत् उपविशति होता होतृषदने'.

२४. **तैब्रा** १.६.९ 'अपबर्हिषावनूयाजौ यजति'. **वाञ्छेश्वरः**–देवौ यज यजेति प्रथमानुयाज-संप्रैषं ब्रूयाद् द्वियजत्वायेति पूर्वमुक्तम् । यजेत्युत्तरमनूयाजं संप्रेष्यतीत्यन्वयः.

२६. **तैब्रा** १.६.९ 'न संयाजयन्ति'; द्र. **शांब्रा** ५.७, **गोब्रा** २.१.२५. **गोपीनाथः**–पत्न्याः विहारं प्रत्यागमनाभावेऽपि अनालंभुकावत् संपत्नीयहोमो भवत्येव । न समिष्टयजुर्जुहोति सर्वमन्यत् क्रियत इति वचनाद् यदि यजमानभागोऽस्ति तदा मन्त्रेण अवजिघ्रेण भक्षयति । ब्रह्मभागसत्त्वे ब्रह्मा स्वमन्त्रेण तथैवाभिजिघ्रति. **वाञ्छेश्वरः**– पत्नीसंयाजाभावेऽपि स्रुचौ स्फ्ये सादयित्वा तदर्थं पश्चाद् गच्छत्येवाध्वर्युः संपत्नीयं च पत्न्या विना जुहोति . . . समिष्टयजुरभावेऽपि बर्हिः प्रह्रियते.

१. **तैसं** १.८.६ 'प्रतिपूरुषमेककपालान् निर्वपति'; द्र. **तैब्रा** १.६.१०; **मैसं** १.१०.२० 'यदेते त्र्यम्बकास्तेनैवास्य रुद्रा अभीष्टा भवन्ति'; **कासं** ३६.१४ 'अनभीष्टा रुद्रा-स्त्र्यम्बकाः . . . ते वै रौद्रा भवन्ति'.

---

१. इ–अत्राभ्यंजनाभ्यंजने ; वैआ २–ंजनेभ्यंजने ; म ३–आंजना° २. वैअ–ंत्थायाहवनीयं ३. म १–प्रवाह-नीयम् ; म २–प्रवाहणीयम् ४. भां १–नास्ति ; म १–मनस्पतीं ५. भां १–ंयज्ञेन ६. मु–सूत्रद्वयं यथा–समामनन्ति ॥ ॥ यथा ७. श्रौबा २, भां १, वैअ, आ १–२, म १–ंदयति ८. वैअ–°रयति ९. म १–२–परिधी १०. म ३–कुर्वीत ११. मु–'प्राचीनावीतानि' इत्यन्तमेकं सूत्रं 'यज्ञोपवीतानि' इत्यारभ्य कन्डिकान्तमपरं सूत्रम् १२. एवं बहुषु लिखितपुस्तकेषु ; वै, गो, मु–आज्यानि हवींषि च १३. म १–२–यजन्ति १४. भां १–नास्ति १५. म १–२–निवीतीं १६. म १–तेन ; वैआ १–नास्ति १७. एवं इ, अ, डे ; श्रौबा १–२, भां १, बा–हिरण्यकेशी° ; मु–सत्याषाढहिरण्य°

नस्य प्रेष्यामात्या:[1] सस्त्रीकास्तत एकाधिकान्[2] ।।२।। तूष्णीमुपचरिता भवन्ति ।।३।। दक्षिणार्धे गार्हपत्यस्य श्रप्यन्ते[3] ।।४।। तानभिघार्यानभिघार्य वा ।।५।। मूते मूतयोर्मूतेषु कोशापिधाने[4] वोद्वास्य ।।६।। दक्षिणाग्नेरेकोल्मुकं धूपायत् पराचीनमपरेण गार्हपत्यमत्याहृत्याग्रतो[5] हरन्ति ।।७।। **यावन्तो गृह्याः स्मः** इति गार्हपत्यमुपतिष्ठन्ते[6] ।।८।। उत्तरपूर्वमवान्तरदेशं गच्छन्ति[7] ।।९।। **आखुस्ते रुद्र पशुः** इति व्रजन्नेवाखूत्कर एकं पुरोडाशानामुपवपति[8] ।।१०।। चतुष्पथ[9] एकोल्मुक-

---

२. **तैब्रा** १.६.१० 'एकमतिरिक्तम्'; **कासं** ३६.१४ 'एकोऽधि भवति'. **गोपीनाथः**– पुरोडाशानां संख्या करम्भपात्रसंख्यावद् द्रष्टव्या.

३. **गोपीनाथः**–एतस्मादिदमवगम्यतेऽत्र यावन्तः पुरोडाशमात्रसंयोगिनः पदार्था वैशेषिकाणि कर्माणि च तावतामेवानुष्ठानम्. **वाञ्छेश्वरः**–सर्वमेव तन्त्रं तूष्णीकं भवति । तत्र यावन्तः पुरोडाशसंयुक्ता पदार्था होमाश्च तावन्त एव क्रियन्ते यथा विहृत्याग्नीन् परिस्तरणानाहृत्य वेदं कृत्वाग्नीन् परिस्तीर्य पाणी प्रक्षाल्य पुरोडाशपात्राणि स्रुवाज्यस्थाल्यौ च प्रयुज्य पवित्रे कृत्वा पात्राणि संमृश्य प्रोक्ष्य निर्वापादीनि.

५. **तैब्रा** १.६.१० 'नाभिघारयति । यदभिघारयेत् । अन्तरवचारिणँ रुद्रं कुर्यात्'; **शब्रा** २.६.२.६ 'ते वा अक्ताः स्युः . . . त उ वा अनक्ता एव स्युः'. **वाञ्छेश्वरः**– यदभिघारयेत्यादि निषेधेनं चोदकप्राप्तस्याभिघारणस्य वैकल्पिकत्वादिति भावः.

६. **शब्रा** २.६.२.७ 'तान्त्साधँ पात्र्याँ समुद्वास्य'. **गोपीनाथः**–धानाद्यावापनार्थं गुंफिततृणपुञ्जो मूतः । कोशापिधानं नाम वस्त्रादिनिधानार्थो वेत्रादिमयः पेटकादिकोशः । तस्य यदपिधानपटलकं तत् कोशापिधानमित्युच्यते.

७. **तैब्रा** १.६.१० 'एकोल्मुकेन यन्ति'; **मैसं** १.१०.२०, **कासं** ३६.१४ 'धूपायद्धरन्ति'; **शब्रा** २.६.२.७ 'अन्वाहार्यपचनादुल्मुकमादाय'. **गोपीनाथः**–एकं च तत् उल्मुकं च एकोल्मुल्कम् । एकशब्दस्तु मुख्यार्थवाची एको मुख्यान्यकेवले इति कोशात् । मुखशब्दः प्रधानवाची । तथा च मुखाय प्रधानाय हितं मुख्यम् इत्यर्थो भवति । यदुल्मुकं प्रधानक्षमं तादृशमुल्मुकं ग्राह्यमिति निर्गलितोऽर्थः.

८. **गोपीनाथः** – अध्वर्युरेव गार्हपत्यमुपतिष्ठते । यदा तु बहुवचनान्तः पाठः तदा यजमानपत्न्यमार्त्यर्त्विजामप्युपस्थानम्.

९. **तैब्रा** १.६.१० 'इमां दिशं यन्ति'.

१०. **तैब्रा** १.६.१० 'असौ ते पशुरिति निर्दिशेद्यं द्विष्यात् . . . यदि न द्विष्यात् । आखुस्ते पशुरिति ब्रूयात्'; **मैसं** १.१०.२० 'एकमुपवपति', द्र. **कासं** ३६.१४. **वाञ्छेश्वरः**– मूषिकैर्बिलोध्दृतपांसुराशौ पुरोडाशानां मूतादुद्वासितानां मध्य एकं पुरोडाशमुपवपति.

---

१. एवं वैआ १–२, गो, टि; मु–अमात्याः २. भां २, म १–३–एकाधिकाः ३. म १–२–लिप्यन्ते ४. श्रौबा १, अ, वैआ १–२–कोशाभिधाने; म १–कोविधाने; म २–विधाने; म ३–वा कोशाभिधाने ५. इ–°मन्वाहुत्या°; म१–२–°त्याभूतो; म ३–गार्हपत्यमाहृत्याग्रतो ६. एवं बहुषु लिखितपुस्तकेषु; म १–°तिष्ठन्तम्; म २–द्वाभ्यामुपतिष्ठन्तम्; वै, मु–°तिष्ठते ७. भां १–२–गच्छति ८. एवं बहुषु लिखितपुस्तकेषु; म १–°नां पवपन्ति; म २–°वपन्ति; म ३–पुरोडाशमुपवन्ति; वै, गो, मु–पुरोडाशमुपवपति ९. म३ –चतुष्पथम्

मुपसमाधाय संपरिस्तीर्य ॥११॥ मध्यमेन पलाशपर्णेनान्तमेन[1] वा सर्वेभ्यः पुरोडाशेभ्यः[2] समवदायाभिघार्य **एष ते रुद्र भागः** इति जुहोति ॥१२॥ **भेषजं गवे** इति द्वाभ्यामुपतिष्ठन्ते ॥१३॥ प्रतिपूरुषं पुरोडाशानादाय **त्र्यम्बकं यजामहे** इति त्रिः प्रदक्षिणं चतुष्पथं परियन्ति[3] ॥१४[4]॥ तानूर्ध्वानुदस्य[5] **भगवः स्थ भगस्य वो लिप्सीय** इति प्रतिगृह्य परीत्य परीत्य[6] यजमानाय समावपन्ति ॥१५॥ यदि यजमानस्य दुहिता पतिकामा स्यात् सा विपरीयात्[7] ॥१६॥ **त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम्[8] । उर्वारुकमिव बन्धनादितो[9] मुक्षीय[9] मा पतेः** इति पतिकामा[10] जपति ॥१७॥ [१५]

[11]पूर्वयोः परिक्रमणयोर्यजमानाय समावपन्त्युत्तमे पतिकामायै[11] ॥१॥ तस्यामविद्यमानायां सर्वत्र[12] यजमानाय ॥२॥ तान् मूत[13] उपनह्य[14] परोग-

---

११. **तैब्रा १.६.१०** 'चतुष्पथे जुहोति'. **गोपीनाथः**–सं शब्दाद्बहुलदर्भैः परिस्तरणं न तु प्रतिदिशं दर्भसंख्यानियमः.

१२. **तैब्रा १.६.१०** 'मध्यमेन पर्णेन जुहोति. . .अन्तमेनैव होतव्यम्'; **शब्रा २.६.२.८** 'स सर्वेषामेवावद्यति'.

१४. **शब्रा २.६.२.१२** 'अथापसलवि त्रिः परियन्ति'. **गोपीनाथः**–सूत्रे आदायेत्येतदनन्तरं तिष्ठतीत्यध्याहारः । अन्यथा पुरोडाशादानेनाध्वर्युमात्रकर्तृकेन सह चतुष्पथपरिक्रमणस्य सर्वकर्तृत्वस्यान्वयानुपपत्तेः । तिष्ठतीत्यध्याहारे पुरोडाशादानमध्वर्युकर्तृकम्.

१५. **मैसं १.१०.२०** 'तानूर्ध्वानुदस्य प्रतिलभन्ते . . . तान् यजमानाय समावपन्ति . . .या पतिकामा स्यात् तस्यै समावपेयुः'; **कासं ९.७** 'भगस्स्थ भगस्य वो लप्सीय'. **गोपीनाथः**–प्रज्ञातं प्रज्ञातं यजमानाञ्जलौ समावपन्ति. **वाञ्छेश्वरः**–त्रिवारं परीत्य यजमानाय यजमानाञ्जलौ समावपन्ति स्थापयन्ति.

१६. **कासं ३६.१४** 'या पतिकामा स्यात् सापि परीयात्'. **गोपीनाथः**– यदि यजमानस्य दुहिता अविवाहिता चेत् सा विपरीयात् विपरीतं मन्त्रं ब्रूयादित्यर्थः. **वाञ्छेश्वरः**–यदि यजमानस्य दुहिता कन्या पतिकामा समीचीनं भर्तारं कामयेत तदा सापि कन्यापि परीयादनेनैव प्रकारेण परीत्य सर्वं कुर्यात्.

१७. **शब्रा २.६.२.१३** 'तासामुतासां मन्त्रोऽस्ति त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मामुत इति', द्र. **वासं ३.६०. गोपीनाथः**– अयं मन्त्रः परिक्रमणोत्तरजपे । अयमर्थः परिक्रम्य जपतीत्येतादृशसूत्राल्लभ्यते. **वाञ्छेश्वरः**–त्र्यम्बकमित्यादि मन्त्रं यजमानस्य कन्या पतिकामा जपति.

१–२. **गोपीनाथः**–तृतीयपर्याये यजमानाञ्जलौ नावपनं किं तु पतिकामाञ्जलावेव । अविवाहितदुहितृभावे तृतीयपर्याये यजमानाञ्जलावेव समावपनम्.

---

१. एवं बहुषु लिखितपुस्तकेषु; गो, मु–॰नान्तिमेन २. वै, टि–नास्ति ३. श्रौबा २, इ, भां १, बा, डे, आर२–पर्येति; अ–परिवपति; म१–३–पर्यन्ति ४. मु–सूत्रद्वयं यथा–॰नादाय ॥ ॥ त्र्यम्बकं ५. म १–॰र्ध्वा तु तस्य; म २–॰र्ध्वा तुदस्य ६. एवं बहुषु लिखितपुस्तकेषु; म१–२, वैआ १, भां २, मु–नास्ति ७. म१–विपर्यया; म २–विपरिया ८. इ, अ, म१–३–परिवेदनम् ९. एवं बहुषु लिखितपुस्तकेषु; अ–॰दिवो मुक्षीय; मु–॰नान्मृत्योर्मुक्षीय १०. एवं बहुषु लिखितपुस्तकेषु; श्रौबा २, म १–कामाः; वै, गो, मु–परिक्रम्य ११–११. वै, गो, टि–नास्ति १२. म १–नास्ति १३. म १–३–जुहुत १४. म १–उपसव्य; म २–उपनस्यह्य

व्यूतिं गत्वा वृक्ष आसजति[1] ।।३।। **एष ते रुद्र भागस्तं जुषस्व तेनावसेन परो मूजवतोऽतीह्यवततधन्वा पिनाकहस्तः कृत्तिवासोम्** इति त्रिरवताम्यन्ति ।।४।। अपः परिषिच्याप्रतीक्षमायन्ति[2] ।।५।। परोगोष्ठे[3] मार्जयन्ते ।।६।। **एधोऽस्येधिषीमहि** इत्याहवनीये समिधोऽभ्यादधति[4] ।।१७।। **अपो अन्वचारिषम्** इत्युपतिष्ठन्ते ।।८।। एवं पत्नी गार्हपत्येऽभ्याधायोपतिष्ठते ।।९।। प्रत्येत्यादित्यं घृते चरुं निर्वपति ।।१०।। श्वोभूते पौर्णमास्येष्ट्वोदवसायानुदवसाय[5] वा **प्रसूता देवेन सवित्रा** इत्युन्दति[6] ।।११।। **यो अस्याः पृथिव्यास्त्वचि निवर्तयत्योषधीरग्निरीशान ओजसा वरुणो धीतिभिः सहेन्द्रो मरुद्भिः सखिभिः सहाग्निस्तिग्मेन शोचिषा** इति निवर्तनं वापनं[7] यथा पुरस्तात् ।।१२[8]।। [१६]

।। इति हिरण्यकेशिसूत्रे[9] पञ्चमप्रश्ने[10] पञ्चमः पटलः ।।

ततो[11] द्व्यहे त्र्यहे चतुरहेऽर्धमासे मास ऋतौ चतुर्षु[12] वा मासेषु शुना-

---

३. **तैब्रा** १.६.१० 'मूते कृत्वा सजन्ति'; **मैसं** १.१०.२० 'तान् मूते कृत्वा वृक्ष आसञ्चति', द्र. **कासं** ३६.१४; **शब्रा** २.६.२.१७ 'उदङ परेत्य यदि वृक्षं वा स्थाणुं वा वेणुं वा वल्मीकं वा विन्देत् तस्मिन् आसजति'.

४. **वाञ्छेश्वरः**–यावच्छ्वासनिरोधेन श्रमो भवति तावच्छ्वासनिरोधं कुर्युः प्राणायामत्रयं कुर्वन्तीति यावत्.

५. **तैब्रा** १.६.१० 'अप्रतीक्षमायन्ति । अपः परिषिञ्चन्ति'.

६. **मैसं** १.१०.२० 'परोगोष्ठं मार्जयन्ते'.

७–८. द्र. **कासं** ३६.१४. **गोपीनाथः**– वारुप्रघासिकावभृथवत् समिदाधानम् ऋत्विजः यजमानः पत्नी च कुर्युः । नामात्याः कर्मसंबन्ध्यग्नौ बहिर्भूतामात्यकर्तृकसमिदाधानादि कर्मकर्तृत्वस्यायुक्तत्वात् । यदि समिधमादधातीत्येकवचनान्तः पाठस्तदा अध्वर्युर्यजमानो वा समिदभ्याधानं करोति. **वाञ्छेश्वरः**– एधोऽसीत्यादिनाहवनीये समिधोऽभ्याधायापोऽन्वचारिषमित्यादिना सर्वे उपतिष्ठेयुः.

१०. **तैब्रा** १.६.१० 'आदित्यं चरुं पुनरेत्य निर्वपति'; **मैसं** १.१०.२० 'आदित्यं घृते चरुं निर्वपति पुनरेत्य गृहेषु'. **गोपीनाथः**–सा च त्र्यम्बककर्माङ्गभूता एतच्च प्रत्येत्येति वचनाल्लभ्यते.

१२. द्र. **हिश्रौ** ५.३.१६.

---

१. इ–आसंजति; म १–३–आसज्य २. भां १–प्रतिषिच्या°; म ३–°च्याप्रत्यक्षमायन्ति ३. म १–परोगोष्ठं ४. एवं अ, डे, आ १–२; मु–°दधाति ५. एवं बहुषु लिखितपुस्तकेषु; इ–पौर्णमासेष्ट्वो°; म १, ३–°स्येष्ट्वोदवसाय वा; म २–°स्येष्ट्वोदवासाय वा; मु–पौर्णमासेनेष्ट्वो° ६. एवं बहुषु लिखितपुस्तकेषु; वैअ, म १–इत्युदंति; वैश्रौबा, आ १, मु–इत्युन्दन्ति ७. वैश्रौबा–वा वपनं ८. मु–११–१२ इत्यनयोरेकमेव सूत्रम् ९. एवं इ, अ, डे, श्रौबा १; भां १, श्रौबा २, बा–हिरण्यकेशी°; मु–सत्याषाढहिरण्य° १०. श्रौबा १–पंचमस्य ११. म १–२–नास्ति १२. म १–च त्रिषु ; म २–चतृषु

सीरीयेण[1] यजते ।।१।। तस्य वैश्वदेवेन कल्पो व्याख्यातः ।।२।। पञ्च संचराणि निरुप्यैन्द्राग्नं द्वादशकपालं निर्वपति वैश्वदेवं चरुमिन्द्राय शुनासीराय पुरोडाशं द्वादशकपालं वायव्यं[2] पयः सौर्यमेककपालम् ।।३।। वायव्या[3] यवागूः प्रतिधुग्वा ।।४।। इन्द्राय शुनासीराय पुरोडाशं द्वादशकपालमुत्तममेके समामनन्ति ।।५[4]।। **सँसर्पोऽस्यँहस्पत्याय त्वा** इत्युत्तमेन[5] मासनाम्नैककपालमभिजुहोति[5] ।।६।। **अनुवत्सरीणाँ स्वस्तिमाशास्ते दिव्यं धामाशास्ते** इति सूक्तवाकस्याशीष्षु[6] होतानुवर्तयति **संवत्सरीणाम्**[7] इति वा ।।७।। अपरपक्षे समस्यन्[8] स्वकाले[9] पौर्णमास्येष्ट्वोदवसायानुदवसाय[10] वा **प्रसूता**[11] **देवेन सवित्रा** इत्युन्दति[12] ।।८।। **एकं**

---

१. **शब्रा** २.६.३.१०-११ 'स यत्रैव साकमेधैर्यजते तच्छुनासीर्येण यजेत ... तस्माद् यदैव कदा चैतेन यजेत । तद्धैके रात्रीरापिपयिषन्ति स यदि रात्रीरापिपयिषेद् यददः पुरस्तात् फाल्गुन्यै पौर्णमास्या उद्वृष्टम्'; **तांब्रा** १७.१३.१५ 'ततश्चतुर्षु मासेषु शुनासीर्यस्य लोके ज्योतिष्टोमोऽग्निष्टोमः'.

२. **शांब्रा** ५.८ 'यद् वैश्वदेवस्य तन्त्रं तत् तन्त्रम्'. **वाञ्छेश्वरः**–तस्य शुनासीरीयस्य परिभाषया वैश्वदेवप्रकृतिकत्वे सिद्धेऽपि पुनर्वैश्वदेवेनेत्यादिवचनं कल्पान्तरोक्तमहाहविःकल्पातिदेशनिरासार्थम्.

३. **तैसं** १.८.७ 'ऐन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुमिन्द्राय शुनासीराय पुरोडाशं द्वादशकपालं वायव्यं पयः सौर्यमेककपालम्'; **तैब्रा** १.७.१ 'एतद् ब्राह्मणान्येव पञ्च हवीँषि'.

४. **मैसं** १.१०.१ 'वायव्या यवागूः प्रतिधुग् वा'; **कासं** १५.२ 'वायवे नियुत्वते पयो वा यवागूर्वा'.

५. **वाञ्छेश्वरः**–उत्तमं सर्वानन्तरं सौर्यैककपालोत्तरमिति यावत् । समामनन्त्येक आचार्याः.

६. **तैसं** १.४.१४ 'सँसर्पोऽस्यँहस्पत्याय त्वा'. **गोपीनाथः**–अँहस्पत्याय त्वा इति एतद्यन्मन्त्रगतं मासनाम तेनैककपालमभिजुहोतीत्यर्थः । मासनाम्नैककपालमभिजुहोतीत्येतावदुच्यमाने द्वयोर्मध्ये एकेन मासनाम्नैकाहुतिः । अन्यन्मासनाम विकल्पार्थम् । सँसर्प इत्येकं नाम अँहस्पत्य इत्यपरम् । मासास्तु त्रयोदशा एव । अतो द्वयोर्मासयोरभावादेकस्यैव मासस्य नामद्वयम् । द्वयोर्नाम्नोरेकत्र समावेशायोगादर्थाद् विकल्पे पर्यवसानमित्यर्थोऽपि संभाव्येत तद्वारणार्थमुत्तमवचनम् । अस्मिन् मन्त्रे एकमेव नाम चतुर्थ्यन्तमस्ति । पूर्वनाम तु तत्रैवाभेदेन स्तुतिप्रतिपादकम् ... । जुहोति सँसर्पोऽस्यँहस्पत्याय त्वा स्वाहा. **वाञ्छेश्वरः**–मासनाम्नेत्येकवचनादेकैवाहुतिः.

७. **तैब्रा** १.४.१० 'तस्माच्छुनासीरीयेण यजमानः । अनुवत्सरीणाँ स्वस्तिमाशास्त इत्याशासीत'.

८. **वाञ्छेश्वरः**–अपरपक्षे वा समस्वरन् स्वकाले वा समस्यन् पौर्णमास्येष्ट्वा.

---

१. म १–३–शुनासीर्येण २. म २–नास्ति ३. श्रौबा १, वैश्रौवा, बा–वायव्यां ४. मु–१–५ इत्येषामेकमेव सूत्रम् ५. म १–त्वेत्युत्तरमासनामेककपाल अभि°; म २–त्वेत्युत्तरमासनामैक°; म ३–त्वा इत्युत्तरमासानामेक° ६. श्रौबा १, बा, म २–°शीःषु; भां १–°शीःष्पु; इ–°षिःपु ७. एवं श्रौबा २, बा, इ, आ १, टि; म ३–इद्वत्सरीणाम्; मु–वत्सरीणाम् ८. भां २–समस्वरन् ९. श्रौबा १–२, इ, भां १, अ, आ १–२–स्वकालया; भां २, वैश्रौवा, वैअ–स्वकाले वा; म १–२–स्वकालयोः; म ३–स्वाकालयोः १०. म १–३ °ष्ट्वोदवसाय वा ११. म ३–प्रसूतो १२. एवं बहुषु लिखितपुस्तकेषु; वैआ १, म १–इत्युदन्ति; म २–३, आ १, मु–इत्युन्दन्ति

मासमुदसृजत् परमेष्ठी प्रजाभ्यस्तेनाभ्यो मह आवहदमृतं मर्त्याभ्यः प्रजामनु प्रजायसे तदु ते मर्त्यामृतं येन मासा अर्धमासा ऋतवः परिवत्सरा येन ते ते प्रजापत ईजानस्य न्यवर्तयन् तेनाहमस्य ब्रह्मणा निवर्तयामि जीवसेऽग्निस्तिग्मेन शोचिषा इति निवर्तनं वापनं[1] यथा पुरस्तात् ।।९[2]।। [१७]

संतिष्ठन्ते[3] चातुर्मास्यानि ।।१।। नैनमनीजान[4] सोमेन फाल्गुनी प्राप्नुयात् ।।२।। सोमाभावे पशुना ।।३।। पश्वभावे पुनःप्रयोगश्चातुर्मास्यानाम् ।।४।। वैश्वदेवेन पशुकामो यजेत यस्मिन्नस्य वसन्ते[5] भूयिष्ठं पयः स्यात् ।।५।। वैश्वदेवेन पशुकामो यजेत यावत् सहस्रं पशून् प्राप्नुयात् ।।६।। प्राप्ते सहस्रे स्वस्थानैरितरैर्यजते[6] ।।७।। शुनासीरीयेण[7] यजेत[8] ग्रामकामः प्रजाकामः पशुकामो[9] वृष्टिकामोऽन्नाद्यकामो[10] वा वर्ष्यमुदकमन्ववसाय तत उदकार्थान् कुर्वाणः ।।८।। पञ्चसंवत्सराणि[11] व्याख्यास्यामः ।।९।। तन्त्रं[12] पञ्चहोता वैश्वानरपार्जन्यौ च[13] ।।१०।। फाल्गुन्यां

---

९. द्र. **हिश्रौ** ५.३.१६.

१. **गोपीनाथः**–संतिष्ठते चातुर्मास्यानीत्यनेन शुनासीरीयान्तैव संस्था.

२. **शब्रा** २.६.३.१२ 'अथ दीक्षेत तं नानीजानं पुनः फाल्गुनी पौर्णमास्यभिपर्येयाताम् . . . इति नूत्सृज्यमानस्य'.

४. **शब्रा** २.६.३.१३ 'अथ पुनः प्रयुञ्जानस्य पूर्वेद्युः फाल्गुन्यै पौर्णमास्यै शुनासीर्येण यजेत। अथ प्रातर्वैश्वदेवेनाथ पौर्णमासेनैतदु पुनः प्रयुञ्जानस्य'. **गोपीनाथः**– पशुग्रहणमिष्ट्युपलक्षणम्। एतत्त्रितयान्यतमाकरणे पुनःप्रयोगः। एतान्यकृत्वैव पुनःप्रयोगोऽभ्यास इत्यर्थः. **वाञ्छेश्वरः**–पूर्ववत् पश्वनुष्ठानस्याप्यशक्तौ चातुर्मास्यानां पुनःप्रयोगः कार्य इति शेषः। न च पुनः क्रियमाणस्य चातुर्मास्यप्रयोगस्याङ्गतया पुनश्चातुर्मास्यान्तरप्रसक्तौ अनवस्था स्यादिति वाच्यम्। प्रथममनुष्ठीयमानस्याङ्गतया द्वितीयानुष्ठानेन तस्य द्वितीयस्य स्वतन्त्रफलसाधनत्वाभावेतिकर्तव्यताकाङ्क्षाभावाद् अनवस्थाया अप्रसक्तेः.

६. **मैसं** १.१०.८ 'वैश्वदेवेन यजेत पशुकामः'; द्र. **कासं** ३६.३.

७. **मैसं** १.१०.८ 'न वरुणप्रघासैर्न साकमेधैः . . . स यदा सहस्रं पशून् गच्छेदथ वरुणप्रघासैर्यजते'; द्र. **कासं** ३६.३.

८. **मैसं** ४.३.३ 'वर्ष्य उदके यजेत . . . ग्रामकामो यजेत . . . अन्नकामो यजेत . . . वृष्टिकामो यजेत'. **वाञ्छेश्वरः**–तत उदकाद् उदकार्थान् उदकसाध्यान् पदार्थान् कुर्वाणो भवतीति शेषः.

---

१. श्रौबा २, वैश्रौबा, इ–वा वपनं २. मु–८–९ इत्यनयोरेकमेव सूत्रम् ३. बा, भां २, अ, डे, वैअ, वैआ १, आ १, म १, गो–संतिष्टते ४. म १–ननैमनीजाना ; म२–ननैनमनीजाना ; म ३–नैनमनीजाना ५. म १–वसन्तं ६. म १–३–ंजते चैत्रीयां तु प्रयुज्य ७. म १–२–शुनासीर्येण ८. वैअ–यजते ९. वैश्रौबा–नास्ति १०. वैश्रौबा–अन्नाद्यकामो ११. इ–पंच वत्सराणि ; भां १–पंचमं चराणि १२. म ३–नास्ति १३. म १–३–नास्ति

प्रयुज्य[1] द्वावृतू संवत्सराविष्ट्वा तृतीयस्य मासं न यजेत ।।११।। चैत्र्यां[2] तु प्रयुज्य त्रीनृतून्[3] संवत्सरानिष्ट्वा चतुर्थस्य मासं न यजेत ।।१२।। एवं विहितं[4] द्वयवरार्ध्यं त्र्यवरार्ध्यं वाभ्यस्येदभ्यस्येत्[5] ।।१३[6]।। [१८]

।। इति हिरण्यकेशिसूत्रे[7] पञ्चमप्रश्ने षष्ठः पटलः ।।

संतिष्ठन्ते (१८) ततो द्वयहे (१७) पूर्वयोः (१६) रौद्रान् (१५) मन्थमेके (१४) सीद होतः (१३) अखाता वेदिः (१२) तदानीमेव महापितृयज्ञेन (११) तदानीमेव महाहर्विभिः (१०) यदानीकवतस्य (९) ततश्चतुर्षु मासेषु कार्तिक्याम् (८) एककपाले (७) उत्तरस्यां वेद्यां (६) हिरण्मय्यो वा (५) ततश्चतुर्षु मासेष्वाढ्यां (४) संवत्सरीणां (३) संयुतानाम् (२) अक्षय्यँ ह वै (१)[8] ।।

इति हिरण्यकेशिसूत्रे[9] पञ्चमः प्रश्नः

---

११. **मैसं १.१०.८** 'ऋजू द्वौ परा इष्ट्वा तृतीयमुत्सृजेत'; **कासं ३६.३** 'द्वौ परा ऋजू इष्ट्वा तृतीयमुत्सजेत्'.

१२. **मैसं १.१०.८** 'ऋजूँस्त्रीनिष्ट्वा चतुर्थमुत्सृजेत्'; **कासं ३६.३** 'त्रीनृजूनिष्ट्वा चतुर्थमुत्सृजेत्'.

---

१. इ–प्रवृज्य २. म १–२–चैत्रीयां ३. म १–३–त्रीन् ४. इ–विहितं द्वयवरात्रं त्र्यवरात्रं वा ; वैअ–विहिते ५. म १–वाभ्यस्येत् ६. मु–९–१३ इत्येषामेकमेव सूत्रम् ७. एवं डे, बा, भां १, अ, श्रौबा १–हिरण्यकेशी° ; श्रौबा २, इ–नास्ति; मु–सत्याषाढहिरण्य° ८. एवं श्रौबा १, अ, डे, भां १–२; इ, आ२–अक्षय्यँ ह वै सुकृतं (१) संयुतानां (२) संवत्सरीणां (३) ततश्चतुर्षु मासेष्वाषाढ्यां (४) हिरण्मय्यो वा (५) उत्तरस्यां वेद्यां (६) एककपाले (७) ततश्चतुर्षु मासेषु कार्तिक्यां (८) यदानीकवतस्य (९) तदानीमेव महाहर्विभिः (१०) तदानीमेव महापितृयज्ञेन (११) अखाता वेदिः (१२) सीद होतः (१३) मन्थमेके (१४) रौद्रान् (१५) पूर्वयोः (१६) द्वयहे (१७) संतिष्ठते (१८) अष्टादश इति; इ–अक्षय्यं तदानीमेव महापितृयज्ञेनाष्टादश इत्यधिकम् ; भां २–अक्षय्यं ततस्ततस्तदानीँ रौद्रान् द्वयहे षट् इत्यधिकम् ९. इ–हिरण्यकेशीचातुर्मास्यसूत्रे ; आ १–°सूत्रे प्रथमषट्के

APPENDIX

(A) The Citations given by Mahādeva in his Commentary, Vaijayantī, on Chapter 5 of the HŚS

१.५ गार्हपत्यादग्निप्रणयनं पशुबन्धवदिति वैखानस(८.३)–आपस्तम्बोक्तेः(८.१.६)।

१.६ उक्तं वैखानसेन 'तद्वदायतने प्रतिष्ठाप्य' (८.३) इति ।

१.७ बौधायनोक्त(५.१)–तूष्णीं सायंदोहपक्षस्य व्यावृत्त्यर्थं च ।

१.१२–१३ तत्स्पष्टमेवोक्तमापस्तम्ब(८.१.१६)–वैखानसाभ्यां (८.३) 'सायंदोहं दोहयति ...श्वोभूते' इति ।

१.२० 'अन्यस्मिन् पात्रे वाजिनम्' इति वैखानसः (८.४) । द्वयोरिति भारद्वाज-(८.२.२)–आपस्तम्बौ (८.२.९) । उद्वासनकाल एवेदमामिक्षां कृत्वैककपाल-मुपधाय तत 'उद्वासनकालेऽन्यस्मिन् पात्रे...' इत्यादि तथैवापस्तम्ब(८.२.२५)-वैखानसाभ्याम् (८.५) अभिधानात् । अत्रैवोद्धरणनिषेचनं भरद्वाजेनोक्तम् (८.२.२) ।

२.७ 'अलंकरणकाले' इत्यापस्तम्बः (८.२.१०) ।

३.३ 'बर्हिषि' इति वैखानसः (८.७) । 'अन्तर्वेदि' इत्यापस्तम्बः (८.३.६) ।

३.७ चमसेन स्रुचा वा 'स्रावयञ्जुहोति' इति वैखानसः (८.७) ।

३.८ 'त्रयाणां ह वै हविषां स्विष्टकृते न समवद्यति सोमस्य घर्मस्य[1] वाजिनस्य[1]' इत्या-पस्तम्बोक्तश्रुतेः (८.३.११) ।

३.१० 'शेषम्' इति भारद्वाज(८.४.२,४)–आपस्तम्बौ (८.३.१२) ।

३.११ 'कर्मनामधेयेन' इत्यापस्तम्बः (८.३.१३) । क्रमोऽप्ययमेव भारद्वाजेनोक्तः (८.४.४) ।

४.५ भारद्वाजोऽपि 'अध्वर्युरेव पत्नीर्याजयति[2]' (८.११.४) इति । आपस्तम्बेनोक्त-मुभयोः 'पत्नीसंयाजाः' (८.५.७) इति ।

४.६ तानि च परिगणितानि कात्यायनेन 'प्रणीतापत्नीसंनहनाग्निमन्थनाश्रुतप्रत्याश्रुत-प्रैषयजमानवाचनहोतृषदनवरणप्राशित्राङ्गुलिपर्वाञ्जनावान्तरेडाभागापराग्न्यवभृथान्न प्रतिप्रस्थाता' इति (५.४.३१) ।

४.८ भरद्वाजोदाहृतस्य 'अग्निभ्यां समिध्यमानाभ्यामनुब्रूहि' (८.९.१) इत्येवमग्नि-संमार्जन इति ।

४.१० द्वे पाशुक्यौ 'दक्षिणा दार्शिक्युत्तरा पाशुकी' इति बौधायन(५.५) वैखानसा-(८.९)–द्युक्तमनभिमतमिति दर्शितम् । अस्ति वरुणप्रघासेषु प्रस्थद्वयं यद्गार्हपत्या-दाहवनीयाच्च प्रणयनं सूत्रान्तरेषु (द्र. आपश्रौ ८.५.२२; भाश्रौ ८.७.९) तथा दर्शनात् ।

४.१२ अत्र 'कृतानुकरः' प्रतिप्रस्थातेति कात्यायन(५.४.३२)–बौधायनाभ्याम् (२५.२) उक्तम् ।

---

१. मु–वाजिनस्य घर्मस्येति २. मु–पत्नीः संयाजयति

४.२२ 'दक्षिणविहारस्य' इति भरद्वाजः (८.६.६)। 'उभयत्र' इति बौधायनः (५.५)। 'उत्तरस्मिन्नेवाग्नौ प्रणीता आसादयतः' इति भरद्वाजः (८.७.१२)। कात्यायनेन (५.४.३१) तु साधारणत्वाद् अध्वर्युरेवेत्युक्तम्।

५.४ 'मेषमेषीप्रकृतीभ्यां[1] यवान्निर्वपति' इति भरद्वाजः (८.६.९)। अध्वर्युः 'वारुणाय मेषाय यवान् निरुप्य' इति वैखानसः (८.१०)।

५.१० सूत्रान्तरे (द्र. कात्याश्रौ ४.४) सद्यस्कालामिक्षा लौकिकेन दध्नेत्याद्युक्तनिरासार्थम्।

५.१६ तानि यवानामेवापस्तम्ब (८.५.३७)–भारद्वाजोक्तेः (८.७.१)।

५.१७ 'पुत्रपौत्राः' इति भारद्वाजः (८.७.१)। सर्वथा तदभावे त्रीण्येवोक्तानि कात्यायनेन (५.३.५)।

६.६ तदुक्तं कात्यायनेन (५.४.३१) मन्थनमात्रमध्वर्योरेवेति दर्शितम्। पक्षे अध्वर्योरेव प्रचार इति भारद्वाजेनोक्तं (८.८.१५) 'निर्मन्थ्यौ द्वौ' इत्यापस्तम्बोक्तं (८.६.१८) च।

६.१७ तावत् 'स्रुक्पाणिरास्ते प्रतिप्रस्थाता' इति कात्यायनः (५.५.१४)।

६.१९ भरद्वाजेनोक्तमाग्रयणेष्टावेव वैश्वदेवचरौ 'विश्वेषां देवानामहं देवयज्यया प्राणैः' इत्यादि तस्मिन् एककपाले द्यावापृथिव्योरित्यादि (६.१७.१२)। कात्यायने-ऽप्येवमेव (४.६.३)।

७.७ अत एवोक्तं भरद्वाजेन 'स्थालीगतं निष्कासं[2] प्रज्ञातं निदधाति' (८.६.२३) इति।

८.८ 'न प्रणीताः प्रणयति' इति भरद्वाजः (८.१२.११)।

८.९ चतुरो मुष्टीन् निरुप्य प्रभूतानन्वावपतीति भरद्वाज (१.९.११–१२)–आपस्तम्बौ (८.१०.१)।

८.१० आपस्तम्बः (८.९.१२) पक्षान्तरमाह सान्नाय्यवदिति।

८.१२ 'पत्ये[3] स्त्रीकुमारेभ्यश्च प्रतिवेशमोदनं पचति' इत्युक्तं वैखानसेन (९.२)।

९.११ 'पत्नीस्त्रीकुमाराः' इति वैखानसः (९.३)।

९.१२ 'क्रैडिनस्य तन्त्रं प्रक्रमयति...पुरा प्रातरग्निहोत्रात् पूर्णदर्व्येण प्रचरति[4]' इति भरद्वाजोक्तेः (८.१४.१,३)।

११.५ आपस्तम्बः 'ये के च देवसंयुक्ता मन्त्रा देवेभ्यः पितृभ्य इति तान् संनमति यथा भवति देवपितृयजनीति। अविकारो वा परवाक्यश्रवणात्' (८.१३.६) इति।

१३.१ 'आश्राव्य सीद होतरिति' तथैव भारद्वाज (८.१८.१३)–आपस्तम्बोक्तः (८.१४.२२)।

१३.१७ सर्वेभ्यस्त्रिभ्यः सकृत्सकृदवद्यतीत्यापस्तम्ब (८.१५.९)–भरद्वाजोक्तेः (८.१९.५–६)।

१४.१ अत एवाहापस्तम्बः 'यथासमाम्नायम्[5]। ... अग्नये कव्यवाहनाय यमाय वा मन्थम्' (८.१३.१५–१६) इति।

---

१. मु– मेषप्रतिकृतिभ्याम् २. मु– वारुणनिष्कासं ३. मु–पत्न्यै ४. मु–चरन्ति ५. मु– यथा समाम्नातम्

१४.६ अत्र 'एतत्ते ततासौ' इत्यापस्तम्बः (८.१६.६)।

१६.३ 'परोगोष्ठ आसजन्ति'[१] इति भरद्वाजः (८.२३.५)।

१६.६ 'सुमित्रा न इत्येतेन[२]' इति भारद्वाजः (८.२३.६)।

१६.१० 'तस्याग्न्याधेयिकवत्[३] कल्पः' इति भरद्वाजः (८.२३.११)। सर्वे भागा ब्रह्मण एवेति 'पूर्ववत्' इत्यापस्तम्बः (८.१९.१)।

१७.३ प्रातर्दोहस्यावृता काले प्रातर्दोहं दोहयति। तथैवोक्तमापस्तम्ब(८.२०.४)-भरद्वाजाभ्याम् (८.२४.६)।

१७.४ तथा भरद्वाजोऽपि 'प्रतिधुगिति दुग्धमात्रवाद' इति (नोपलभ्यते)। आसाद्यैवावदाय याग इति सर्वं कात्यायनेन (५.११.५-१०) पूर्वपक्षसिद्धान्ताभ्यां साधितं ज्ञेयम्।

१७.६ एकमेव नामेष्टम्। आपस्तम्बस्यापि (८.२०.८) तथैव।

१८.२ फाल्गुनीत्युपलक्षणं सर्वमेतत् कात्यायनेन (५.११.१६) स्पष्टीकृतम्।

१८.४ इष्टिराग्नेयी कात्यायनीयानाम्(५.११.१६)। अन्यैः (बौश्रौ २२.६) सवनेष्टि-रित्युक्तम्।

(B) The Citations given by Vāñcheśvara in his commentary

१.१ आश्वलायनेन च 'दर्शपूर्णमासाभ्यामिष्ट्वेष्टिपशुचातुर्मास्यैः' (४.१.१) इति नित्यानुक्रमे वचनात्। बौधायनेन 'यावज्जीवप्रयुक्तानि[४] स्युः' (२१.१) इति यावज्जीवाभ्यासवचनात्। भारद्वाजोऽपि फलानुपबन्धेनैव 'चातुर्मास्यैर्यक्ष्यमाणः पञ्चहोतारं मनसानुद्रुत्य' (८.१.१) इत्युक्त्वा 'काम्यानि चातुर्मास्यानि व्याख्यास्यामः' (८.२५.१) इति स्थलान्तरे प्राह।

१.२ अत्र बोधायन(५.१.)-भरद्वाजयोर्मते उदगयनमात्रे प्रयोगो द्वादशाहेनापवर्गः। 'उदगयन आपूर्यमाणपक्षे समस्तानि। तेषां यथापूर्वं[५] निवर्तनमन्ते वपनम्' (भाश्रौपरि १०६)इति यथा 'द्वादशाहानि यक्ष्यमाणः[६] द्वितीये वैश्वदेवेन[७] तृतीये चतुर्थेऽहन्युपरमं[८] पञ्चमे वरुणप्रघासैः[९] षष्ठे सप्तमे चोपरम्याष्टमे नवमे साकमेधानां[१०] दशम एकादशे चोपरम्य द्वादशे शुनासीरीयं त्रयोदशे पशुः[११]। संवत्सरप्रतिमा वै द्वादश रात्रयः संवत्सरमेव यजेत' (भाश्रौपरि २१८) इति। बौधायनोऽपि 'नक्षत्रप्रयोग इत्येके[१२]। उदगयन आपूर्यमाणपक्षे[१३] पुण्याहे प्रयुञ्जीत' (५.१)। तथा 'द्वादशाहेऽपि चातुर्मास्यः प्रयुञ्जीत[१४] प्रथमायां[१५] वैश्वदेवेनेष्ट्वा चतुर्थ्यां वरुणप्रघासैरष्टम्यां नवम्यां च साकमेधैर्द्वादश्यां शुनासीरीयपरुषा यजेतेति विज्ञायते' (२५.१) इति। अन्ये तु 'यथाप्रयोग[१६] इत्यौपमन्यवः' (२१.१०) इति बौधायनवचनात्। 'चातुर्मास्यानि प्रयोक्ष्यमाणः' इत्याश्वलायनेन (२.१५.१) पुरुषसंस्कारतया निर्देशात्।

---

१. मु- परोगोष्ठे वृक्ष आसज्योपतिष्ठन्ते २. मु- सुमित्रा न आप ओषधयः सन्तु इति ३. मु- °ग्न्याधेयेन ४. मु- 'एव चातुर्मास्यानि' इत्यधिकम् ५. मु- यथादेशं ६. मु- 'प्रतिपदि वैश्वानरपार्जन्यौ' इत्यधिकम् ७. मु- देवं ८. मु- चतुर्थे चोपरम्य ९. मु- °घासाः १० मु-°मेधाः ११. मु- पशुरिति १२. मु- इत्येक आहुः १३. मु- °पक्षस्य १४. मु- यजेत १५. मु- नास्ति १६. मु- °प्रयोगम्

१.५–६ 'पशुबन्धवद् गार्हपत्यादग्निं प्रणीय[1]' इत्यापस्तम्बः (८.१.६)। तथा चापस्तम्बः 'अग्निं प्रणयन् नोद्यतहोमं जुहोति' (८.१.६) इति। वैखानसः 'पशुबन्धवद् गार्हपत्यादग्निं प्रणीयत[2] इदमग्न्यायतनेऽग्निं[2] प्रतिष्ठापयतीत्येके' (८.३) इति। स्पष्टमाहापस्तम्बः 'नानुत्तरवेदिके पाशुकं प्रणयनं विद्यत इत्यपरम्' (८.१.८) इति।

१.९ तथा चापस्तम्बः 'प्रसूमयं बर्हिः प्रस्तरश्च' (८.१.१०) इति। 'तस्मिन् मन्त्रः' इत्यापस्तम्बः (८.१.१२)।

१.१० 'तथेध्मस्त्रयोविंशतिदारुः' इत्यापस्तम्बः (८.१.१३–१४)।

१.१२ 'श्वोभूते पात्रसंसादनकाले' इत्यापस्तम्बः (८.२.१)।

१.१९ 'यत्संवर्तते सामिक्षा' इत्यापस्तम्बः (८.२.६)।

२.१ आपस्तम्बोऽप्याह 'पिष्टानां पौष्णं श्रपति[3]' (८.२.४) इति।

२.११ नवत्वसंख्यापूरणमाहापस्तम्बः 'चतुर्थोत्तमावन्तरेण पाशुकाश्चत्वार[4] दुरप्रभृतयः प्रैषप्रतीकयाज्याः' (८.२.१५) इति।

२.१२ 'पशुवत् समानयनम्' इत्यापस्तम्बः (८.२.१६)।

२.१३ आपस्तम्बस्तु 'उपांशु सावित्रेण प्रचर्य पूर्ववदेककपालेन प्रचरति' (८.२.१७) इति सावित्रमात्रस्योपांशुत्वमाह।

२.१८ अत्र विशेषमाहापस्तम्बः 'अष्टावाद्याः पाशुकाः प्रैषवर्जम्' (८.३.१) इति।

३.८ 'अनुवषट्कृते च' इत्यापस्तम्बः[5]। तथा चापस्तम्बः 'स्रुवाणां[6] ह वै हविषां स्विष्टकृते न समवद्यन्ति[7] सोमस्य वाजिनस्य घर्मस्य' (८.३.११) इति।

३.११ उपहवप्रकारमाहापस्तम्बः 'कर्मनामधेयैरामन्त्रयते[8]' (८.३.१३) इति। तत्र क्रममाह भारद्वाजः 'होताग्रेऽथाध्वर्युरथ ब्रह्माथाग्नीध्रोऽथ यजमानः। समशो वा विभज्य सर्वमेव मिथः कर्मनामभिः समुपह्वयेरन्' (८.४.४–६) इति।

४.२ 'उदवसाय वरुणप्रघासैर्यजते' इत्यापस्तम्बः (८.५.१)।

४.७ 'पञ्च[9] ऋत्विजः[9]' इत्यापस्तम्बः (८.५.१५)।

४.१० 'अग्रेण गार्हपत्यसमे[10] प्राची' इत्यापस्तम्बः (८.५.४)।

४.१२ 'अन्तरा वेदी प्रतिप्रस्थातुः संचरः' इत्यापस्तम्बः (८.५.११)। कृतानुकारीति कात्यायनोक्तेः (५.४.३२)।

४.२१ तथा चापस्तम्बः 'सद्यस्काला वरुणप्रघासाः' (८.५.३१)।

५.१ 'उत्तरस्मिन्नेवाग्नौ प्रणीता आसादयतः' इति भारद्वाजः (८.७.१२)। 'वरुणप्रघासेषु समाः[11] प्रणीताः' (भाश्रौपरि १०५) इति। कात्यायनः (५.४.३१) अतो न प्रणीता प्रतिप्रस्थातुः।

---

१. मु– प्रणयन् २. मु– प्रणीय तद्वदग्न्या° ३. मु– श्रपयति ४. मु– °श्चत्वारो ५. नेदं सूत्रम् अपि तु आपश्रौ (८.३.८) इत्यत्र धूर्तस्वामिभाष्ये इदं वचनम् ६. मु– त्रयाणां ७. मु– °द्यति ८. मु– कर्मनामधेयेनामन्त्र° ९. मु –पंचर्त्विजः १०. मु– °पत्यं समे ११. मु– समानाः

५.१६ आपस्तम्बस्तु 'पौष्णाः करम्भपात्राणि मेषामिति[1] यवानां व्रीहीणामितराणि (८.५.३६) इति ।

५.१७ 'यावन्तो यजमानस्य पुत्रपौत्रा भवन्ति' इत्येव भारद्वाजः (८.७.१) ।

६.६ तत्र भारद्वाजः 'उभौ निर्मन्थ्याभ्यां चरत इत्येकम् । अध्वर्युरित्यपरम्' (८.८.१५) इति ।

६.११ 'एतद्यजुर्वाचयति[2]' इत्यापस्तम्बः (८.६.१९) ।

६.१२ 'शूर्प उपस्तीर्य करम्भपात्राण्योप्याभिघार्य' इति भारद्वाजः (८.९.७) ।

६.१४ 'अध्वर्युः प्रतिप्रस्थाता वा जुहुयात्' इत्यापस्तम्बः (८.६. २६) ।

६.१७ 'अध्वर्युरेव प्रवरं वृणीते[3]' इति भारद्वाजः (८.९.१४) । 'प्रतिप्रस्थाता कृतानुकरोऽन्यत्र' इति कात्यायनवचनेन (५.४.३१–३२) । कृतानुकरोऽन्यत्रेति बोधायनश्च (२५.२) ।

६.१८ तथा च भारद्वाजः 'संसृष्टे च नानाद्रव्यत्वात् वरुणप्रघासेषु मेषयोश्च' (भाश्रौपरि १६८) इति । अत्र मेषयोर्देवतामाहापस्तम्बः 'तयोरामिक्षावद्देवताम्[4]' (८.५.३९) ।

७.२ अत्रापेक्षितमाचार्येणानुक्तं किंचिद् आपस्तम्बोक्तिमनुसृत्य लिख्यते 'तदु हैके पृथगिडे समवद्यन्ति तदु तथा न कुर्यात् । सप्तानां हविषां समवदायाध्वर्युः प्रतिप्रस्थात्रे प्रयच्छति । तस्मिन् प्रतिप्रस्थाता मारुत्या अन्ववदधाति' (८.७.३) इति । 'उभयोः[5] पृथक् स्विष्टकृतौ जुहुतः सहेडामवद्यतः' इति भारद्वाजः (८.१०.१०) ।

७.७ आपस्तम्बस्तु 'पूर्णपात्रवर्जमिष्टिं संस्थाप्य[6]' इत्युक्त्वा 'पूर्णपात्रस्थाने सौमिकोऽवभृत[7]' इत्याह (८.७.११–१२) ।

७.१० 'नायुर्दान्[8] नाभिप्रव्रजनमन्त्रम्' इत्यापस्तम्बः (८.७.१७) ।

८.३ तथा च भारद्वाजः 'द्व्यक्षरत्र्यक्षरा ऐन्द्राग्नाविकाराः[9] । चतुरक्षरप्रभृतयो अग्नीषोमीयविकाराः[10]' (भाश्रौपरि १७५–१७६) इति । तथा भारद्वाजः 'अक्षरसंख्यायां सगुणो देवताशब्दः संख्यायेत[11]' (भाश्रौपरि १७९) । 'बर्हिरनुप्रहरणवर्जं वा' इति कात्यायनः (५.६.५) ।

८.४ 'अयजुष्केण वत्सानपाकरोति[12]' इत्यापस्तम्बः (८.९.११) । 'तूष्णीं वत्सानपाकृत्य' इति वैखानसवचनात् (९.१) ।

८.९ 'चतुरो मुष्टीन् निरुप्य बहून्वापति[13]' इत्यापस्तम्बः (८.१०.१) ।

८.११ तथा च भारद्वाजः 'अनुत्पूते पयस्यनुत्पूततण्डुलानावपति[14]' (८.१२.१५) इति ।

९.९ आपस्तम्बस्तु 'न प्राशित्रं न यजमानभागम्' (८.११. ६) इत्याह ।

९.१० 'ये यजमानस्यामात्या हविरुच्छिष्टाशास्ते[15] ओदनशेषान् प्राश्नन्ति' इत्यापस्तम्बः (८.११.८) । तथा च भारद्वाजः 'यावन्तो हविरुच्छिष्टाशा भवन्ति । अतोऽन्ये विप्राः[16] प्राश्नीयुर्यदि प्रभूत ओदनः स्यात्' (८.१३.१४–१५) इति ।

---

१. मु– मेपाविति २. मु – एतच्च वाच° ३. मु – प्रवृणीते ४. मु– °वद्दैवतम् ५. मु – नास्ति ६. मु– पूर्णपात्रवर्जं पूर्ववदिष्टिं संस्थापयति ७. मु – पूर्णपात्रस्य स्थाने सौमिकोऽवभृथः ८. मु – नायुर्दाम् ९. मु– ऐन्द्राग्नवि° १०. मु – °तयोऽग्नी° ११. मु – नास्ति १२. मु – °नपाकृत्य १३. मु – बहृवन्वावपति १४. मु– °नुत्पूय तंडुला° १५. मु– °शास्त १६. मु– अतोऽन्येऽपि प्राश्नी°

९.१८ 'हुते वा' इत्यापस्तम्बः (८.११.१८)।

९.२१ 'आग्नीध्रं हैके रावपन्ति[1]' इत्याश्वलायनः (२.१८.१२)।

१०.९ 'ऐन्द्राग्नतुषैरवभृथमभ्यावपन्ति[1]' इति वैखानसः (९.३)।

११.११ 'द्वौ परिधी परिदधाति मध्यमोत्तरौ' (८.१४.९–१०) इत्यापस्तम्बः 'यदि सर्वानावाहनकाले परिधीँ रपोर्ण्विति वाभिज्ञाय दक्षिणं मध्यमे परिधा उपसमस्येत्[2]' (८.१४.१२) इति।

११.२१ 'बहुरूपा धाना: करोति' इत्यापस्तम्बः (८.१३.१९)।

११.२२ 'अनुपदह्यमानाः[3] परिशेरत आ हविषामुद्वासनात्' इति भारद्वाजः (८.१७.१३)।

१२.२१ 'एकमेवशिष्य[4]' इत्यापस्तम्बः (८.१४.१९)।

१३.१ तथा च कात्यायनः 'सीद होतरित्येव भूयात्[5]' (५.८.३४) इति।

१३.८ 'अग्रेणाहवनीयं पितृयज्ञस्य संचरतो[6] भवति' इति भारद्वाजः (भाश्रौपरि ५५)।

१३.२१ 'ऋचमुक्त्वा प्रणौति। अपरामुक्त्वा प्रणौति' इत्यापस्तम्बः (८.१५.१४)।

१३.२५ 'यां देवतां [7]यजेत तद्धविषः प्रथममवद्य[7]' इत्यापस्तम्बः (८.१५.२१)।

१४.६ तथा च 'एतत्ते तत ये च त्वामन्विति प्रथमं पिण्डमवदध्यात्। एतत्ते पितामह ये च त्वामन्विति द्वितीयम्। एतत्ते प्रपितामह ये च त्वामन्विति तृतीयं यथा पिण्डपितृयज्ञे' इति[8] भारद्वाजः (८.२०.१३)। आपस्तम्बस्तु 'एतत्ते ततासौ ये च त्वामन्वित्येतैः प्रतिमन्त्रं त्रीन् परान् पितॄनन्वाचष्टे। षष्ठं प्रथमे पिण्डे पञ्चमं द्वितीये चतुर्थं तृतीये' (८.१६.७) इत्याह। वैखानसस्तु षष्ठादीनां नामग्रहणमाह 'षष्ठं प्रथमे पिण्डे' (९.९) इत्यादि।

१४.११ 'आतमितोरुपस्थाय' इत्यापस्तम्बः (८.१६.९)।

१४.१३ 'एतेनैव[9] परिश्रितं प्रविशन्ति' इत्यापस्तम्बः (८.१६.१०)।

१४.१४ 'अवघ्रेण सर्वभक्षः' इत्यापस्तम्बः (८.१६.१२)।

१४.१६ आपस्तम्बस्तु 'शुन्धतां पितर [10]इत्यप्रदक्षिणमयाविष्ठेत्यादिना परिषिञ्चन् प्रत्यागच्छति[10]' (८.१६.४–५) इत्याह।

१४.२५ आपस्तम्बस्तु 'निवीतानि कुर्वते' (८.१६.१८) इति सर्वेषां निवीतमाह।

१५.४ उत्तरदिश एव रुद्रसंबन्धित्वे संस्तवात् भारद्वाज(८.२२.१)–आपस्तम्ब-(८.१७.४)–कात्यायन(५.१०.३१)–वचनेभ्यश्च। 'गार्हपत्य[11] उदीचोऽङ्गारान् निरूह्य तेष्वधिश्रित्य' (९.१०) इति वैखानसश्च।

१५.१२ 'उत्तरार्धात् सकृत्सकृदवदाय[12]' इत्यापस्तम्बः (८.१७.१२)।

---

१. मु– वयन्ति २. मु–परिधावुप° ३. मु– ता अत्रैव विदह्यमानाः ४. मु– एकामनूयाजसमिधमवशिष्य ५. मु –ब्रूयात् ६. मु–संचरो ७–७. मु– यजेत्तद्धविष प्रथममवदाममवद्यति ८. मु –'एतत्ते तत ये च त्वामनु' इत्येतैर्मन्त्रैर्यथापिण्डपितृयज्ञे ९. मु– एतयैव १०–१०. मु– इति त्रिः प्रसव्यं . . . अयाविष्ठा . . . त्रिरपरिषिचन् प्रतिपर्येति ११. मु–गार्हपत्याद् १२. मु– सकृदवदाय

१५.१५ 'एवं[1] त्रिः समावपेयुः' इत्यापस्तम्बः (८.१८.४)।

१५.१६ 'यस्य कस्यचित्[2] पतिकामा स्यादित्येकम्। यजमानस्येत्यपरम्' इति भारद्वाजः (८.२३.४)।

१६.३ 'मृतयोर्मृतेषु वा' (८.१८.७) उपनह्येत्यपि बोध्यं आपस्तम्बोक्तेः।

१६.१० 'पूर्वं[3] निर्वपति' इत्यापस्तम्बः (८.१९.१)। 'अन्यत्र वरदानात्' इति भारद्वाजवचनात् (८.२३.११)। 'अश्वः श्वेतो[4] दक्षिणा' इत्यापस्तम्बवचनात्। अस्य आदित्यानुनिर्वाप्यान् आग्नावैष्णवादींश्चक्षुष्कामेष्ट्यादीन् आपस्तम्ब (८.१९.५–६) आह।

१७.२ परिभाषया वैश्वदेवप्रकृतिकत्वे सिद्धेऽपि पुनर्वैश्वदेवेनेत्यादि वचनं कल्पान्तरकारोक्त-(बौश्रौ ५.१८) महाहविःकल्पातिदेशनिरासार्थम्।

१७.४ 'प्रतिधुगिति दुग्धमात्रस्य वाद' इति भारद्वाजः (नोपलभ्यते)। तथा च कात्यायनः 'वायव्यं पयो लौकिकं प्रतिधुक् श्रुतेः' (५.११.५–७) इति। 'पञ्चप्रयाजं त्र्यनूयाजमित्येकम्[5]' इत्यापस्तम्बः (८.२०.७)।

१७.६ 'मासनामभ्यां जुहोति सँ सर्पाय स्वाहाँहस्पत्याय स्वाहा[6]' इति भारद्वाजः (८.२४.७)।

१८.३ 'सोमेन पशुनेष्टया वा यजेत' इति कात्यायनः (५.११.१६)। बौधायनस्तु पशुसोमानुक्त्वाह 'सवनेष्टया यजेतेत्यौपमन्यवः' (२१.६) इति। अत्रापस्तम्बः 'तुरायणेन[7] संवत्सरं सवनविधाविष्टि[8] निर्वपति। आग्नेयोऽष्टाकपाल ऐन्द्राग्न[9] एकादशकपालो वैश्वदेवो द्वादशकपालश्चरुरित्येके' (२३.१४.५–६)। तत्राप्याहाश्वलायनः 'तुरायणमग्निरिन्द्रो विश्वे देवा इति पृथगिष्ट्योऽनुसवनमाहरेद्[10] एका वा त्रिहविः' (२.१४.४–६)।

१८.५ 'एतैनैव पशुकामो यजेत यस्मिन्नस्यतैर्भूयिष्ठं[11] गोषु पयः स्यात्' इत्यापस्तम्बः (८.२२.२)।

(C) The Citations given by Gopīnātha in the Cāturmāsyaprayogendu

Prāṇasaṁtata : This is a technical term used in the *ĀśvŚS* 2·17·5; 2·15·14, in connection with the verses to be recited at the formal carrying forth of the fire in the *VaruṇaP*. It is explained by the *ĀśvŚS* in the previous *sūtra* as : "One should halt with the utterance of *praṇava*, and commence the recitation of the following verse without breathing in."

Mūta : This word is used in connection with the Tryambaka-rite, meaning 'a basket made of grass.' This word is derived from the root *mav* or *mū* (to bind).

Yajñopavīta : This word occurs in all the texts dealing with the Pitṛyajña. It is explained in the *TĀ* 2·1 as : "While putting on the cloth or the skin (of a black antelope), by the right, he should hold up his right arm (above the cloth or the skin) and stretch down the left arm (under the cloth or the skin.) This is the *yajñopavīta*." This word is split up as *yajña* + *upa* + *vīta*. Only the word *upavīta* is also found in some Vedic texts (Cf *TS* 2·5·11·1; *MS* 1·10·18). It is for the first time in the

Gṛhyasūtras[38] that a reference is made to the thread or cord of *kuśa*-grass for preparing the *Yajñopavīta*. According to the *BaudhGS* 2·2, the right hand is identified with the *yajña*, because the acts, indicated by the root *yaj*, are to be performed with the right hand. Hence that, which covers the body except the right hand, is *yajñopavīta*. The derivation of the word *vīta* is suggested from the root *vī*[39] (to weave), but it would be proper to derive it from the root *vye* (to cover).

Varuṇapraghāsa : This is the name of the second *Parvan* of the Cāturmāsya sacrifices. The *ŚatBr* 2·5·2·1 gives the derivation of this word as follows : "Creation, produced by Him (Prajāpati), partook of Varuṇa's barley. Originally the barley belonged to Varuṇa. And from their partaking of Varuṇa's share, the name *Varuṇapraghāsa* (is derived)". The expression *varuṇasya prādan* suggests the derivation from *varuṇa* + *pra* + $\sqrt{ad}$ (to eat). According to Pāṇini 2·4·37, *ghas* is substituted for *ad* and thus *pra* + $\sqrt{ad}$ gives the form *praghāsa*. (See above : *Praghāsya*)

Vājina : It is the liquid substance of milk added to curds. According to Sāyaṇa on the *TS* 1·6·2, it is 'the water-portion of milk'. This word is derived from the root *vaj* (to give vigour). *Vājina* is offered to Vājins, a deity possessing vigour (*vāja*). According to Sāyaṇa on the *TS* 1·8·2, "the word *vājina* causes to procure another deity, namely, Vājin, possessing the word *vāji*".

Śunāsīra : It is generally understood as an epithet of Indra; but, according to some scholars, it denotes a separate dual divinity. This is the principal deity in the *ŚP*. This word is explained variously by the commentators and by modern scholars. Yāska and Sāyaṇa say that *śuna* is Vāyu, and *sīra* is Āditya. Referring to the word *śunāsīrau*, occurring in the *ṚV* 4·57·5-8, MACDONELL remarks : "Agricultural implements named *śuna* and *sīra*, probably the ploughshare and the plough, are invoked in a few verses of the *ṚV* and a cake assigned to them at the sacrifice in the ritual"[40]. While translating the relevant passage from the *ŚatBr* 2·6·3, EGGELING has explained this word as : "*śuna* and *sīra*, probably the ploughshare and plough, considered as two tutelary deities of agricultural pursuits but by Yāska identified with Vāyu and Āditya"[41]. KANE says : 'the word *śunāsīra* occurs several times. The meaning is doubtful"[42]. But the *ŚatBr* 5·6·3·2 gives the meaning of the word "*śuna* as the prosperity of gods". Again the word *śuna* and *phāla* are separately mentioned[43]; hence *śuna* cannot be the ploughshare. Thus the correct meaning of this word may be suggested as : 'the deity that bestows the prosperity through the plough'.

38. Cf. *GobhilaGS* 2.11
39. T. R. AMALNERKAR, *A note on the yajñopavīta*, Lucknow, 1916, p. 7.
40. *Vedic Mythology*, p. 155.
41. *SBE*, Vol. XII, p. 445 fn.
42. *History of Dharmaśāstra*, Vol. II, Part ii, p. 1105.
43. Cf. *ṚV* 4.57.8.

Saṁcara : There are five *saṁcara*-oblations to be offered in every *Parvan* of the Cāturmāsya sacrifices. This word is derived from *saṁ* + √*car* (to follow).

Saṁnīya : This word occurs in the *MānŚS* 1·7·6·45 in connection with the mixing together of the oblations in the Pitṛyajña. It is derived from *saṁ* + √*nī* (to put together).

Saṁsarpa : It is the name of the month having two passages of the sun from one zodiacal sign into another; it is technically called *kṣayamāsa*. This is referred to in connection with the offering of an oblation over a cake on one potsherd in the *ŚP* (See above : *Aṁhaspatya*).

Sāntapana : It is an epithet of the Maruts. It is said in Vedic texts : " The Maruts scorched the Asuras on all sides; hence they are characterised as *sāntapana*. " The word is derived from *saṁ* + √*tap* (to scorch).

Sākamedha : This is the name of the third *Parvan*. The word *sākam* is used in the *TS* 1·8·4 to indicate the time coinciding with sunrise. Referring to this passage from *TS*, EGGELING remarks : " According to Black *Yajurveda*, the cake to Agnī Anikavant to be prepared (or offered) simultene-ously (Sākam) with the rising sun; hence is probably derived the term Sākamedha"[44]. Gopīnātha gives another explanation of this word as : ' prospering together '. He derives it from *sākaṁ* + √*edh* (to prosper).

Sthaṇḍila : This word occurs only in the *VaikhŚS* 9·11 in connection with Tryambaka-rite. It means a piece of ground, for placing the fire. M. WILLIAMS remarks : ' (it is) of unknown derivation; according to some, connected with the root *sthal* '.

---

44. *SBE*, Vol. XII, p. 409 fn.

वैश्वदेवशुनासीरीय-विहारः

१· गार्हपत्यः
२· दक्षिणाग्निः
३· वेदिः
४· आहवनीयः

वरुणप्रघास- विहारः

१. गार्हपत्यः
२. दक्षिणाग्निः
३. वेदिः
४. आहवनीयः
५. उत्तरा वेदिः
६. दक्षिणा वेदिः
७. उत्तरवेदिः
८. दक्षिणाहवनीयः
९. चात्वालः
१०. उत्करः

स्केल - १ सें. मी = १२ अंगुले

साकमेध-विहारः

६
७
८
५
४
३
२
१
९
१०
१ गार्हपत्यः
२ दक्षिणाग्निः
३ वेदिः
४ आहवनीयः
५ महाहविषः वेदिः
६ उत्तरवेदिः
७ चात्वालः
८ उत्करः
९ पैतृकी वेदिः
१० पैतृकः आहवनीयः
स्केल - १ सें मी. = १२ अंगुले

APPENDIX

श्री:

महादेवसोमयाजिविरचित:

चातुर्मास्यप्रयोग:

[The *Prayoga* by Mahādeva Somayājin, giving the detailed procedure of the Cāturmāsya sacrifices is being reproduced here. The manuscript of the *Prayoga*, which has been described earlier (p. 150 fn), is neatly written and in it the marginal corrections are added at many places. The nasal sound is indicated not by *parasavarṇa* but by a *bindu*. In the text, presented here the *parasavarṇa* is used. The verses and the formulas, where they are given in the abbreviated forms, are here completed in the brackets. They are reproduced without accents, however, their exact references are indicated as far as possible.]

अन्वारम्भणीयेष्ट्यन्तम्

१. मङ्गलाचरणम्

श्रीगणेशाय नम: । श्रीगुरुभ्यो नम: ।
आदौ गजाननं नत्वा तथा योगेश्वरीं शिवम् ।
कालं कामं पर्शुरामं पश्चाद् ग्रन्थश्च लिख्यते ।

२. चातुर्मास्यानां प्रयोगद्वयम्

ओम् । 'अक्षय्यँ ह वै सुकृतं चातुर्मास्ययाजिन:' । भवतीति शेष: । चातुर्मास्यानि नित्यानि । 'अग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि' इति नित्येषु पाठात् । 'प्रतिसंवत्सरं सोम:' इत्यादि स्मृतेश्च । तेषां सांवत्सरिक: प्रयोग: सूत्रे स्पष्ट: । द्वादशाहिक: प्रयोगो यथाप्रयोगो वा बौधायनादिसूत्रे । तत्र द्वादशाहिकप्रयोगे यथाप्रयोगे वा उदगयन आपूर्यमाणपक्षे कृत्तिकादिविशाखान्तदेवनक्षत्राणाम् अन्यतमे आरम्भसमाप्ती आरम्भो वा ।

३. अनारम्भे प्रायश्चित्तम्

आधानोत्तरं प्रथमसंवत्सरे चातुर्मास्यानामनारम्भे विभ्रष्टेष्टि: । 'यो यज्ञविभ्रष्ट: स्यात् तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टाकपालमैन्द्रमेकादशकपालँ सौम्यं चरुम्' (तैसं २.३.३३) इति काम्येष्टिकाण्डोक्ताम् । अशक्तौ तद्देवत्यपूर्णाहुतीर्वा कृत्वानुष्ठानम् । द्वितीयादिप्रयोगे प्रतिसंवत्सरमननुष्ठाने पाथिकृतीं पूर्णाहुतिं वा कृत्वानुष्ठानम् । आद्ये प्रयोगे गणपतिपूजनपुण्याहवाचननान्दीश्राद्धकूष्माण्डहोमपञ्चहोत्रान्वारम्भणीया: । द्वितीयादौ पुण्याहवाचनादि न भवति ।

४. संकल्पः

अथ हिरण्यकेशिचातुर्मास्यप्रयोगः । यज्ञपुरुषं ध्यात्वा गार्हपत्यस्य पश्चाद् दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य देशकालौ स्मृत्वा 'श्रीपरमेश्वरप्रीत्यर्थं यथाप्रयोगपक्षमाश्रित्य ऐष्टिकचातुर्मास्यैर्यक्ष्ये' इति संकल्प्य 'गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धं च करिष्ये' इति संकल्पात् पूर्वं तदुत्तरं वा कुर्यात् ।

५. ऋत्विग्वरणम्

अथ ऋत्विग्वरणम् । 'ऐष्टिकचातुर्मास्येष्वध्वर्युं त्वामहं वृणे' एवं ब्रह्मादीन् वृत्वाऽर्हयेत् ।

६. कूष्माण्डहोमः

'चातुर्मास्याङ्गत्वेन कूष्माण्डैर्होष्यामि'। अध्वर्युः । उद्धरणपक्षे आहवनीयमुध्दृत्य स्मार्तवदाज्यँ सँस्कृत्य जुहूँ स्रुवं च संमृज्य स्रुवेणाहवनीये कूष्माण्डहोमं वरदानान्तं कृत्वा (बौधसू ३.७.११) ।

७. पञ्चहोतृहोमः

ततः 'चातुर्मास्यान्यालभमानः पञ्चहोतारं सग्रहँ होष्यामि'। अध्वर्युः । पुनरुध्दृत्य सकृद्-गृहीतेन पञ्चहोतारं मनसानुद्रुत्य सग्रहँ (तैआ ३.३) हुत्वाग्निं परित्यज्य ।

८. अन्वारम्भणीयेष्ट्यारम्भः

पुनः 'चातुर्मास्यान्यालभमानोऽन्वारम्भणीयेष्ट्या यक्ष्ये'। पुनरुध्दृत्यान्वादधाति । 'ममाग्ने वर्चो ० अद्य यज्ञाय ० इमामूर्जं' यथातिथि । 'अन्वारम्भणीयँ हविः ०'। पौर्णमासं तन्त्रम् । बर्हिषा व्रतम् । इध्माबर्हिः । वेदम् । परिस्तरणम् । न 'उभावग्नी'।

९. हविर्निर्वापः

'कर्मणे वां ० यज्ञस्य ०'। सदने ० पात्राणि (प्रयुनक्ति) द्वादश कपालानि चरुस्थालीं मेक्षणं तण्डुलसंवापपात्रम् । अन्वाहार्यस्थालीवर्जं प्रकृतिवत् । निर्वपणकाले 'अग्नये वैश्वानराय जुष्टं निर्वपामि । पर्जन्याय जुष्टं (निर्वपामि)'। 'अग्ने वैश्वानर हव्यँ रक्षस्व । पर्जन्य हव्यँ रक्षस्व'। 'देवस्य त्वा (सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ता)भ्यामग्नये वैश्वानराय पर्जन्याय वो जुष्टं प्रोक्षामि'। अँशवस्थान्ते 'यथाभागं व्यावर्तेथाम्'। इदमग्नये वैश्वानराय च पुरोडाशीयान् । इदं पर्जन्याय च चरव्यान् ।

१०. कपालोपधानम्

उपधानकाले द्वादश कपालानि । अन्ते पञ्चकृत्वः 'चिदसि'। 'अपाग्नेऽ(ग्निमामादं जहि निष्क्रव्यादँ सेध) । आ देवयजं वह । ध्रुवासि पृथिवीं (दृँहायुर्दृँह प्रजां दृँह सजातानस्मै यजमानाय पर्यूह' इति) स्थालीमुपधाय । 'भृगूणा (मङ्गिरसां तपसा) तप्यस्व' इति स्थाल्याः परितोऽङ्गा-राध्यूहनम् । पिष्टानि समोप्य शूर्पात् पात्रान्तरे तण्डुलान् समोप्य । पिष्टान्युत्पूय 'देवो वः (सवितोत्पुनातु । अच्छिद्रेण पवित्रेण । वसोः सूर्यस्य रश्मिभिः' इति) तण्डुलानुत्पुनाति । पिष्टेष्वप आनीय स्थाल्यामानयति । पुरोडाशमधिश्रित्य 'घर्माः स्थ (विश्वायुषः') इति स्थाल्यां तण्डुलानावपति । प्रथन-परिमार्जन-अभिज्वलन-भस्माभ्यूहनानि न चरौ । समानमा हविरुद्वासनात् ।

११. हविरुद्वासनम्

'आप्यायतां घृत(योनिरग्निर्हव्यानुमन्यताम् । खमङक्ष्व त्वचमङक्ष्व सुरूपं त्वा वसुविदं पशूनां तेज)साग्नये वैश्वानराय जुष्टमभिघारयामि । आप्या(यतां घृतयोनिरग्निर्हव्यानुमन्यताम् । खमङक्ष्व त्वचमङक्ष्व सुरूपं त्वा वसुविदं पशूनां) तेजसा पर्जन्याय जुष्ट(मभिघारयामि)'। 'आर्द्रो भुवनस्य गोपाः (शृत उत्स्नाति जनिता मती)नाम्'। स्थाल्या सहैवोद्वासनं चरोः। वेद्यां तूष्णीं हविरासादनम्। यजमानः। 'यज्ञौ स्थः सर्वतः श्रितौ स(र्वतो मां भूतं भविष्य)च्छ्रयेतां शतं (मे सन्त्वाशिषः सहस्रं मे सन्तु सूनृता इरावतीः पशुमतीः) । अयं यज्ञः'। विहव्यम्। चतुर्होता। वेदनिधानादि समानमा प्रधानात्।

१२. प्रधानयागः

'अग्नये वैश्वानरायानुब्रूहि। अग्निं वैश्वानरं यज। अग्नेर्वैश्वानरस्याहं (देवयज्य)यान्नादो भूयासम्। पर्जन्यायानु(ब्रूहि)। पर्जन्यं यज। पर्जन्यस्याहं (देवयज्यया)न्नादो भूयासम्'।

१३. जयहोमः

पुरस्तात् स्विष्टकृतो जयहोमः। द्वादशगृहीतं गृहीत्वाग्रेणाहवनीयं परीत्य दक्षिणतस्तिष्ठन् प्रत्याहुति समिधोऽभ्याधाय विग्राहं जुहोति। 'चित्तं च स्वाहा'। चित्तायेदं (न मम)। 'चित्तिश्च स्वाहा'। चित्तय (इदं न मम)। 'आकूतं च स्वाहा'। आकूतायेदं (न मम)। 'आकूतिश्च स्वाहा'। आकूत्या इदं (न मम)। 'विज्ञातं च स्वाहा'। विज्ञातायेदं (न मम)। 'विज्ञानं च स्वाहा'। विज्ञानायेदं (न मम)। 'मनश्च स्वाहा'। मनस इदं (न मम)। 'शक्वरीश्च (स्वाहा)'। शक्वरीभ्य इदं (न मम)। 'दर्शश्च (स्वाहा)'। दर्शायेदं (न मम)। 'पूर्णमासश्च (स्वाहा)'। पूर्णमासायेदं (न मम)। 'बृहच्च (स्वाहा)'। बृहत इदं (न मम)। 'रथंतरं च स्वाहा'। रथंरायेदं (न मम)। 'चित्तं च स्वाहा' इति द्वादशाहुतीर्हुत्वा यथेतं प्रत्येत्य। पुनः सकृद्गृहीतेन तथैव 'प्रजापतिर्जयानिन्द्राय' इति त्रयोदशीम्। 'प्रजापतिर्जयानिन्द्राय वृष्णे (प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः समनमन्त सर्वाः स उग्रः स हि) हव्यो बभूव स्वाहा'। प्रजापतय इदं (न मम)।

१४. अवशिष्टविधानम्

स्विष्टकृदादि। विरुज्य प्राशितम्। उभयोश्चतुर्धाकरणम्। दक्षिणाकाले हिरण्यं वैश्वानरे धेनुं पर्जन्ये। 'इमे हिरण्यधेनू अमृतस्य पूर्णे सहस्रधारे उत्से अक्षीयमाणे। ते दध्रतुः पृथिवीमन्तरिक्षं दिवं च ताभ्याँ हिरण्यधेनुभ्यामतितराणि मृत्युम्। ब्रह्मणी ब्रह्मणी स्थो ब्रह्मणे वां हुताद्ये मा मा हिँसिष्टमहुते मह्यँ शिवे भवतम्'। 'ब्राह्मणा इमे हिरण्यधेनू (यथाभागमहिँसन्तः प्रतिगृह्णीध्वम्)'। 'देवस्य त्वा ० अग्नये हिरण्यँ रुद्राय गां ताभ्याममृतत्व(मश्यां वयो ० दक्षिणो)त्तानौ वामाङ्गीरसः (प्रतिगृह्णातु)'। 'अग्नेर्वैश्वानरस्याहमुज्जिति(मनूज्जेषम्)। पर्जन्यस्याहमु(ज्जितिमनूज्जेषम्)। नित्याः पत्नीसंयाजाः। 'त्वया वेदिं' पार्वणपुनरालम्भवर्जं सिद्धमिष्टिः सन्तिष्ठते।

वैश्वदेवपर्व

१. संकल्पः

अथ वैश्वदेवः। तदानीमेव 'वैश्वदेवेन यक्ष्ये'। वृता एव ऋत्विजः। उदवसानं वैकल्पिकम्। उद्धरणपक्षे गार्हपत्यदक्षिणाग्न्योः अजस्रपक्षे त्रयाणामपि पृथगरणीष्वात्मनि वा समारोपणं कृत्वा।

प्राचीनप्रवणत्वं संपाद्य शम्यामानेन षट्त्रिँशदङ्गुलात्मकेनाहवनीयं कल्पयित्वा तत्क्षेत्रमानेनापरयोरायतने कृत्वा उद्धत्यावोक्ष्य क्रमेण मथित्वा लौकिके वोपावरोह्यायतनेषु निदधाति ।

२. अग्निप्रणयनम्

उद्धरणपक्षे अध्वर्युरुत्तरेण गार्हपत्यं दर्भान् सँस्तीर्य दक्षिणेनाहवनीयं ब्रह्मयजमानावुपवेश्य पात्राणि प्रयुनक्ति । जुहूँ स्रुवमग्निहोत्रहवणीमाज्यस्थालीमूर्णास्तुकां प्रणयनीयमिध्ममुपयमनीः सिकता उपवेषं च। पवित्रे कृत्वा तूष्णीं प्रोक्षणीः सँस्कृत्य पात्राणि प्रोक्ष्य जुहूँ स्रुवं च संमृज्याज्यँ सँस्कृत्य गार्हपत्येऽग्निप्रणयनान्यादीपयति । सिकताश्चोपयमनीरुपकल्पयत उद्यच्छतीध्ममुपयमनीरुपयते धार्यमाणे । 'अग्नये प्रणीयमानायानुब्रूहि' इति संप्रेष्यति ।

आहवनीयायतनं प्राप्य । 'अग्नेर्भस्मास्यग्नेः पुरीषमसि' (तैसं १.२.१२) इत्यूर्णास्तुकामायतने निधाय 'ऊर्णावन्तम्' इत्युच्यमाने 'यज्ञ प्रतितिष्ठ सुमतौ सुशेवा आ त्वा वसूनि पुरुधा विशन्तु दीर्घमायुर्यजमानाय कृण्वन्नधामृतेन जरितारमङ्धि (तैब्रा ३.५.८) यज्ञः प्रत्यष्ठात् (कासं २.९)' इति संभारेषु प्रतिष्ठाप्य । 'अग्नेः कुलायमसि' (मैसं १.२.८) इति दक्षिणत उपयमनीरुपनिवपति । 'मनुष्वत् त्वा निधीमहि मनुष्वत् समिधीमहि । अग्ने मनुष्वदङ्गिरो देवान् देवायते यज' (तैब्रा ३.११.६) इत्युपसमिन्धे । परिस्तीर्य परिषिच्य जुह्वां चतुर्गृहीतं गृहीत्वा दर्विहोमधर्मेण जुहोति । 'अग्निर्यज्ञं नयतु प्रजानन् मैनं यज्ञहनो विदन् । देवेभ्यो यज्ञं प्रब्रूतात् प्रप्र यज्ञपतिं तिर स्वाहा'। अग्नय इदं (न मम) । 'वायुर्यज्ञं नयतु (प्रजानन् मैनं यज्ञहनो विदन् । देवेभ्यो यज्ञं प्रब्रूतात् प्रप्र यज्ञपतिं) तिर स्वाहा' । वायव इदं (न मम) । आदित्यो यज्ञं न(यतु प्रजानन् मैनं यज्ञहनो विदन् । देवेभ्यो यज्ञं प्रब्रूतात् प्रप्र यज्ञपतिं) तिर स्वाहा' । आदित्यायेदं (न मम) । 'यज्ञो यज्ञं (नयतु प्रजानन् मैनं यज्ञहनो विदन् । देवेभ्यो यज्ञं प्रब्रूतात् प्रप्र यज्ञपतिं) तिर स्वाहा' । यज्ञायेदं (न मम) । जुहूँ स्रुवं च संमृज्य द्वादशगृहीतेन स्रुचं पूरयित्वा । 'सप्त ते अग्ने समिधः सप्त जिह्वाः सप्तर्षयः सप्त धाम प्रियाणि । सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्वा घृतेन स्वाहा' (तैसं १.५.३) इति पूर्णाहुतिं जुहोति । अग्नये सप्तवत इदं (न मम) । अजस्रपक्षे तु आहवनीयमपि मथित्वा लौकिके वोपावरोह्य तूष्णीं निधानम् । नास्ति प्रणयनम् ।

३. अग्न्यन्वाधानम्

अग्नीनन्वादधाति । 'ममाग्ने ० श्वो यज्ञाय ० इमामूर्जं' यथातिथि । 'वैश्वदेवँ हविरिदम्०' ।

४. वत्सापाकरणम्

शाखाहरणम् । तूष्णीमसिदमादाय पलाशशाखाँ शमीशाखां वा हरति । 'इषे त्वा' (तैसं १.१.१) शाखामाच्छिनत्यप उपस्पृश्य । 'ऊर्जे त्वा' संनमयति । 'इमां प्राची ० महम्' आहरति । 'वायवः स्थो(पायवः) स्थ' (तैसं १.१.१) शाखया षड् वत्सानपाकरोति । ततो व्रतोपायनम् । वत्सापाकरणानन्तरं व्रतप्रवेशः । 'देवो वः सविता प्रा(र्पयतु श्रेष्ठतमाय कर्मण आप्यायध्व) मघ्निया देवभागमूर्ज(स्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्मा मा वः स्तेन ईशतमाघ)शँसः' (तैसं १.१.१) गाः प्रस्थापयति । 'शुद्धा अपः सुप्र(पाणे पिबन्तीः) शतं विश्वेभ्यो देवेभ्यः शरदो (दुहानाः) । रुद्रस्य (हेतिः परि वो वृ)णक्तु' (तैसं १.१.१) प्रस्थिता अनुमन्त्रयते । 'ध्रुवा अ(स्मिन् गोपतौ स्यात) बह्वीः' (तैसं १.१.१) गृहानभिपर्यावर्तते । 'यजमानस्य (पशून्) पाहि' (तैसं १.१ १) अग्न्यागारे पुरस्तात् प्रतीचीँ शाखामुपगूहति । इति विशेषः ।

५. वेदिकरणम्

वेदं कृत्वा वेद्युत्करौ करोति । 'इदं तस्मै' इत्युभयत्राविकृतम् । 'वेदेन वेदिम्' इति वेद्यामविकृतम् । याजमानमपि । उत्करे तु । 'वेदेनोत्करं विविदुः पृथि ॊ स पप्रथे पृथि ०। चतुः शिखण्डो युवा सुपेशा घृतप्रतीको भुवनस्य मध्ये । मर्मृज्यमानो महते सौ(भगाय मह्यं धुक्ष्व यजमानाय कामान्) । वेदेनोत्करं बृहन्तमविन्दन् स पृथिव्यां प्रथतां पार्थिवानि । तस्मिन् बर्हिः प्रथ(ताँ साध्वन्तरहिँस्राणः पृथिवी) देव्यस्तु । वेदेनोत्करं०' । स्तम्बयजुर्हरणमुभयत्राविकृतम् । आग्नीध्र उत्करे न्युप्तमभिगृह्य उत्करस्थं तस्मादुत्तरत उपविश्य गृह्णाति । 'वसवस्त्वा' इत्युभयत्राविकृतम् । याजमानमुत्करे । 'बृहस्पते परिगृहाणोत्करँ (स्वगावो देवाः सदनानि सन्तु) । तस्मिन् बर्हिः प्रथताँ (साध्वन्तरहिँस्राणः पृथिवी देव्यस्तु) । इमौ नराः कृणुत वेद्युत्करावेत्य वसुमन्तौ रुद्रवन्तावादित्यवन्तौ । वर्ष्मन् दिवो ० जुष्टावदित्या उपस्थ इमौ देवा अजुषन्त०' । 'अपहतोऽररुः' इत्यविकृतमुभयत्र । उत्करे याजमानं द्वितीयमन्त्रे । 'यदुद्धन्तो (जिहिँसिम) जीवमस्या उत्करं चक्रमा (मनसा देवयन्तः । मा तेन हेड उपगाम भूम्याः शिवा नो विश्वैर्भुवनेभिरस्तु) । 'देवस्य सवितुः' इति खननान्तं कृत्वा ।

६. इध्माबर्हिराहरणम्

पुष्पितं छिन्नप्ररूढं वा बर्हिराहर । मुष्टिसमुदायात्मकानि अयुजो युजो वा निधनानि कृत्वा तेषां कलापत्रयं कृत्वा तूष्णीमेकैकेन शुल्बेन तूष्णीमेकैकं कलापं संनह्य पुनर्मन्त्रेण शुल्वं कृत्वा मन्त्रेण प्रस्तरसहितं कलापत्रयमेकत्र संनह्याहरति । उत्करार्थं च मुष्टित्रयं लवनसमय एव प्रस्तरवर्जं लुनाति । तत्संनहनोत्तरं संनहनम् । 'आपस्त्वा' इति सकृत् । 'इन्द्रस्य वां ० । उर्वन्तरिक्षं प्रेतम् । आदित्याः सद आसीदतम् । देवंगमे स्थः । अदित्या वां पृष्ठे सादयामि' ।

एवमिध्मं प्रसूमयम् । विँशतिकाष्ठानां भागत्रयं कृत्वा परिधित्रयं भा ये निक्षिप्य एकैकं भागं तूष्णीं संनह्य । मन्त्रे 'त्रयोविँशतिधा' इत्यूहः । 'कृष्णोऽसि' इति संनह्याहरति । अन्तर्वेदि शाखायाः पर्णानि प्रशात्यासर्वाणि । मूलत उपवेषार्थं परिवास्य । 'उपवेषोऽसि यज्ञाय (त्वां परिवेषमधा)रयन् । विश्वेभ्यो देवेभ्यो हविः क्रण्वन्तः शिवः (शग्मो भवा)सि नः' (तैब्रा ३.७.४) शाखामूलस्योपवेषं करोति । 'त्रिवृत्पलाशे दर्भे (इयान् प्रादेशसंमितः । यज्ञे पवित्रं पोतृतमं पयो हव्यं करो)तु मे' (तैब्रा ३.७.४) तस्यां शाखायां दर्भमयं पवित्रमविदलं त्रिवृत् करोति । मूले मूलमुपसृजत्यग्रेऽग्रं न ग्रन्थिं करोति ।

७. सायंदोहः

ततः सायँ हुतेऽग्निहोत्रे उत्तरेण गार्हपत्यं दर्भान् सँस्तीर्य तेषु सान्नाय्यपात्राणि प्रक्षाल्य द्वन्द्वं न्यञ्चि प्रयुनक्ति । अग्निहोत्रहवणीँ सान्नाय्यतपनीमुखाम् । उपवेषँ शाखापवित्रम् । अभिधानीं निदाने । दोहनमपिधानमयस्पात्रं दारुपात्रं वा । 'पवित्रे स्थो वै ० इमौ प्राणापानौ ० विष्णोर्मनसा०' । 'गां दोहपवित्रे रज्जुँ सर्वा पात्राणि शुन्धत' (तैब्रा ३.७.४) इति संप्रेष्यति । अग्निहोत्रहवण्यां पवित्रान्तर्हितायामप आनीय । 'देवो वः स(वितोत्पुनातु) । अच्छिद्रेण पवित्रेण । वसोः सूर्य(स्य रश्मिभिः)' (तैसं १.१.५) । 'आपो देवीरग्रे ०' । 'आपो देवीः शुद्धा स्थ' इति वा । 'शुन्धध्व दैव्याय (कर्मणे देव)यज्यायै' (तैसं १.१.३) उत्तानानि पात्राणि कृत्वा त्रिः सर्वाभिरद्भिः प्रोक्षति । 'एता आचरन्ति (मधुमद्दुहानाः प्रजावतीर्यशसो विश्वरूपाः । बह्वीर्भवन्तीरुपजायमाना) इह वो विश्वेदे । रमयन्तु गावः' (द्र. तैब्रा ३.७.४) इति गा आयतीः प्रतीक्षते ।

'धृष्टिरसि ब्रह्म यच्छ '(तैसं १.१.७) उपवेषमादाय । 'निरूढं जन्यं भयँ सह तेन यं द्विष्मः सुभूताय श्रयध्वम् ' इति तेनोपवेषेण गार्हपत्यादुदीचोऽङ्गारान् निरूह्य । 'अप्रस्रँसाय यज्ञस्योखे उपदधाम्यहम् । पशुभिः संनीतं बिभृतां विश्वेभ्यो देवेभ्यो दधि ' (द्र. तैब्रा ३.७.४) इति तेष्वङ्गारेषु सान्नाय्यतपनीं कुम्भीमधिश्रयति । 'भृगूणामङ्गिरसां तपसा तप्यस्व ' इति कुम्भीमङ्गारैः परीन्धे । 'उपसृष्टां मे प्रब्रूतात् ' इति संप्रेष्यति । 'वसूनां पवित्रमसि सहस्रधारम् ' इति कुम्भ्यां प्रागग्रँ शाखापवित्रमादधाति । अन्वारभ्य वाचं यच्छति । धारयन्नास्ते ।

'अदित्यै रास्नासि ' अभिधानीमादत्ते । 'त्रयस्त्रिँशोऽसि तन्तूनां (पवित्रेण सहाऽऽगहि । शिवेयँ रज्जुरभिधान्यघ्नियामुपसेवताम्) ' (तैब्रा ३.७.४) इति वा । 'पूषासि ' इति वत्समुपसृजति । 'विहारं गां चोपसृष्टामन्तरेण मा संचारिष्ट ' इति संप्रेष्यति । 'अयक्ष्मा वः प्रजया (सँसृजामि रायस्पोषेण बहुला) भवन्तीः ' उपसृष्टां गामनुमन्त्रयते । 'ऊर्जं पयः (पिन्वमाना घृतं च जीवो जीवन्तीरुप वः) सदेयम् ' (तैब्रा ३.७.४) इत्युपसन्नां गामनुमन्त्रयते । 'द्यौश्चेमं यज्ञं (पृथिवी च संदुहातां धाता सोमेन सह वातेन वायुः । यजमानाय द्रविणं) दधातु ' (तैब्रा ३.७.४) इति दुह्यमानाम् । 'उत्सं दुहन्ति (कलशं चतुर्बिलमिडां देवीं मधुमतीँ सुवर्विदम् । तदिन्द्राग्नी जिन्वतँ सूनृतावत् तद्यजमानममृत)त्वे दधातु ' (तैब्रा ३.७.४) धाराघोषमनुमन्त्रयते । दोग्धा हरति तं पृच्छति । 'कामधुक्षः (प्र णो ब्रू) हि विश्वेभ्यो देवेभ्यो हविरिन्द्रियम् । गङ्गां य(स्यां देवानां मनुष्याणां पयो) हितम् ' (द्र. तैब्रा ३.७.४) गोधुगाचष्टे । अध्वर्युः । 'सा विश्वायुः ' (तैसं १.१.३) प्रत्युच्य । 'देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुपुवा ' (द्र. वासं १.३) इति दुग्धं कुम्भ्यामानयति । 'पूषासि ' इत्यादि 'सुपुवा ' इत्यन्तं 'विहारं गां च ' इति प्रैषवर्जम् उत्तरे दोहयति । 'यमुनां य० । सा विश्वव्यचाः ' इति द्वितीयस्यां विशेषः । 'सरस्वतीं यस्यां० । सा विश्वकर्मा ' इति तृतीयस्यां विशेषः । तिस्रो दोहयित्वा । 'बहु दुग्धि विश्वेभ्यो देवेभ्यो देवेभ्यो हव्य(माप्यायतां पुनर्वत्सेभ्यो मनुष्येभ्यः पुनर्दोहाय) कल्पताम् ' (तैब्रा ३.७.४) इति त्रिः संप्रेष्यति । विसृष्टवागनन्वारभ्योत्तरा दोहयति । पूर्ववन्मन्त्रेण तूष्णीं वा । 'हुतः स्तोको हुतो (द्रप्सोऽग्नये बृहते नाकाय स्वाहा द्यावापृथि)वीभ्याम् ' (तैसं १.१.३) इति विप्रुषोऽनुमन्त्रयते । 'द्यौश्चेमं यज्ञं (पृथिवी च संदुहातां धाता सोमेन सह वातेन वायुः । यजमानाय द्रवि)णं दधातु ' इति सान्नाय्यमनुमन्त्रयते । दोहनँ संक्षाल्य । 'संपृच्यध्वमृताव(रीरूर्मिणीर्मधुमत्तमामन्द्रा धनस्य सा)तये ' (तैसं १.१.३) इति संक्षालनँ सान्नाय्यकुम्भ्यामानयति ।

सुशृतँ श्रपयित्वा तूष्णीकेन सर्पिषाभिघार्य । 'दृँह गा दृँह गोपतिं मा वो यज्ञपतीरिषत् ' इति कर्षन्निव प्रागुदग्वोद्वासयति । यावत् कुम्भीबुध्नं शीतं भवति तावत् प्रतीक्षते । 'सोमेन त्वाऽऽतनच्मि विश्वेभ्यो देवेभ्यो दधि ' (द्र. तैसं १.१.३) इत्याम्लेन दध्नाऽऽतनक्ति । 'यज्ञस्य संततिरसि यज्ञस्य त्वा संततिमनु संतनोमि ' (तैब्रा ३.७.४) इत्यग्निहोत्रोच्छेषणं कुम्भ्यामानयति । 'आपो हविष्षु जागृत यथा देवेषु जाग्रथ । एवमस्मिन् यज्ञे यजमानाय जागृत ' इत्यपिधानार्थे पात्रेऽप आनयति । 'अदस्तमसि विष्णवे त्वा यज्ञायापि(दधाम्यहम् । अद्भिररिक्तेन पात्रेण याः पूताः परि) शेरते ' (तैब्रा ३.७.४) इति तेनोदन्वतापिदधाति । यद्यपिधानं मृन्मयँ स्यात् तदा तस्मिन् तृणं काष्ठं वा प्रविध्येत् । 'इमौ पर्णं च दर्भं च (देवानाँ हव्यशोधनौ । प्रातर्वेषाय गोपाय विष्णो हव्यँ) हि रक्षसि' (तैब्रा ३.७.४) इति कुम्भ्याः शाखापवित्रमुन्मुच्य प्रज्ञातं निदधाति । निधाने मन्त्रः 'विष्णो हव्यँ रक्षस्व ' (तैसं १.१.३)इति सान्नाय्यं गार्हपत्यदेश उपरि निदधाति ।

ततः पूर्ववदन्यां शाखामाहृत्य तया दर्भैर्वा 'वायवः स्थो(पायवः स्थ)' पूर्ववत् वत्सानपाकरोति । ततः आरण्यस्याशनम् । 'परिस्तृणीत ०। 'उभावग्नी उप ०' ।

८. पात्रासादनम्

प्रातरग्निहोत्रं हुत्वा प्रागुदयात् तन्त्रं प्रक्रमयति । 'कर्मणे वां ०' । पात्रासादनकाले । स्फ्यं चतुष्टयान्यष्टाविंशतिकपालानि तिस्रः स्थालीस्त्रीणि मेक्षणानि स्रुवं जुहूं वाजिनपात्रं पालाशं स्रुचं चमसं वा उपभृतं पृषदाज्यधानीं ध्रुवाम् आज्यस्थालीं दधिस्थालीं कुटरुं पाल्या सह आशयपात्रम् आमिक्षावाजिनयोरुद्धरणपात्रे च प्रातर्दोहपात्राणि उखां शाखापवित्रमभिधानीं निदाने दोहनम् अरणी प्राकृते अधिमन्थनशकलं दर्भी च । अन्वाहार्यस्थालीवर्जं शेषाणि प्रकृतिवत् । ब्रह्मवरणम् । पूर्वेद्युः कृते पवित्रे । 'दक्षाय त्वा' इत्यादि ।

९. हविर्निर्वापः

निर्वपणकाले । 'अग्नये जुष्टं निर्व ०। 'सोमाय जुष्टं ०' । 'सवित्रे जुष्टं ०' । 'सरस्वत्यै जुष्टं ०' । 'पूष्णे जु ०' । एतानि पञ्च संचराणि प्रतिपर्व । 'मरुद्भ्यो जुष्टं ०' । 'द्यावापृथिवीभ्यां जुष्टं ०' । 'इदम्' इत्यादि ० । 'अग्ने हव्यं रक्षस्व (तैसं १.१.४) । सोम ह(व्यं रक्षस्व) । सवितर्ह(व्यं रक्षस्व) । सरस्वति ह(व्यं रक्षस्व) । पूषन् ह(व्यं रक्षस्व) । मरुतो हव्यं (रक्ष) ध्वम् । द्यावापृथिवी ह(व्यं रक्षे)थाम्' । स ० 'देवो वः' इत्यादि ० । 'देवस्य त्वा (सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो ह)स्ताभ्यामग्नये सवित्रे सरस्वत्यै पूष्णे वो जुष्टं प्रोक्षामि सोमाय मरुद्भ्यो द्यावापृथिवीभ्याम्' । ० 'शुन्धध्वम्' इत्यादि ० ।

'अंशवः स्थ' अन्ते 'यथाभागं व्यावर्तध्वम्' इति सकृदुक्त्वा चरुपुरोडाशविवेकेन राशिद्वयं कृत्वा प्रथमराशौ देवता उपलक्षयेत् । 'इदमग्नये च सवित्रे च मरुद्भ्यश्च द्यावापृथिवीभ्यां च' । द्वितीयराशौ । 'इदं सोमाय च सरस्वत्यै च पूष्णे च' । ततः 'यथाभागं व्यावर्तध्वम्' इति चरुराशेः पौष्णमपच्छिद्य पुरोडाश्यैः सह पिनष्टि । ततः अधिवपनादि ।

१०. कपालोपधानम्

उपधानकाले । 'अपाग्ने' इत्यादि सर्वेषाम् । आग्नेयस्याष्टौ कपालानि । 'ध्रुवासि' इति सौम्यस्थालीम् । सवितुः 'चिदसि' इत्यावृत्या अष्टाकपालवत् द्वादशकपालानि । ततः सारस्वतपौष्णयोः स्थाल्यौ । मारुतस्य सप्तकपालान्यैन्द्राग्नवत् । ततः प्रातर्दोहं दोहयति । 'निरूढम्' इत्यादि 'सं पृच्यध्वम्' इत्यन्तम् । ऊहः सायंदोहवत् । 'अप्रस्रंसाय ० शृतम्' इति मन्त्रान्तः । ततः द्यावापृथिव्यस्यैककपालम् । स्थाल्यैककपालानां 'भृगूणामङ्गिरसां तपसा तप्यस्व' इत्यूहः ।

११ हविःश्रपणम्

पिष्टानि समोप्य पात्रान्तरे शूर्पादेव तण्डुलान् समोप्य मन्त्रेण । 'हर्योस्त्वा' इति पिष्टान्युत्पूय 'देवो वः' इति तण्डुलानुत्पुनाति त्रिः । पिष्टेषूभयीरप आनीय स्थालीष्वानयति । 'जनयत्यै त्वा' इति पिष्टेष्वेव । पिण्डं कृत्वा 'यथाभागं व्यावर्तध्वम्' इति मन्त्रावृत्या पिण्डानपच्छिद्य । 'यथाभागं व्यावर्तेथाम्' इत्युत्तमौ । 'इदं मरुद्भ्यः । इदं द्यावापृथिवीभ्याम्' इत्युत्तमयोरेव देवतादेशनम् । 'यथाभागं व्यावर्तेथाम्' इति तण्डुलान् विभज्य । 'इदं सोमाय । इदं सरस्वत्यै' इति निर्दिश्य । पौष्णव्यतिरिक्तानां कूर्माकृतिः । 'इदमहम्' इति कपालेष्वेव । आग्नेयं पिण्डमधिश्रित्य ।

'घर्मा: स्थ' इति स्थाल्यां सौम्यतण्डुलान् । स्था्वत्वं पिण्डमधिश्रित्य । ततः सारस्वततण्डुलानोप्य पौष्णमधिश्रित्य मारुतमधिश्रयति । तप्ते प्रातर्दोहे सायंदोहं तूष्णीमानयत्यामिक्षां करोति । तत एककपालमधिश्रयति । 'उरु प्रथस्व' इत्यादि । प्रथनपरिमार्जनाभिज्वलनभस्माध्यूहनानि न चरुषु ।

१२. वेदिसंस्कारः

प्रक्षालनं निनीय । 'ब्रह्मन्नुत्तरौ परिग्राहौ परिग्रहीष्यामि' । ब्रह्मा । 'बृहस्पते परिगृहाण वेद्युत्करौ स्व(गावो देवाः सदनानि सन्तु)। तयोर्बर्हिषी प्रथेतां साध्वन्तरहिँस्राणः पृथिव्यौ देव्यौ स्ताम् । देवता वर्ध (यैता नाकस्य पृष्ठे यजमानो अस्तु । सप्तर्षीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि । ओं परिगृहाण')। 'ऋतमसि' इत्यादि वेद्यामुत्करे चाविकृतम् । याजमानं वेद्यां प्रकृतिवत् । 'बृहस्पते परिगृहाणोत्करँ स्व(गावो देवाः सदनानि सन्तु) । तस्मिन् बर्हिः प्र(थतां साध्वन्तरहिँस्राणः पृथिवी देव्यस्तु') इत्युत्करे । 'पुरा क्रूरस्य' इति सकृत् । 'भूमी भूत्वा महिमानं पुपुषतुस्ततो देव्यौ वर्धयेते पयाँसि । यज्ञिया०' । 'प्रोक्षणीरासादये-(ध्माबर्हिरुपसादय स्रुवं च स्रुचश्च संमृड्ढि पत्नीँ) संनह्याज्येन दध्ना चोदेहि' ।

१३. आज्यानयनम्

जुहूँ संमृज्य तूष्णीं वाजिनपात्रम् । उपभृतँ संमृज्य तेनैव पृषदाज्यधानीम् । ध्रुवासंमार्गादि । 'पूषा ते बिलं विष्यतु' इति द्विः । 'इदं विष्णुः' इत्याज्यस्यैव । 'अदिती स्थो नाच्छिन्नपवित्रे' इत्याज्यदधिस्थाल्यावादाय 'महीनाम्' इत्याज्यं निरुप्य 'महीनाम्' इति दधिस्थाल्यां दधि निर्वपति । 'इषे त्वा । ऊर्जे त्वा' इत्याज्यस्यैव । 'महीनां पयसी स्थ ओषधीनाँ रसावदब्धेन वां चक्षुषावेक्षे सुप्रजास्त्वाय' इत्याज्यदधिनी अवेक्ष्य । अवेक्षणस्य आज्यसंस्कारकत्वात् । 'तेजोऽसि । तेजसे त्वा' इत्याज्यस्यैव । 'तेजसी अनुप्रेतम्' । 'अग्निस्ते' इत्याज्यस्यैव । 'अग्नेर्जिह्वे स्थः सुभवौ देवानां धा(म्ने धाम्ने देवेभ्यो यजुषे) यजुषे भवतम्' । 'आज्यदधिनी स्थः सत्ये स्थः सत्यस्याध्यक्षे स्थो हविषी स्थो वैश्वानरे वैश्वदेवे उत्पूतशुष्मे सत्यौजसी सहसी स्थः सहमाने स्थः सहेथामरातीः सहेथामरातीयतः सहेथां पृतनाः सहेथां पृतन्यतः । सहस्रवीर्ये स्थस्ते मा जिन्वतमाज्यदध्नोराज्यदधिनी स्थः सत्यस्य सत्ये स्थः सत्यायुषी स्थः सत्यशुष्मे स्थः सत्येन वामभिघारयामि तयोर्वां भक्षीय' (द्र. तैसं १.६.१) । आज्यदध्नोः 'शुक्रमसि' इत्यावर्तते । यजमानः । 'अद्भिराज्यदधिनी आज्यदधिभ्यामपः सम्यक् पुनीत सवितुः पवित्रैः । ता देवीः शक्वरीः शाक्वराभ्यामिमं यज्ञ-(मवत संविदानाः') ।

अध्वर्युः । जुहूपभृतोश्चतुर्गृहीते गृहीत्वा पृषदाज्यधान्यां पञ्चगृहीतं पृषदाज्यं गृह्णाति पशुवत् । आज्यस्थालीगतस्याज्यतृतीयांशं दधन्यानीय । 'ज्योतिरसि विश्वरूपं विश्वेषां देवानां समित्' (वासं ५.३५) इति पञ्चगृहीतं पृषदाज्यं गृह्णाति । याजमानं 'ब्रह्मणस्त्वा' इत्यादि । 'सुवीर्याय' इति द्विः । चैत्रीश्रावणीमार्गशीर्षेषु तु पृषदाज्यधान्यां द्विराज्यस्योपस्तीर्य । 'महीनां पयोऽसि विश्वेषां देवानां तनूर्ऋध्यासमद्य पृषतीनां ग्रहं पृषतीनां ग्रहोऽसि विष्णोर्हृदयमस्येकमिष विष्णुस्त्वानु वि चक्रमे भूतिर्दध्ना घृतेन वर्धतां तस्य मेष्टस्य वीतस्य द्रविणमा गम्याज्ज्योतिरसि वैश्वानरं पृश्नियै दुग्धम्' (तैसं ३.२.६) इति तेनैव द्विर्दधि गृहीत्वा तेनैव सकृदाज्येनाभिघारयति । एतद्व्यतिरिक्तेषु कालेषु सर्वत्र पशुवत् । प्रकृतिवद् ध्रुवायाम् ।

प्रोक्षणकाले वेदिं प्रोक्ष्य । 'उत्करोऽसि बर्हिषे त्वा स्वाहा' इत्युत्करम् । बर्हिः प्रोक्ष्य । 'बर्हिरसि स्रुचे त्वा स्वाहा' इत्युत्करबर्हिः । '(बर्हिरसि) चमसाय त्वा स्वाहा' इति चमसपक्षे । अन्तर्वेद्युभयमासाद्य 'दिवे त्वा' इत्यादि क्रमेणावर्तते । याजमानमप्यावर्तते । स्रुच्यग्राणीति क्रमेणोभयोः । 'स्वधा पितृभ्यः' इति वेद्यामेव । 'पूषा ते०' इत्युभयोः ।

बर्हिषा वेदिमित्यादि । अविकृतं वेद्यामाध्वर्यवं याजमानं च । उत्करे तु याजमाने विशेषः । 'ऊर्णा मृदुः (प्रथमानँ स्योनं देवेभ्यो जुष्टँ सदनाय बर्हिः । सुवर्गे लोके यजमानँ हि धेहि मां नाकस्य पृष्ठे परमे व्योमन्)' । 'चतुःशिखण्डो युवा सुपेशा घृतप्रतीको वयुनानि वस्ते । स स्तीर्यमाणो महते सौभगाय स मे धुक्ष्व यजमानाय कामान् । शिवश्च मे शग्मश्चैधि स्योनश्च मे सुषदश्चैध्यूर्जस्वाँश्च मे पयस्वाँश्चैधि सूपचरणश्च मे स्वधिचरणश्चैधि । इषमूर्जम्०' इत्याद्यविकृतम् ।

अनूयाजार्थे उल्मुक इत्याद्याजुह्वासादनात् प्रकृतिवत् । उत्करे न विधृती प्रस्तरश्च । वेद्यां जुहूमासाद्य उत्करे वाजिनपात्रं तूष्णीमासादयति । उपभृतमासाद्य तेनैव मन्त्रेण पृषदाज्यधानीम् । 'अवाहं बाध०' इत्यावर्तते याजमानम् । 'ध्रुवासि०' इत्यादि । न दधिस्थाल्या आसादनं याजमानं च ।

१४. हविरासादनम्

उद्वासनकाले । 'इदमहम्०' इति पुरोडाशानाम् । 'सूर्यं ज्योतिः०' इति सर्वेषाम् । 'स्योनं ते०' इति पुरोडाशत्रयार्थं पात्र्याम् । एककपालार्थमन्यस्मिन् पात्रे । 'आप्यायतां घृत(योनिरग्निर्हव्यानुमन्यताम् । खमङ्क्ष्व त्वचमङ्क्ष्व सुरूपं त्वा वसुविदं पशूनां) तेजसाग्नये जुष्टमभिघा(रयामि)' (तैब्रा ३.७.६) आग्नेयम् । तूष्णीं सौम्यम् । 'आप्याय(तां घृतयोनिरग्निर्हव्यानुमन्यताम् । खमङ्क्ष्व त्वचमङ्क्ष्व सुरूपं त्वा वसुविदं पशूनां) तेजसा सवित्रे जुष्ट(मभिघारयामि)' सावित्रम् । 'आप्या(यतां घृतयोनिरग्निर्हव्यानुमन्यताम् । खमङ्क्ष्व त्वचमङ्क्ष्व सुरूपं त्वा वसुविदं पशूनां) तेजसा सरस्वत्यै (जुष्टमभिघारयामि)' सारस्वतम् । 'आप्यायतां (घृतयोनिरग्निर्हव्यानुमन्यताम् । खमङ्क्ष्व त्वचमङ्क्ष्व सुरूपं त्वा वसुविदं पशूनां तेजसा) पूष्णे जु(ष्टमभिघारयामि)' पौष्णम् । तूष्णीं मारुतम् । 'यस्त आत्मा (पशुषु प्रविष्टो देवानां विष्ठामनु यो वितस्थे । आत्मन्वान्त्सोम घृतवान् हि भूत्वा देवान् गच्छ सुवर्विन्द यजमानाय मह्यम्' (तैब्रा ३.७.५) इत्यामिक्षाम् । तूष्णीमेककपालम् । क्रमेणोद्वासनम् । 'आर्द्रो भुवनस्य०' इति चरूणां स्थालीभिः सहोद्वासनम् । 'दृँह (गा दृँह गोपतिं मा वो यज्ञपतीरिषत्)' इत्यामिक्षामुद्वास्यान्यस्मिन् पात्र उध्दृत्य वाजिनं पात्रान्तर उध्दृत्य तेनामिक्षामुपसिच्य । अन्यस्मिन् पात्र एककपालमुद्वासयति । 'इरा भूतिः०' इति कपालानामेव । अलंकरणं नास्त्यामिक्षायाः । 'देवस्य त्वा०' इत्येककपालमलंकृत्य लौकिकेन सर्पिषाविःपृष्ठं करोति ।

व्याहृतिभिर्हवींष्यासादयति । दक्षिणत आग्नेयविकाराणि उत्तरतोऽन्यानि । सौम्यद्यावापृथिवीयावग्नीषोमीयविकारौ । मारुत ऐन्द्राग्नविकारः । अन्ये आग्नेयविकाराः । आमिक्षा प्रातर्दोहविकारः । वाजिनं सायंदोहविकारः । तूष्णीमुत्करे वाजिनमासादयति । 'यज्ञाः स्थ सर्वतः श्रिताः सर्वतो मां भूतं भविष्यच्छ्रयन्तां ०' इत्याग्नेयसावित्रसारस्वतपौष्णानामभिमन्त्रणम् । 'प्रजापती स्थः सर्वतः श्रितौ (सर्वतो मां भूतं भविष्य)च्छ्रयेतां शतं (मे सन्त्वाशिषः सहस्रं मे सन्तु सूनृता इरावतीः पशुमतीः)' (द्र. तैब्रा ३.७.६) इति सौम्यद्यावापृथिवीययोः । 'यो नः कनीय (इह कामयाता अस्मिन् यज्ञे यजमानाय मह्यम्) अपतं मरुतो भुवनां नुदन्तामहं (प्रजां वीरवतीं विदेय)'

(द्र. तैब्रा ३.७.६) इति मारुतस्य । 'यस्त आत्मा पशुषु (प्रविष्टो देवानां विष्ठामनु यो वितस्थे । आत्मन्वान्त्सोम घृतवान् हि भूत्वा देवान् गच्छ सुवर्विन्द यजमानाय मह्यम्)' (तैब्रा ३.७.५) इत्यामिक्षावाजिनयोरासाद्यमानयोः । 'इयमिन्द्रियममृतं वीर्यमनयेन्द्राय पशवो चिकित्सन् । तया देवा (अवतोप मामिहेषमूर्जं यशः सह ओजः) सनेयमामिक्षा मयि श्रयताम्' (द्र. तैब्रा ३.७.६) इत्यामिक्षायाः । 'यत्पृथिवीम(चरत् तत्प्रविष्टं येनासिञ्चद्बलमिन्द्रे प्रजापतिः । इदं तच्छुक्रं मधु वाजिनीवद्येनोपरिष्टादधिनो)न्महेन्द्रं वाजिनं मां धिनोतु' (द्र. तैब्रा ३.७.६) इति वाजिनस्य । 'अयं यज्ञः ०' । विहव्यम् । चतुर्होता पञ्चहोता । वाजिनस्यापि 'अयं यज्ञः०' पञ्चहोता ।

१५. अग्निमन्थनम्

निर्मन्थ्येन प्रचरति । 'अग्नेर्जनित्रमसि' (तैसं १.३.७) अधिमन्थनशकलमादाय । अपरेणाहवनीयं बर्हिषि निदधाति । 'वृषणौ स्थः' (तैसं १.३.७) प्राञ्चौ दर्भौ शकलेऽवदधाति । 'उर्वश्यसि' (तैसं १.३.७) अधरारणिमादत्ते । 'पुरूरवाः' उत्तरारणिम् । 'घृतेनाक्ते' (तैसं-१.३.७) उभयोः संधानदेशावाज्यस्थाल्या आज्येनानक्ति । 'आयुरसि' (तैसं १.३.७) समवदधाति । 'अग्नये मथ्यमानायानुब्रूहि' संप्रेष्यति । त्रिरनूक्तायाम् । 'गायत्रं छन्दोऽनु प्र जायस्व' (तैसं १.३.७) प्रथमम् । 'त्रैष्टुभं छन्दोऽनु प्र जायस्व' द्वितीयम् । 'जागतं छन्दोऽनु प्र जायस्व' तृतीयम् । एतैस्त्रिः प्रदक्षिणमावृत्य ततो यथासुखं मन्थति । 'जातायानुब्रूहि' जाते संप्रेष्यति । 'प्रह्रियमाणायानुब्रूहि' प्रह्रियमाणे । 'भवतं नः समनसौ समोकसावरेपसौ । मा यज्ञँ हिँसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः' (तैसं १.३.७) इत्युत्तरपरिधिसंधिमनुप्रहरति । 'अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः । स्वाहाकृत्य ब्रह्मणा ते जुहोमि मा देवानां मिथुयाकर्भागधेयँ स्वाहा' (तैसं १.३.७) स्रुवेण जुहोति । प्रविष्टायाग्नय इदं (न मम) ।

१६. प्रयाजयागः

वेदं निधायेत्यादि । नव प्रयाजान् यजति । प्रकृतिवत् त्रयः । प्रकृतिवदनुमन्त्रणं त्रयाणाम् । चतुर्थेऽर्धमौपभृतं जुह्वामानीय । तेन चतुर्थपञ्चमषष्ठसप्तमान् यजति । यजमानः । बर्हिष इदं (न मम) । दुर्भ्य इदं (न मम) । उषासानक्ताभ्यामिदं (न मम) । दैव्याभ्याँ होतृभ्यामिदं (न मम)। अध्वर्युः । अष्टमे सर्वमौपभृतं जुह्वाँ समानयते । यजमानः । तिसृभ्यो देवीभ्य इदं (न मम) । बर्हिः-प्रभृतिपञ्चानां 'शरदम्०' इत्यनुमन्त्रणम् । उत्तरार्धे यागः । नवमं मध्ये यजति । अग्नये सोमायाग्नये सोमाय सवित्रे सरस्वत्यै पूष्णे मरुद्भ्यो विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यां देवेभ्य आज्यपेभ्योऽग्नये स्विष्टकृत इदं (न मम) । 'हेमन्तशिशिरा(वृतूनां प्रीणामि तौ मा प्रीतौ प्रीणीताम्') (तैसं १.६.२) इत्यनुमन्त्रणम् । हवीँष्यभिघार्य वाजिनं च । पृषदाज्यधानीमन्ततः । नोपभृतम् ।

१७. प्रधानयागः

आज्यभागाविष्ट्वा । यथाक्रमं हविषां प्रचारः । अग्निं प्रकृतिवद्यजति । 'सोमायानुब्रूहि' । 'सोमं यज' । सोमायेदं (न मम) । 'सोमस्याहं (देवयज्यया) वृत्रहा भूयासम्' । 'सवित्रे' इत्युपाँशु 'अनुब्रूहि' इत्युच्चैः । 'सवितारं' उपाँशु 'यज' उच्चैः । सवित्र इदं (न मम) । 'सवितुरहं (देवयज्यया)न्नादो (भूयासम्)' । 'सरस्वत्या अनुब्रूहि' । 'सरस्वतीं यज' । सरस्वत्या इदं (न मम) । 'सरस्वत्या अहं (देवयज्य)या वाचमन्नाद्यं पुषेयम्' । 'पूष्णेऽनुब्रूहि' । 'पूषणं यज' ।

पूष्ण इदं (न मम)। 'पूष्णोऽहं (देवयज्यया) पुष्टिमान् पशुमान् भूयासम्'। 'मरुद्भ्योऽनुब्रूहि'। 'मरुतो यज'। मरुद्भ्य इदं (न मम)। 'मरुतामहं (देवयज्य)येन्द्रियाव्यन्नादो भूयासम्'। 'विश्वेभ्यो देवेभ्योऽनुब्रूहि'। 'विश्वान् देवान् यज'। विश्वेभ्यो देवेभ्य इदं (न मम)। 'विश्वेषां देवानामहं (देवयज्य)या प्राणैः सायुज्यं गमेयम्'। कृत्स्नमेककपालमवदाय द्विरभिघार्य। 'द्यावा-पृथिवीभ्यां' उपांशु 'अनुब्रूहि' इत्युच्चैः। 'द्यावापृथिवी' इत्युपांशु 'यज' इत्युच्चैः। आशयमनु-पर्यस्य ऋजुं प्रतिष्ठितमपर्यावर्तयन् जुहोति। द्यावापृथिवीभ्यामिदं (न मम)। 'द्यावापृथिव्योरहं (देवयज्य)योभयोर्लोकयोर्ऋध्यासं भूमानं प्रतिष्ठां गमेयम्'। प्रत्याक्रम्य ध्रौवाच्चतुर्गृहीतं गृहीत्वा एककपालं विग्राहमभिजुहोति। 'मधुश्च स्वाहा'। मधव इदं (न मम)। 'माधवश्च स्वाहा'। माधवायेदं न मम। 'शुक्रश्च स्वाहा'। शुक्रायेदं (न मम)। 'शुचिश्च स्वाहा'। शुचय इदं (न मम)।

स्विष्टकृदादि। आग्नेयसावित्रसारस्वतपौष्णानां विरुज्य प्राशित्रम्। अविरुज्यैवोत्तरयोः। नामिक्षायाः प्राशित्रम्। तस्याः पृथग्यजमानभागः। आग्नेयविकाराणामेव चतुर्धाकरणम्।

१८. दक्षिणा

मात्रा सह प्रथमजो वत्स एकवार्षिको दक्षिणा। 'ब्रह्मन् ब्रह्मासि ०'। 'प्रजापतेः०' इत्य-विकृतौ। 'अयं गौरमृतस्य पूर्णः सहस्रधार उत्सो अक्षीयमाणः। (स दाधार पृथिवीमन्तरिक्षं दिवं) च तेन गवातितराणि मृत्युम्'। 'दक्षिणत एत ब्राह्मणा अयं गौः यथाभागमहिँसन्तः प्रतिगृह्णीध्वम्'। 'देवस्य त्वा ० रुद्राय गां तेन ०' इति प्रतिग्रहो वत्सस्यैव।

१९. अनूयाजयागः

'ब्रह्मन् प्रस्थास्यामः' इत्यादि० पृषदाज्यं जुह्वामानीय पृषदाज्यधानीमुपभृतं कृत्वा सकृदति-क्रान्तस्तेन नवानूयाजान् यजति। 'देवान् यज' इति प्रथममनूयाजँ संप्रेष्यति। द्वितीयतृतीययोर्न प्रैषः। आश्रावणप्रत्याश्रावणमात्रमेव कर्तव्यम्। चतुर्थप्रभृति 'यज' इति प्रैषः। यजमानः। देवाय बर्हिष इदं (न मम)। 'बर्हि(षोऽहं देवयज्यया) प्रजावान् भूयासम्' (तैसं १.६.४)। देवीभ्यो द्वार्भ्य इदं (न मम)। 'द्वारामहं (देवयज्यया) प्रजावान् भूयासम्'। देवीभ्यामुषासानक्ताभ्या-मिदं (न मम)। 'उषासानक्तयोरहं (देवयज्यया) प्रजावान् (भूयासम्)'। देवीभ्यां जोष्ट्रीभ्या-मिदं (न मम)। 'जोष्ट्र्योरहं (देवयज्यया) पशुमान् भूयासम्'। देवीभ्यामूर्जाहुतीभ्यामिदं (न मम)। 'ऊर्जाहुत्योरहं देव(यज्यया) पशुमान् (भूयासम्)'। देवाभ्यां दैव्याभ्याँ होतृभ्यामिदं (न मम)। 'दैव्ययोर्होत्रोरहं (देवयज्य) यायुष्मान् यज्ञेन प्रति(ष्ठां गमेयम्)'। देवीभ्यस्तिसृभ्य-स्तिसृभ्यो देवीभ्य इदं (न मम)। 'तिसृणां तिसृणां देवीनामहं (देवयज्य)यायुष्मान् (यज्ञेन प्रतिष्ठां गमेयम्)'। देवाय नराशँसायेदं (न मम)। 'नराशँसस्याहं (देवयज्यया) पशुमान् (भूयासम्)' (तैसं १.६.४)। देवायाग्नये स्विष्टकृत इदं (न मम)। 'अग्नेः स्विष्टकृतोऽहं (देवयज्यया)युष्मान् (यज्ञेन प्रतिष्ठां गमेयम्)' (तैसं १.६.४)।

उपभृता सह पृषदाज्यधान्या व्यूहनम्। प्रस्तरसमञ्जनं च मन्त्रावृत्त्या। सह शाखया प्रस्तरं प्रहरति। यथादेवतमुज्जितयः। अग्नय इदं (न मम)। 'अग्नेरहमुज्जितिमनूज्जेषम्' (तैसं १.६.४)। सोमायेदं (न मम)। 'सोमस्याहमु(ज्जितिमनूज्जेषम्)' (तैसं १.६.४)। अग्नय इदं (न मम)। 'अग्नेरह(मुज्जितिमनूज्जेषम्)'। सोमायेदं (न मम)। 'सोमस्याहमु(ज्जिति-मनूज्जेषम्)'। सवित्र इदं (न मम)। 'सवितुरहमु(ज्जितिमनूज्जेषम्)'। सरस्वत्या इदं (न

मम) । 'सरस्वत्या अहमु(ज्जितिमनूज्जेषम्)' । पूष्ण इदं (न मम) । 'पूष्णोऽहमु(ज्जिति-मनूज्जेषम्)' । मरुद्भ्य इदं (न मम) । 'मरुतामहमु(ज्जितिमनूज्जेषम्)' । विश्वेभ्यो देवेभ्य इदं (न मम) । 'विश्वेषां देवानामहमु(ज्जितिमनूज्जेषम्)' । द्यावापृथिवीभ्यामिदं (न मम) । 'द्यावापृथिव्योरहमु(ज्जितिमनूज्जेषम्)' । अग्नये स्विष्टकृत इदं (न मम) । 'अग्नेः स्विष्ट-कृतोऽहमुज्जितिमनूज्जेषम्' ।

२०. वाजिनयागः

सँस्रावेणाभिहुत्य वाजिनेन चरति । यजमानः । पञ्चहोतारं व्याख्याय । अध्वर्युः । ध्रौवाज्येन स्रुचं चमसं वोपस्तीर्य 'मा भे(र्मा संविक्था मा त्वा हिँसिषं मा ते तेजोऽपक्रमीत् । भरतमुद्धरेमनु-षिञ्चावदानानि ते प्रत्यवदास्यामि नमस्ते अस्तु मा मा हिँसीः)' (तैब्रा ३.७.५) इत्यभिमृश्य बर्हिषि विषिञ्चन् स्रुवेण वाजिनं गृह्णाति । पूरयित्वा नाभिघारयति । स्रुक्पक्षे उपभृतमुपभृत्य । न चमसपक्षे । 'वाजिभ्योऽनूब्रूहि' संप्रेष्यति । दक्षिणातिक्रम्य । आश्राव्य प्रत्याश्राविते । 'वाजिनो यज' । वषट्कृते विषिञ्चन् स्वल्पं जुहोति । वाजिभ्य इदं (न मम) । 'वाजिनामहं देवयज्ययेन्द्रि-यावी भूयासम्' । ('वाजिनामहं देवयज्यया) जेमानं (महिमानं गमेयम्)' इति वा । अनुवषट्-कृते सशेषं जुहोति । अग्नय इदं (न मम) । 'अग्नेरहं (देवयज्यये)न्द्रियावी (भूयासम्)' । '(अग्ने-रहं देवयज्यया) जेमानं (महिमानं गमेयम्)' इति वा । शेषेण दिक्षु जुहोति । 'दिशः स्वाहा' पुर-स्तात् । दिग्भ्य इदं (न मम) । 'प्रदिशः स्वाहा' दक्षिणतः । प्रदिग्भ्य इदं (न मम) । 'आदिशः स्वाहा' पश्चात् । आदिग्भ्य इदं (न मम) । 'विदिशः स्वाहा' उत्तरतः । विदिग्भ्य इदं (न मम) । 'उद्दिशः स्वाहा' मध्ये । उद्दिग्भ्य इदं (न मम) । 'स्वाहा दिग्भ्यः' इति प्रदक्षिणमनुपरिषिञ्चति । दिग्भ्य इदं (न मम) । 'नमो दिग्भ्यः' इत्युपतिष्ठते । प्रत्याक्रम्य उत्करपात्रस्थं वाजिनं समुपहूय सर्वे भक्षयन्ति । यजमानः प्रथमो भक्षयत्युत्तमो वा । यजमानः । प्रथमपक्षे । 'होतरुपह्वयस्व । ब्रह्मन्नुपह्वयस्व । अध्वर्यवुपह्वयस्व । अग्नीदुपह्वयस्व' इत्युक्त्वा तैः प्रत्येकं 'उपहूतः' इत्यु-क्तो भक्षयति । 'वाजिनां भक्षो अवतु वाजो अस्मान् रेतः सिक्तममृतं बलाय । स न इन्द्र इन्द्रियं द्रविणं दधातु मा रिषाम वाजिनं भक्षयन्तस्तस्य ते वाजिन् वाजिभिर्भक्षंकृतस्य मधुमत उपहूतस्यो-पहूतो भक्षयामि' (द्र. वाकासं ३.९) इति यजमानो भक्षयति । एवं क्रमेण होतृब्रह्माध्वर्य्वाग्नीध्रा भक्षयेयुः । उपहवे यजमानः प्रथमः सर्वेषाम् । उत्तमभक्षणपक्षे यजमान उत्तमः ।

हविःशेषभक्षणादि । चत्वारः पत्नीसंयाजाः । न पार्वणः । आमिक्षायजमानभागप्राशने । 'इदँ हविः प्रजननं मे अस्तु दशवीरँ सर्वगणँ स्वस्तये । आत्मसनि प्रजासनि पशुसन्यभयसनि लोकसनि वृष्टिसनि । अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त । रायस्पोषमिषमूर्जमस्मासु दीधरत् स्वाहा' (द्र. तैब्रा २.६.३) । कपालविमोककाले । 'यानि घर्मे (कपालान्युप चिन्वन्ति वेधसः । पूष्णस्तान्यपि व्रत इन्द्रवायू वि मुञ्चताम्)' (तैसं १.१.७) इति कपालानाम् । 'यां घर्मे स्थालीमुप चिन्वन्ति (वेधसः) । पूष्णस्तामपि (व्रत इन्द्रवायू वि मुञ्चताम्)' इति स्थाल्याः । 'यद् घर्मे कपालमुपचिनोति (वेधसः) । पूष्णस्तदपि (व्रत इन्द्रवायू वि मुञ्चताम्)' इत्येककपालस्य । ब्राह्मणतर्पणान्तं संतिष्ठते ।

२१. वपनम्

सांवत्सरिकप्रयोगपक्षे श्वोभूते पौर्णमासेनेष्ट्वोदवसायानुदवसाय वा वपेत् । द्वादशाहे यथा-प्रयोगे तु तदानीमेव । अध्वर्युः । 'प्रसूता देवेन सवित्रा दैव्या आप उन्दन्तु दीर्घायुत्वाय वर्चसे' इति

यजमानस्य शिरोऽभ्युनत्ति । आर्द्रं करोतीत्यर्थः । ततस्त्रेण्या शलल्या इक्षुशलाकया वा केशान् विनायन् नम्रान् कुर्वन् । ताम्रयुक्तेन क्षुरेण निवर्तयति । छिनत्ति वक्ष्यमाणमन्त्रेण । 'ऋतमेव परमेष्ठी । ऋतं नात्येति किंचन । ऋते समुद्र आहितः । ऋते भूमिरियँ श्रिता । अग्निस्तिग्मेन शोचिषा । तप आक्रान्तमुष्णिहा । शिरस्तपस्याहितम् । वैश्वानरस्य तेजसा । ऋतेनास्य निवर्तये । सत्येन परिवर्तये । तपसास्यानुवर्तये । शिवेनास्योपवर्तये । शग्मेन स्याभिवर्तये' (तैब्रा १.५.५) इति । श्मश्रूणां तु वपनम् । तद्व्यतिरिक्तानां तु कर्तनम् । सर्वेषां वा वपनम् । यजमानः । 'तदृतं तत्सत्यम् । तद्व्रतं तच्छकेयम् । तेन शकेयं तेन राध्यासम्' (तैब्रा १.५.५) इति केशेषूप्यमाणेषु जपति । समाप्तं वैश्वदेवपर्व ।

वरुणप्रघासपर्व

१. संकल्पः

अथ वरुणप्रघासाः । वक्ष्यमाणप्रकारेण विहारं संपाद्य पात्राणि च संपाद्य । यजमानः । अपरेण गार्हपत्यं दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य देशकालौ संकीर्त्य 'वरुणप्रघासैर्यक्ष्ये । वरुणप्रघासेषु प्रतिप्रस्थातारं त्वामहं वृणे' इति प्रतिप्रस्थातारं वृत्वा । पूर्ववृता एवान्ये । उदवसानं वैकल्पिकम् । अग्नी अग्नीन् वा समारोप्य प्राचीनप्रवणे शम्यामात्रेष्वायतनेषु अग्नी अग्नीन् वा मथित्वा स्वे स्वे स्थाने निधाय । अत्र गार्हपत्यादाहवनीयाद्वा प्रणयनम् । अजस्रपक्षे त्वाहवनीयादेव । उभौ वक्ष्यमाणप्रकारेण स्वस्ववेद्योर्मानं कुरुतः । ततः वेद्योर्दक्षिणतस्तूष्णीं ब्रह्मयजमानावुपवेश्य अध्वर्युप्रतिप्रस्थातारौ उत्तरेण गार्हपत्यं दर्भान् सँस्तीर्य पात्राणि प्रयुङ्क्तः । अध्वर्युः । स्फ्यमग्निहोत्रहवणीँ शम्यामभ्रिं जुहूँ स्रुवं आज्यस्थालीमिध्मं प्रणयनीम् । उपयमनीः सिकताः गुग्गुलुसुगन्धितेजनं शुक्लोर्णास्तुकां पौतुद्रवान् परिधीन् उपवेषं हिरण्यं च प्रयुनक्ति । एवं प्रतिप्रस्थाता अभ्रिशम्याहिरण्यवर्जम् । उभौ तूष्णीं पवित्रे कृत्वा प्रोक्षणीः सँस्कृत्योत्तानानि पात्राणि प्रोक्ष्य जुहूँ स्रुवं च संमृज्य संमार्गान् अग्नावाधायाज्यँ सँस्कृत्य पवित्रेऽग्नावाधाय ।

२. वेदिकरणम्

दक्षिणस्या वेदेरुत्तरस्या श्रोणेरुत्तरस्या वेदेर्दक्षिणमँसं स्फ्येनैकस्फ्यामनुसंभिनत्ति । 'वेदो सि येन ०' इति वेदौ कुरुतः । ततो वेदी । उत्तरामध्वर्युर्दक्षिणां प्रतिप्रस्थाता । उत्करः साधारणः । उत्तरस्यावेदेरुत्तरतो द्विपदे उत्करः । तत्र उत्करे वेदिधर्मान् अध्वर्युरेव करोति । यजमानः । 'इदं तस्मै ०' इति त्रिः । प्रथममुत्तरवेद्यां ततो दक्षिणस्यां तत उत्करे । 'वेदेन वेदिम् ०' इति वेद्योरविकृतमुभयोः । यजमानः । 'चतुःशिखण्डे युवती सुपेशसौ घृतप्रतीके भुवनस्य मध्ये । मर्मृज्यमाने महते सौभगाय मह्यं दुहाथां यजमानाय कामान् । वेदाभ्यां वेदी बृहत्यावविन्दन्ते पृथिव्यां प्रथेतां पार्थिवानि । तयोर्बर्हिषी प्रथेताँ साध्वन्तरहिँस्राणः पृथिव्यौ देव्यौ स्ताम् । वेदाभ्यां वेदी विविदुः पृथिव्यौ ते पप्रथाते पृथिव्यौ पार्थिवानि । गर्भौ बिभृतो भुवनेष्वन्तस्ततो यज्ञो जायेते विश्वदानी' इति वेद्योस्तन्त्रेण । उत्करे आध्वर्यवं याजमानं च वैश्वदेववत् । 'देवस्य त्वा ०' इत्याद्युभयोः स्तम्बयजुर्हरणमविकृतम् । प्रतिप्रस्थाता प्रदक्षिणमावृत्याग्रेणोत्तरं विहारं गत्वाध्वर्युणा सहोत्करे निवपति । 'यो मा हृदा ०' इति याजमानमविकृतं तन्त्रेण । आग्नीध्रस्तन्त्रेणाविकृतं मन्त्रमुक्त्वा प्रतिगृह्णाति । तूष्णीं चतुर्थमित्यन्तं कृत्वा । अध्वर्युरुत्करे तृणनिधानाद्यविकृतं करोति ।

'ऋतमसि' इत्युभयोः पूर्वपरिग्राहौ । यजमानः । 'बृहस्पती परिगृह्णीतं वेदी स्वगावो देवाः (सदनानि सन्तु) । तयोर्बर्हिषी प्रथेताँ साध्वन्तरहिँस्राणः पृथिव्यौ देव्यौ स्ताम्' । अध्वर्यो-

रुत्करेऽपि 'ऋतमसि' इति पूर्वपरिग्राहः। वैश्वदेववद्याजमानम्। 'इमौ नरा ०' इत्यध्वर्योर्वैश्वदेववत्। प्रकृतिवत् प्रतिप्रस्थातुः। अविकृतमुद्धननमुभयोः। यजमानः। 'यदुद्धन्तो जिहिँसि(म पृथिवीमोषधी)रपः। अध्वर्यवः स्फ्यकृतः स्फ्याभ्यामन्तरिक्षं मो(रुपाव त)स्मात्। यदुद्धन्तो जिहिँसिम जीवमनयोर्वेदी चक्रमा मनसा देवयन्तः। मा तेन हेड उपगाम भूम्योः शिवे नो विश्वैर्भुवनेभिरस्ताम्'। आध्वर्यवं याजमानं च वैश्वदेववदुत्करे। यत्प्रागुत्तरस्मात् परिग्राहात् तदुभाभ्यां कृत्वा प्रतिप्रस्थाता विरमति।

३. उत्तरवेदिकरणम्

अध्वर्युरुत्तरस्यां वेद्यां पशुवदुत्तरवेदिं करोति। अध्वर्युः। शम्ययोत्तरवेदिं विमिमीते। उत्तरवेदिस्थानस्य पुरस्तादुदीचीनकुम्बाँ शम्यां निधाय। 'वित्तायनी मेऽसि' इति स्फ्येनोदीचीं लेखां शम्याया अभ्यन्तरं परिलिखति सर्वत्र। दक्षिणतः प्राचीनकुम्बां निधाय। 'तिक्तायनी मेऽसि' इति स्फ्येन प्राचीं लिखति। पश्चादुदीचीनकुम्बां निधाय। 'अवतान्मा नाथितम्' (तैसं १.२.१२) इत्युदीचीं लिखति। उत्तरतः प्राचीनकुम्बां निधाय। 'अवतान्मा व्यथितम्' (तैसं १.२.१२) इति प्राचीं लेखां लिखति। उत्तरस्या वेदेरुत्तरादँसादुत्तरतः प्रक्रमे चात्वालः। तमुत्तरवेदिकल्पेन तूष्णीं परिलिखति। ततः स्फ्यँ शम्यां निधाय। 'देवस्य त्वा सवि(तुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ता)भ्यामाददेऽभ्रिरसि नारिरसि' (तैसं १.३.१) इत्यभ्रिमादाय। 'विदेरग्निर्नभो नाम' (तैसं १.२.१२) इति चात्वालं जानुदघ्नं त्रिवितस्तं वा खात्वा। 'अग्ने अङ्गिरः' (तैसं १.२.१२) इत्यभ्रि मृदि प्रहरति। अप उपस्पृश्य। 'योऽस्यां पृथिव्यामसि' (तैसं १.२.१२) इति चात्वालात् मृत्पाँसूनादत्ते। 'आयुषा नाम्नेहि' (तैसं १.२.१२) इति हरति। 'यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वा दधे' (तैसं १.२.१२) इत्युत्तरवेद्यां निवपति। 'अग्ने अङ्गिरः' (तैसं १.२.१२) इत्यादि द्वितीयं तृतीयं च हरति। 'यो द्वितीयस्यां पृथिव्यामसि' (तैसं १.२.१२) इति द्वितीये मन्त्रसंनामः। 'यस्तृतीयस्यां पृथिव्या(मसि)' (तैसं १.२.१२) इति तृतीये। तूष्णीं चतुर्थं यावत्पर्याप्तम्। 'सिँहीरसि महिषीरसि' (तैसं १.२.१२) इत्युत्तरवेदिं करोति। 'उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम्' (तैसं १.२.१२) इति पुरीषं प्रथयति। 'ध्रुवासि' (तैसं १.२.१२) इत्युत्तरवेदिँ शम्यया सँहति। 'देवेभ्यः कल्पस्व' (कासं २.९) इत्युत्तरवेदिँ षट्त्रिँशदङ्गुलां कल्पयति। 'देवेभ्यः शुन्धस्व' (तैसं १.२.१२) शुद्धाभिरद्भिः प्रोक्षति। 'देवेभ्यः शुम्भस्व' (तैसं १.२.१२) सिकताभिरनुप्रकिरति। 'यत्ते क्रूरं यदास्थितं तत्त आ प्यायतां तत्त एतेन शुन्धताम्' (तैसं १.३.९) इति पुनरेवाद्भिरवोक्षति। उत्तरवेद्या उत्तरतः संलग्नां लेखां लिखित्वा यथा रेखायां जलं प्रवहति तथा। 'आपो रिप्रं निर्वहत' इति रेखायामपाँ शेषं निनयति। 'विभ्राड् बृहत् पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम्। वातजूतो यो अभिरक्षतु त्मना प्रजाः पिपर्ति बहुधा विराजति' (कपिसं २.३) इत्युत्तरवेद्या अन्तात् कल्पयति।' चतुःशिखण्डे युवती कनीने घृतप्रतीके भुवनस्य मध्ये। तयोर्देवा अधिसंवसन्त उत्तमे नाक इह मादयन्ताम्' इति वेदिमुत्तरवेदिं च सक्रन्मन्त्रमुक्त्वा संमृशति। उत्तरवेद्यां मध्ये गोःपदमात्रीमश्वशफमात्रीं प्रादेशमात्रीं वा चतुरस्रामुत्तरनाभिं करोति।

तूष्णींमग्निहोत्रहवण्यां प्रोक्षणीः सँस्कृत्य प्रदक्षिणमनुपरिक्रामन् प्रतिदिशमुत्तरवेदिं प्रोक्षति। 'इन्द्रघोषस्त्वा वसुभिः पुरस्तात् पातु' (तैसं १.२.१२) इति पुरस्तात् प्रोक्षति। 'मनोजवास्त्वा पितृभिर्दक्षिणतः पातु' (तैसं १.२.१२) दक्षिणतः। 'प्रचेतास्त्वा रुद्रैः पश्चात् पातु' (तैसं १.२.१२) पश्चात्। 'विश्वकर्मा त्वादित्यैरुत्तरतः पातु' (तैसं १.२.१२) इत्युत्तरतः। अप्रदक्षिणं

परिक्रामन् । 'त्वष्टा त्वा रुपैरुपरिष्टात् पातु' पश्चात्प्राङ्मुख उपरिष्टात् प्रोक्षति । दक्षिणतः स्फ्येन लेखामालिख्य पूर्ववत् । 'आपो रिप्रं निर्वहत' पूर्ववत् प्रोक्षणीशेषं निनयति । दक्षिणवेद्यां प्रतिप्रस्थाता तूष्णीमायतनं करोति ।

४. अग्निप्रणयनम्

आहवनीयेऽग्निप्रणयनान्यादीपयतः । उद्धरणपक्षे तु गार्हपत्यं विभज्य उपयमनीरुपयच्छतः । आहवनीयात् प्रणयनपक्षे अध्वर्युरन्यहस्तेऽग्निं दत्वा जुह्वां चतुर्गृहीतं गृहीत्वा दर्विहोमधर्मेण शेष आहवनीये जुहोति 'यत्ते पावक चकृमा कच्चिदागः पूर्वो यत्सन्नपरो भवासि । घृतेन त्वं तनुवो वर्धयस्व मा मा हिँसीरधिगतं पुरस्तात् स्वाहा' । अग्नये पावकायेदं (न मम) । इत्युद्यतहोमँ हुत्वा । 'अग्नये प्रणीयमानायानुब्रूहि' इत्यध्वर्युरेव संप्रेष्यति । त्रिरनूक्तायाम् उत्तरस्या वेदेरुत्तरेणोभौ हरतः । अध्वर्युः स्वायतनं प्राप्य तिष्ठति । प्रतिप्रस्थाताग्रेणोत्तरां वेदिं गत्वा स्वायतने तिष्ठति । अध्वर्युरन्यहस्तेऽग्निं दत्वा जुह्वां पञ्चगृहीतं गृहीत्वा हिरण्यमन्तर्धायाक्ष्णयोत्तरवेदिं व्याघारयति विग्राहम् । 'सिँहीरसि सपत्नसाही स्वाहा' (तैसं १.२.१२) इति दक्षिणेँसे । सिँह्या इदं (न मम) इति सर्वत्र त्यागः । 'सिँहीरसि सुप्रजावनिः स्वाहा' (तैसं १.२.१२) इत्युत्तरस्याँ श्रोण्याम् । 'सिँहीरसि रायस्पोषवनिः स्वाहा' (तैसं १.२.१२) इति दक्षिणस्याँ श्रोण्याम् । सिँहीरस्यादित्यवनिः स्वाहा' (तैसं १.२.१२) इत्युत्तरेँसे । 'सिँहीरस्यावह देवान् देवयते यजमानाय स्वाहा' (तैसं १.२.१२) इति मध्ये । 'भूतेभ्यस्त्वा' (तैसं १.२.१२) इत्यावृत्त्या स्रुचँ हिरण्यं चोद्गृह्य ।

उभौ पौतुद्रवान् परिधीन् परिधत्तः । 'विश्वायुरसि पृथिवीं दृँह' (तैसं १.२.१२) इति मध्यमौ परिधी परिधत्तः । यजमानः । 'अस्मिन् यज्ञ०' इत्यविकृतम् । 'ध्रुवौ स्थो ध्रुवोऽहँ (सजातेषु भूयासं धीरश्चेत्ता वसुवित्)' । अध्वर्युप्रतिप्रस्थातारौ । 'ध्रुवक्षिदस्यन्तरिक्षं दृँह' (तैसं १.२.१२) दक्षिणौ परिधत्तः । यजमानः । 'अस्मिन् यज्ञ० । उग्रौ स्थ उग्रोऽहँ (सजातेषु भूयासमुग्रश्चेत्ता वसुवित्)' । अध्वर्युप्रतिप्रस्थातारौ । 'अच्युतक्षिदसि दिवं दृँह' (तैसं १.२.१२) उत्तरार्ध्यौ परिधत्तः । यजमानः । 'अस्मिन् ० । अभिभुवौ स्थोऽभिभूरहँ (सजातेषु भूयासमभिभूश्चेत्ता वसुवित्)' । अध्वर्युप्रतिप्रस्थातारौ । 'अग्नेर्भस्मास्यग्नेः पुरीषमसि' (तैसं १.२.१२) गुग्गुलुसुगन्धितेजनं शुक्लोर्णास्तुकां च एतान् संभारान् सकृदेव स्वे स्वे आयतने निवपतः । 'ऊर्णावन्तम्०' इत्युच्यमाने । 'यज्ञ प्रतितिष्ठ सुमतौ सुशेवा आ त्वा वसूनि पुरुधा विशन्तु । दीर्घमायुर्यजमानाय कृण्वन्नधामृतेन जरितारमङ्धि (तैब्रा ३.५.८) यज्ञः प्रत्यष्ठात्' (कासं २.९) इति संभारेष्वग्नी प्रतिष्ठापयतः । यजमानः । 'युनज्मि वां ब्रह्मणा दैव्येन हव्यायास्मै वोढवे जातवेदसौ । इन्धाना वाँ सुप्रजसः सुवीरा (ज्योग्जीवेम बलिहृतो) वयं वाम् । यन्मे अग्ने (अस्य यज्ञस्य रिष्याद्यद्वा स्कन्दादाज्यस्योत विष्णो । तेन हन्मि सपत्नं दुर्मरायुमैनं दधामि निर्ऋत्या उपस्थे) । तेजिष्ठा वां तपना (या च रोचना प्रत्योषन्ती)स्तन्वो या वामग्नी ताभिर्वर्मा(ण्यभितो व्ययस्व) मा वा दभन् यातु (धानाः पिशाचाः)' । 'अग्नेः कुलायमसि' इति दक्षिणत उपयमनीरुपनिवपतः । 'मनुष्वत् त्वा निधीमहि मनुष्वत् समिधीमहि । अग्ने मनुष्वदङ्गिरो देवान् देवायते यज' (तैब्रा ३.११.६) इत्यग्नी उपसमिन्धाते । स्वस्वमग्निं परिस्तीर्य परिषिच्य जुह्वां चतुर्गृहीतं गृहीत्वा दर्विहोमधर्मेण विग्राहमतिमुक्तीर्जुहुतः । 'अग्निर्यज्ञं नयतु प्रजानन्०' इत्यादि पूर्णाहुत्यन्तं वैश्वदेववत् कुरुतः । एतावन्नाहवनीयौ यतः प्रणयनं स गार्हपत्यः ।

५. अग्न्यन्वाधानम् इध्माबर्हिराहरणं च

अग्नीनन्वाधत्तः । दक्षिणविहारस्थमेवाग्निं प्रतिप्रस्थाता । अध्वर्युरौत्तरवेदिकप्राकृताहवनीयदक्षिणाग्नीनन्वादधात्याहवनीयात् प्रणयनपक्षे । गार्हपत्यात् प्रणयनपक्षे यथाप्रकृति । 'ममाग्ने ० श्वो यज्ञाय (रमतां) ० इमामूर्जं' यथातिथि । '(ये प्रविष्टास्तान्) ० वारुणप्रघासैँ हविरिद (मेषां मयि)'। अध्वर्युरौत्तरवेदिकस्य पश्चात् स्थित्वा 'अन्तराग्नी०' इति जपति । प्रतिप्रस्थाताग्रेणोत्तरं विहारं गत्वाग्रेण गार्हपत्यं तिष्ठन् 'अन्तराग्नी०' इति जपति । यजमानः । अग्रेण गार्हपत्यं समीपे तिष्ठन् सकृदेव जपति ।

उभौ शाखे आहरतः । पूर्वं प्रतिप्रस्थाता पश्चादध्वर्युः । 'इषे त्वा' इत्यादि । उभयोर्वत्सापाकरणसमये यजमानस्य व्रतग्रहणम् । अपरेणोभावाहवनीयौ यजमानो दक्षिणातिक्रम्य 'पयस्वतीः०' इत्यादि । 'शुद्धा अपः सुप्रपाणे पिबन्तीः शतं मरुद्भ्यः शरदो (दुहानाः) ०' इति प्रतिप्रस्थातुः । '(शुद्धा अपः सुप्रपाणे पिबन्तीः) शतं वरुणाय (शरदो दुहानाः) ०' इत्यध्वर्योः । एवं सर्वत्र मरुत्पदेन प्रतिप्रस्थातुरूहः । वरुणपदेनाध्वर्योः । वैश्वदेववत् बर्हिषी आहरतः । उत्करबर्हिरध्वर्युरेव । 'देवस्य त्वा०' इत्यादि । 'यज्ञस्य घोषदसि' इत्यध्वर्युरेव । 'यत्कृष्णो रूपं (कृत्वा प्राविशस्त्वं वनस्पतीन् ।) ततस्त्वां विँशतिधा संभरामि सुसंभृता । तिस्रः समिधो यज्ञायुरनुसंचराः । उपवेषं मेक्षणं धृष्टिँ (संभरामि सुसंभृता)' इत्यादि उभयोः परिध्यभावात् । अन्तर्वेदि शाखाया इत्याद्युभौ कुरुतः। पूर्वं प्रतिप्रस्थाता पश्चादध्वर्युः । 'उपवेषोऽसि (यज्ञाय त्वां परिवेषमधारयन्) । मरुद्भ्यो: हविः कृण्वतः (शिवः शग्मो भवासि नः) । (उपवेषोऽसि) ० वरुणाय हविः कृण्वन्तः ०'।

६. सायंदोहः

सायं यवाग्वाग्निहोत्रम् । तत्र श्लोकः —

पाशुके वितते तन्त्रे होमकाल उपस्थिते ।
अपरेष्वेव होतव्यं न त्वेवोत्तरवेदिके ।

इति । अग्निहोत्रोच्छेषणं निदधाति । सायँ हुतेऽग्निहोत्रे सायंदोहौ दोहयतः । 'एता आचरन्ति (मधुमद्दुहानाः प्रजावतीर्यशसो विश्वरूपाः । बह्वीर्भवन्तीरुप जायमाना) इह वो मरुतो रमयन्तु गावः । (एता आचरन्ति०) इह वो वरुणो रमयतु गावः । विहारौ गावौ चोपसृष्टे अन्तरेण मा संचारिष्ट' इत्यध्वर्युरेव (संप्रेष्यति) । 'कामधुक्षः प्र णो ब्रूहि मरुद्भ्यो हविरिन्द्रियम् । (कामधुक्षः प्र णो ब्रूहि) वरुणाय हविरिन्द्रियम् । बहु दुग्धि मरुद्भ्यो देवेभ्यो हव्य (माप्यायतां ०) । बहु दुग्धि वरुणाय देवेभ्यो (हव्यमाप्यायतां०) । सोमेन त्वातनच्मि मरुद्भ्यो दधि । (सोमेन त्वातनच्मि) वरुणाय दधि'। विभज्याग्निहोत्रोच्छेषणमानयतः । प्रातर्दोहाय वत्सानपाकुरुतः । अरण्याशनम् । 'परिस्तृणीत०' इत्युभयोः । दक्षिणविहारस्थमेव प्रतिप्रस्थाता परिस्तृणाति । अध्वर्युः स्वान्वाहितान् । 'उभावग्नी०' इत्यविकृतः सकृत् ।

७. पात्रासादनम्

प्रातरग्निहोत्रँ हुत्वा प्रागुदयात् तन्त्रप्रक्रमः । 'कर्मणे वाम्०' इत्युभयोः । प्रतिप्रस्थाता दक्षिणविहारस्योत्तरतः । अध्वर्युरुत्तरविहारस्योत्तरतः । अध्वर्युरेव दक्षिणविहारस्य दक्षिणतो ब्रह्मयजमानयोः सदने करोति । उत्तरेण गार्हपत्यमुभौ स्वस्वविहारस्थानि पात्राणि प्रयुङ्क्तः । अध्वर्युश्चत्वारिँशत्कपालानि कुम्भीपक्षे द्वात्रिँशत् । अन्यानि वैश्वदेववत् । प्रतिप्रस्थाता स्फ्यमेकादश

द्वादश वा कपालानि कुम्भीं वा । अग्निहोत्रहवणीमैषीकं शूर्पं कृष्णाजिनँ शम्यामुलूखलं मुसलं दृषदमुपलां स्रुवसहिताः स्रुचः शमीमय्यः । आज्यस्थालीं दधिस्थालीं पात्रीं मेक्षणं वेदं प्रणीताप्रणयनं मदन्तीस्थालीम् आमिक्षावाजियोरुद्धरणपात्रे प्रातर्दोहपात्राणि च । ब्रह्मवरणम् ।

उभयोः पूर्वेद्युः कृते पवित्रे । अपरेणोभावाहनीयौ दक्षिणातिक्रम्य स्वायतन उपविशतो ब्रह्म-यजमानौ । 'दक्षाय त्वा' इत्याद्युभौ प्रतिपद्येते । प्रतिप्रस्थातुः 'ब्रह्मन्नपः प्रणेष्यामि' इत्येतावानेव प्रैषः । ब्रह्मा । 'प्रणयतं यज्ञं देवता वर्द्धयतमेता नाकस्य (पृष्ठे यजमानो अस्तु । सप्तर्षीणाँ सुकृतां यत्र लोकस्तत्रेमं यज्ञं) यजमानं च धत्तम् । ओं प्रणयतम्'। अध्वर्युरुत्तरवेदेरुत्तरतः प्रणीताः स्थापयति । प्रतिप्रस्थाताग्रेणोत्तरं विहारं गत्वा द्वयोर्वेद्योर्मध्य उपविश्य दक्षिणाहवनीयस्योत्तरतः सादयति । अयमेव प्रतिप्रस्थातुः सर्वत्र संचरः । 'संविशन्ताम्०' इत्याद्युभयोः 'अहृरुतम्०' इत्यन्तम् ।

८. हविर्निर्वापः

'मित्रस्य त्वा (चक्षुषा प्रेक्षे मा भेर्मा सं विक्था मा त्वा हिँसिषम्)। उरु वाताय । मित्रस्य त्वा (चक्षुषा प्रेक्षे मा भेर्मा सं विक्था मा त्वा हिँसिषम्) । ऊर्जं धत्स्व । पयो मयि (धेहि) । अपहतँ (रक्षः)' एते षण्मन्त्रा अध्वर्योरेव न प्रतिप्रस्थातुः । पात्र्यां निर्वापपक्षे तु सर्वे भवन्त्येव । उभयबीजपक्षे तु 'ऊर्जं धत्स्व' इति प्रतिबीजमध्वर्योः । दशहोत्रा पवित्रनिधानं चोभयोः । प्रतिप्रस्थाता विरमति । अध्वर्युः वैश्वदेववत् पञ्च संचराणि निरुप्य ऐन्द्राग्नं निर्वपति । विरमत्यध्वर्युः । ततः प्रतिप्रस्थाता 'यच्छन्ताम्०' इत्यादि । 'देवस्य त्वा (सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो) हस्ताभ्यां मरुद्भ्यो जुष्टं निर्वपामि' मेष्यर्थे यवान् निर्वपति त्रिः तूष्णीं चतुर्थम् । निरुप्तेष्वन्वोप्य प्रतिप्रस्थाता विरमति । अध्वर्युः । नानाबीजं चेत् पूर्वनिरुप्तं पात्रान्तरे कृत्वा । तस्मिन्नेव शूर्पे मेषार्थं यवान् निर्वपति । 'देवस्य त्वा (सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां) वरुणाय जुष्टं नि(र्वपामि)'। ततो यवान् पात्रान्तरे कृत्वा पूर्वनिरुप्तं हविः शूर्पे समानीय । तस्मिन् '(देवस्य त्वा सवितुः प्रसवेऽश्विनो-र्बाहुभ्यां पूष्णो हस्ताभ्यां) काय जुष्टं निर्वपामि' इति व्रीहीन् निर्वपति । सर्वे वा यवा भवन्ति । 'इदं देवानाम्' इत्याद्युभौ । नानाबीजे तु । 'इदं देवानाम् । इदमु नः (सह) । स्फात्यै त्वा (नारात्यै)' एते त्रयो मन्त्रा अध्वर्योरावर्तन्ते न प्रतिप्रस्थातुः । 'सुवरभि (विख्येषम्)' इत्यध्वर्योरेव । 'वैश्वानरं (ज्योतिः) । दृँहन्तां (दुर्या द्यावापृथिव्योः)' इत्युभयोः । 'स्वाहा द्यावापृथिवीभ्याम्' इत्यध्वर्योरेव । नानाबीजे तु 'उर्वन्तरिक्षमन्वितम् । अदित्या वामुपस्थे सादयामि' इत्यध्वर्योरेवोहः । नैकबीजे । 'अग्ने हव्यँ रक्षस्व' इत्यादि पौष्णान्तं वैश्वदेववत् । 'इन्द्राग्नी हव्यँ रक्षेथाम्'। ततः प्रतिप्रस्थाता । 'मरुतो हव्यँ रक्षध्वम्'। ततोऽध्वर्युः । 'वरुण हव्यँ रक्षस्व । क हव्यँ रक्षस्व'।

'ब्रह्मन् प्रोक्षिष्यामि' इत्युभौ । ब्रह्मा । 'प्रोक्षतं यज्ञं देवता वर्द्धयतमेता नाकस्य पृष्ठे य-(जमानो अस्तु । सप्तर्षीणाँ सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च) धत्तम् । ओं प्रोक्षतम्'। अध्वर्युः । 'देवस्य त्वा सवितुः (प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ता)भ्यामग्नये सवित्रे सरस्वत्यै पूष्णे वरुणाय काय वो जुष्टं प्रोक्षामि सोमायेन्द्राग्निभ्याम्'। प्रतिप्रस्थाता । 'देवस्य त्वा (सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ता)भ्यां वो जुष्टं प्रोक्षामि मरुद्भ्यः'। विभागेनोत्करस्य प्रदेशे कृष्णाजिने आस्तृणीतः । उभाभ्यामुलूखलाधिवर्तनान्तेऽध्वर्युर्व्रीहीनवहन्ति । 'अग्नेस्तनूरसि (वाचो विसर्जनं देववीतये त्वा गृह्णामि) । अद्रिर(सि वानस्पत्यः स इदं देवेभ्यो हव्यँ सुशमि शमिष्व)। अव (रक्षो दिवः सपत्नं वध्यासम्) । हवि(ष्कृदेहि) । उच्चैः (समाजहि) । अद्रि(रसि श्लोक-कृत्) । इष(मावदोर्जमावद द्युमद्वदत वयँ संघातं जेष्म) । वर्ष(वृद्धमसि) । वर्षवृद्धाः (स्थ) । प्रति त्वा (वर्षवृध्दं वेत्तु) । परापूतँ (रक्षः परापूता अरातयः) । वायुर्वो (विविनक्तु) । देवो (वः

सविता हिरण्यपाणिः प्रतिगृह्णातु)' इत्यादि प्रक्षालनान्तम् । तुषान् प्रज्ञातान् निदधाति । ततः प्रतिप्रस्थाता । प्रोक्षणीशेषेण यवानार्द्रीकृत्य । 'अग्नेस्तनूरसि० । अद्रिरसि० । अव रक्षो० । वर्ष० । वर्षवृ० । प्रति त्वा ० । परापूतँ ०' । न तुषोपवापः । 'वायुर्वो० । देवो वः ० । देवेभ्यः (शुन्धध्वम् । देवेभ्यः शुम्भध्वम् । देवेभ्यः शुध्यध्वम्)' । प्रक्षालनान्तं करोति । अध्वर्युः । स्वप्रोक्षणीशेषेण यवानार्द्रीकृत्य । 'अग्नेस्तनूरसि ० । अव रक्षो ० । वर्ष ० । वर्षवृ० । प्रति त्वा० । परापू (तँ०) । वायुर्वो ० । देवो (वः ०) । देवेभ्यः (शुन्धध्वम् । देवेभ्यः शुम्भध्वम् । देवेभ्यः शुध्यध्वम्) ' । प्रक्षाल्य फलीकरणान्येकीकृत्य स्थापयित्वा । सर्वान्स्तुषानेकत्रावभृथार्थं निदधाति । व्रीहियवतण्डुल-प्रक्षालनमेकीकृत्य उभौ स्वस्ववेद्यां प्रक्षालने निनयतः ।

उभौ 'वातस्य०' इत्यादि 'अँशवः स्थ०' (इत्य)न्तं कुरुतः । अध्वर्युः । 'यथाभागं व्यावर्त-ध्वम्' । इति चरुपुरोडाशीयविवेकेन राशिद्वयं करोति । पुरोडाशार्थराशौ देवता उपलक्षयेत् 'इदमग्नये च सवित्रे चेन्द्राग्निभ्यां च काय च' । ततश्चर्वर्थराशौ 'इदँ सोमाय च सरस्वत्यै च पूष्णे च' । ततः 'यथाभागं (व्यावर्त)ध्वम्' इति चर्वर्थराशेः पौष्णमपच्छिद्य सह पुरोडाश्यैः पिनष्टि । उभौ 'देवस्य त्वा०' इत्यादि । 'अव्यवकिरन्ती०' इति प्रैष अध्वर्योः प्रथमबीज एव । न द्वितीयबीजे न प्रतिप्रस्थातुः । अन्यत्सर्वमुभयत्र यवानाम् । अत्र मदन्तीरधिश्रयतः ।

९. कपालोपधानम्

अध्वर्युर्गार्हपत्यश्रपणपक्षे दक्षिणार्धे मेष्यर्थं स्थलमवशिष्य । 'धृष्टिरसि (ब्रह्म यच्छ)' इत्यादि । पौष्णान्तं वैश्वदेववदुपधाय प्रकृतिवद् ऐन्द्राग्नस्योपधाय विरमति । ततः प्रतिप्रस्थाता दक्षिणार्धे गार्हपत्यस्यैकादश द्वादश वा कपालानि ऐन्द्राग्नवदुपदधाति । यथा मेष्याः कपालसंयोगो भवति । त्रिषु त्रिषु कपालेष्वेकैकः पादः । तत्र द्वे संलग्ने उपधाय । किंचिद्व्यवधानेन तृतीयचतुर्थे संलग्ने । तृतीयचतुर्थयोर्दक्षिणतः संलग्नं पञ्चमम् । प्रथमद्वितीययोर्दक्षिणतः संलग्नं षष्ठम् । प्रथमस्योत्तरतो व्यवधानेन सप्तमम् । चतुर्थस्योत्तरतो व्यवधानेनाष्टमम् । सप्तमस्य पुरस्तात् संलग्ने द्वे । अष्टमस्य पश्चात् संलग्ने द्वे प्रागपवर्गे । एवं द्वादश । एकादशपक्षे अष्टमस्य पश्चादेकमेव संलग्नम् । तथा चतुर्थः पादो द्वयोः कपालयोः । एवं सर्वेषां मेषीसंयोगः । प्रतिप्रस्थाता विरमति । अध्वर्युः मेषायाग्नेयवदुपद-धात्यष्टौ । तत्र त्रिषु त्रिषु कपालेषु पादद्वयम् । तत्र प्रागपवर्गं द्वे संलग्ने । तयोः प्रागेकं व्यवधानेन । तृतीयाद् व्यवधानेन दक्षिणत एकं महत् । प्रथमस्य दक्षिणतो व्यवधानेनैकं महत् । प्रथमद्वितीययो-रुत्तरतः संलग्नं षष्ठम् । तृतीयस्योत्तरतः संलग्ने सप्तमाष्टमे । एवं सर्वेषां मेषसंयोगः । कुम्भीपाकपक्षे स्थालीवत् कुम्भ्योः । ततः उभौ प्रातर्दोहौ देवताक्रमेण दोहयतः । सायंदोहवत्संक्षालन-निनयनान्तम् । ततोऽध्वर्युः कायैककपालमुपदधाति ।

१०. हविःश्रपणम्

संवापादि प्रतिपद्येते । अध्वर्युणा व्रीहिपिष्टानां तण्डुलानां च संवापे कृते । उभौ देवताक्रमेण यवपिष्टानां संवपने कुरुतः । क्रमेणोत्पूय 'समाप०' इति क्रमेण पिष्टेष्वप आनयतः । स्थालीष्वानयत्य-ध्वर्युः । कुम्भीपाकपक्षे कुम्भ्योरानयतः । 'अद्भ्यः परि (प्रजाताः स्थ) । समद्भिः पृच्यध्वम्) । जनयत्यै (त्वा संयौमि) । मखस्य (शिरोऽसि)' एषां चतुर्णां नानाबीजपक्ष आवृत्तिरध्वर्योः । पिण्डे कृते 'यथाभागं व्यावर्तध्वम्' इति त्रिरुक्त्वा पिण्डत्रयमपच्छिद्य 'यथाभागं व्यावर्तेथाम्' इत्यव-शिष्टौ । तयोरेव देवतादेशः । 'इदमिन्द्राग्निभ्याम् । इदं काय' । 'यथाभागं (व्याव)र्तेथाम्' इति चर्वर्थान् । 'इदँ सोमाय । इदँ सरस्वत्यै' । 'इदमहम्०' इत्यादि । ऐन्द्राग्नपर्यन्तानधिश्रयति । तत

उभौ यवपिण्डयोर्मेषीमेषं च कुरुतः। प्रतिप्रस्थाता मेष्याः योनिं स्तनौ च करोति। अध्वर्युर्मेषस्य शिश्नं वृषणौ शृङ्गे च करोति। प्रतिप्रस्थाता मेषीम् एकादशसु द्वादशसु वा कपालेष्वधिश्रयति। अध्वर्युरष्टसु मेषम्। अथ यजमानः पत्नी च लौकिकयवपिष्टानि पात्रान्तरे तूष्णीं समोप्य ईषदुपतस्य तप्ताभिरद्भिरनुपरिप्लाव्य मेक्षणेन संयुत्य तेषां पिष्टानां प्रेष्यामात्यसस्त्रीकसंख्याकान्येकातिरिक्तानि करम्भपात्राणि दीपाकाराणि कुरुतः। तत्र प्रेष्यामात्यशब्देन भृत्यपुत्रपौत्रशिष्या अप्रत्तकन्याश्चोच्यन्ते। तप्तयोः प्रातर्दोहयोः क्रमेण सायंदोहावानयतः। ततोऽध्वर्युः कायमधिश्रयति। प्रथनादि वैश्वदेववत्। मेषीमेषयोरवयवविघातो यथा न भवति तथा प्रथनं कर्तव्यम्। कुम्भीपाकपक्षे 'घर्मासि विश्वायुः' इति मेष्या अधिश्रयणम्। 'घर्मोऽसि (विश्वायुः)' इति मेषस्य। उभयोरन्यच्चरुवत्। 'अविदहन्त (श्रपयत)' इत्यध्वर्युः। प्रक्षालननिर्णेजननिनयनं स्वस्ववेद्यामुभयोः।

११. आज्यानयनम्

उभौ ब्रह्माणमामन्त्रयेते। वैश्वदेववदध्वर्युः। प्रकृतिवत् प्रतिप्रस्थाता। ब्रह्मा। 'बृहस्पती परिगृह्णीतं वेद्युत्करान् स्व (गावो देवाः सदनानि) सन्तु। तेषु बर्हींषि प्रथन्तां साध्व (न्तरहिंस्राणः) पृथिव्यो देव्यः सन्तु। देवता वर्धयतमेता ना (कस्य पृष्ठे यजमानो अस्तु। सप्तर्षीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च) धत्तम्। ओं परिगृह्णीतम्'। 'वसवस्त्वा०' इत्यादि सहैव वेद्योः। पश्चादुत्करेऽध्वर्युः। पूर्वपरिग्राहवद्याजमानम्। 'भूमयो भूत्वा महिमानं पुपुषुस्ततो देव्यो वर्धयन्ते पयांसि। यज्ञि (या यज्ञं विचयन्ति शं चौषधीराप इह शक्व) रीश्च'। 'धा असि०' इत्यावर्तते। 'पुरा क्रूरस्य०' इति तन्त्रेणाध्वर्योः। प्रकृतिवत् प्रतिप्रस्थातुः। 'प्रोक्षणीरासादय०' इति वैश्वदेववदध्वर्योः। 'पत्नीं संनह्य' इति वर्जं प्रतिप्रस्थातुः।

पात्रसंमार्गस्य स्वकरणे सहैव कुरुतः। अध्वर्युरेव पत्नीं संनह्यति। पत्न्या उभयोराज्यदध्यवेक्षणं तन्त्रेण। 'महीनां पयांसि स्थौषधीनां रसा अदब्धेन वश्चक्षुषावेक्षे सुप्रजास्त्वाय'। अन्यदुभयोर्वैश्वदेववत्। 'आज्यदधिनी स्थ०' इति स्वस्ववेद्यामुभाववेक्षणे कुरुतः। यजमानः। मन्त्रावृत्त्या उत्तरे अवेक्ष्य दक्षिणे अवेक्षते। अथवा तन्त्रेण बहुवचनान्तेन मन्त्रेण। 'आज्यदधीनि स्थ सत्यानि स्थ सत्यस्याध्यक्षाणि स्थ हवींषि स्थ वैश्वानराणि वैश्वदेव्यान्युत्पूतशुष्माणि सत्यौजांसि सहांसि स्थ सहमानानि स्थ सहध्वमरातीः सहध्वमरातीयतः सहध्वं पृतनाः सहध्वं पृतन्यतः। सहस्रवीर्याणि स्थ तानि मा जिन्वताज्यदध्नामाज्यदधीनि स्थ सत्यस्य सत्यानि स्थ सत्यायूंषि स्थ सत्यशुष्माणि स्थ सत्येन वोऽभिघारयामि तेषां वो भक्षीय'। 'अद्भिराज्यदधीन्याज्यदधिरपः स (म्यक् पुनीत सवितुः पवित्रैः। ता) देवीः शाक्वरीः शाक्वरैरिमं यज्ञमवत (संविदानाः)' इति तन्त्रेण सकृत्।

पृषदाज्यवन्त्याज्यानि पशुवद् गृह्णीतः। श्रावण्यां तु सकृदाज्यस्योपस्तीर्य द्विर्दधि गृहीत्वा द्विराज्येनाभिघारयतः। यजमानः। 'पञ्चानां वां वातानां य(न्त्राय धर्त्राय गृह्णामि)। पञ्चानां वामृतूनां य(न्त्राय धर्त्राय गृह्णामि)। पञ्चानां वां दि(शां यन्त्राय धर्त्राय गृह्णामि) पञ्चानां वां पञ्च (जनानां यन्त्राय धर्त्राय गृह्णामि)। चरोर्वां पञ्चबि(लस्य यन्त्राय धर्त्राय गृह्णामि)। ब्रह्मणो वां तेजसे (यन्त्राय धर्त्राय गृह्णामि)। क्षत्रस्य वामोजसे (यन्त्राय धर्त्राय गृह्णामि)। विशे वां य(न्त्राय धर्त्राय गृह्णामि)'। 'सुवीर्याय वां (गृह्णामि' इति द्विः। 'सुप्रजास्त्वाय वां (गृह्णामि)। रायस्पोषाय वां (गृह्णामि)। ब्रह्मवर्चसाय वां (गृह्णामि)। भूरस्मा (कं हविर्देवानामाशिषो यजमानस्य) देवानां वां दे(वताभ्यो गृह्णामि)'। अपोध्दृत्येत्यादि।

१२. बर्हिरास्तरणं स्रुगासादनं च

'ब्रह्मन् प्रोक्षिष्यामि' इत्युभयोः। 'प्रोक्षतम्०' इति पूर्ववद्ब्रह्मणः। अध्वर्युर्वैश्वदेववत् उत्करबर्हिः प्रोक्षति। उत्करबर्हिषि '(बर्हिरसि) स्रुग्भ्यां त्वा (स्वाहा)' इति। '(बर्हिरसि) चमसाभ्यां त्वा (स्वाहा)' इति वा विशेषः। प्रतिप्रस्थाता प्रकृतिवत्। यजमानः। 'अग्निश्रेम बर्हिषी अन्तः०' इति वेदिबर्हिषोरासाद्यमानयोः। अविकृतमुत्करबर्हिषः। 'सुमनसः०' इत्यविकृतं सकृत्। उत्करबर्हिष्यावृत्तिः। 'ऊर्णामृदुनी प्रथमाने स्योने देवेभ्यो जुष्टे सदनाभ्यां बर्हिषी। सुवर्गे लोके यजमा(नँ हि) धत्तं मां नाकस्य पृष्ठे (परमे व्योमन्)। चतुःशिखण्डे युवती सुपेशसौ घृतप्रतीके वयुनानि वसाते। ते स्तीर्यमाणे महते सौभगाय ते मे दुहाथां यजमानाय कामान्। शिवे च मे शग्मे च स्तँ स्योने मे सुषदे च स्तमूर्जस्वत्यौ च मे पयस्वत्यौ च स्तँ सूपचरणे च मे स्वधिचरणे च स्तमिषमूर्जं मे पिन्वतं ब्रह्म तेजो मे पिन्वतं क्षत्रमोजो मे पिन्वतं विशं पुष्टिं मे पिन्वतमायुरन्नाद्यं मे पिन्वतं प्रजां पशून् मे पिन्वतम्'। अध्वर्युः। पुनः 'देवबर्हिः०' इत्युत्करे। वैश्वदेववद्याजमानम्।

'विच्छिनद्मि विधृतीभिः सपत्नान् (जातान् भ्रातृव्यान् ये च जनिष्यमाणाः)। विशो यन्त्राभिर्विधमाम्ये(नानहँ स्वानामुतमोऽसानि देवाः) विशो यन्त्रानुदमाना अरातिं (विश्वं पाप्मानममतिं दुर्मरायुम्)। सीदन्त्यो देव्यः सुकृतस्य लोके धृतयः स्थ विधृतयः स्वधृतयः। प्राणान् मयि धारयत प्रजां मयि धारयत पशून् मयि धारयत। इमौ प्रस्तरावुभयस्य धर्तारौ धर्तारौ प्रयाजानामुता(नूयाजानाम्)। तौ दध्रतुः समिधो विश्वरूपास्तयोः स्रुचो अध्यासादयामि। आरोहतं पथो जुह्वौ देवयानान् य(त्रर्षयः प्रथमजा ये पुराणाः)। हिरण्यपक्षे अजिरे संभृताङ्गे वहाथो मा सुकृतां यत्र लोकाः। जुह्वौ स्थो घृताच्यौ गायत्रियाम्न्यौ कविभिर्जुषाणे अव्यथमाने यज्ञमनु यच्छेथाँ सुनीत्यौ यज्ञं नयाथ उप देवा(नाग्नेयेन शर्मणा दैव्येन)। अवाहं बाध उपभृद्भ्याँ सपत्नान् (जातान् भ्रातृव्यान् ये च जनिष्यमाणाः) दोहै यज्ञौ सुदु(घामिव धेनुमहमुत्तरो भूयासमधरे मत्सपत्नाः)। सुभृतौ स्थ उपभृतौ घृताच्यौ त्रैष्टुभेन छन्दसा विश्ववेदसौ। अव्यथमाने यज्ञमनु यच्छेथाँ सुनीत्यौ यज्ञं नयाथ उप देवान् (ऐन्द्रेण शर्मणा दैव्येन)'। 'अवाहं बाध उपभृद्भ्याम्' इति पुनः पृषदाज्यधान्योः। 'यो मा वाचा मनसा दुर्मरायु(र्हृदारातीयादभिदासदग्ने। इदमस्य चित्त)मधरं ध्रुवयोरहमुत्तरो (भूयासमधरे मत्सपत्नाः)। ध्रुवे स्थो धरण्यौ धनस्य पूर्णे जागतेन छन्दसा विश्ववेदसौ। अव्यथमाने यज्ञमनु यच्छेथाँ सुनीत्यौ यज्ञं नयाथ उप देवान् वैश्वदेवेन शर्मणा दैव्येन)'। 'स्योनौ मे सीदतँ सुषदौ पृथिव्यां प्रथतं प्र(जया पशुभिः सुवर्गे लोके)। दिवि सीदतं पृथि(व्यामन्तरिक्षेऽहमुत्तरो भूयासमधरे मत्सपत्नाः)। इमौ स्रुवावभिजिह्वतो होमान्छतक्षरौ छन्दसानुष्टुभेन। सर्वा यज्ञस्य समङ्क्तां वि(ष्ठा बार्हस्पत्येन शर्मणा दैव्येन)। इमे स्थाल्यौ घृतस्य पूर्णे अच्छिन्नपयसौ शतधरावुत्सौ (मारुतेन शर्मणा दैव्येन)'। 'एता असदन्०' इत्यादि।

१३. हविरासदनम्

तूष्णीं सौम्यैन्द्राग्नयोरभिघारणम्। अन्येषां मन्त्रेण। 'यस्त आत्मा०' इत्यामिक्षे प्रतिप्रस्थाता तूष्णीं मेषीम्। अध्वर्युर्मन्त्रेण मेषम्। 'दृँह०' इत्युभावामिक्षे उद्वासयतः। उभौ आमिक्षे संहते अन्ययोः पात्रयोरुध्दृत्य वाजिनाभ्यामुपसिञ्चतः। अध्वर्युर्वारुणीकुम्भ्यां निष्कासमवभृथार्थमवशिनष्टि। ततः प्रतिप्रस्थाता 'आर्द्रा प्रथस्नुर्भुवनस्य गोपाः शृतोत्स्नाति जनित्री मतीनाम्' इति मेषीमुद्वास्य, कुम्भीपाकपक्षे तु प्रथस्नुपदं लुप्यते। यवमयानां 'तस्मिन्त्सीद०'

इति मन्त्रो लुप्यते। अध्वर्युर्मेषमुद्वास्य कायमुद्वासयति। ऐन्द्राग्नपर्यन्तानलंकृत्य। प्रतिप्रस्थाता मेषीमलंकरोति। तामनैडकीभिरूर्णाभिः कुशपुष्पैर्वा लोमशां करोति। अध्वर्युर्मेषमलंकृत्यैवमेव लोमशं करोति। ततः कायमलंकृत्य तस्मिन् प्रभूतमाज्यमानीयाविःपृष्ठं करोति। अध्वर्युर्मारुत्या-मिक्षायां मेषमवदधाति। प्रतिप्रस्थाता वारुण्यां मेषीम्। अथाभ्यां शमीपर्णकरीराण्युपवपति परःशतानि भवन्ति परःसहस्राणि वा। तत्तत्पात्रे संक्षिपति। करम्भपात्रेषु च पर्णान्वन्वोप्य।

अध्वर्युः । व्याहृतिभिरष्टौ हवींषि उत्तरस्यां वेद्यामासादयति। आग्नेयविकारान् दक्षिणतः। अन्यानुत्तरतः। प्रतिप्रस्थाता ऐषीके शूर्पे करम्भपात्राणि स्थापयित्वा मारुत्या सह दक्षिण-वेद्यां व्याहृतिभिरासादयति। वाजिने च व्याहृतिभिरुत्करे आसादयतः। अत्र मेषप्रतिकृती विनि-मयेन हरतः। मारुत्यामिक्षायां मेषीमवदधाति वारुण्यां मेषम्। यजमानः। 'यज्ञाः स्थ सर्वतः श्रिताः ०' आग्नेयसावित्रसारस्वतपौष्णमेषकायानां तन्त्रेण। 'प्रजापतिरसि (सर्वतः श्रितः सर्वतो मां भूतं भविष्यच्छ्रयतां शतं मे सन्त्वाशिषः सहस्रं मे सन्तु सूनृता इरावतीः पशुमतीः)' सौम्यस्य। 'यो नः कनीयः (० अप तमिन्द्राग्नी भुवनान्नुदेतामहं प्रजां)०' ऐन्द्राग्नस्य। 'यस्त आत्मा०' इति तन्त्रेणामिक्षयोः। 'इयमिन्द्रियम्०' इति मारुत्याः। 'यो नः कनीयः० अप तं मरुतो भुवनान्नुदन्ता (महम् ०)' इति मेषीम्। 'इयमिन्द्रियम् ०' इति वारुण्याः। 'यस्त आत्मा०' इति वाजिनयोः। 'ये पृथिवीमचरतां ते प्रविष्टे याभ्यामसिञ्चद्बलमिन्द्रे प्रजापतिः। इमे ते शुक्रं मधु वाजिनीवती याभ्यामुपरिष्टादधिनोन्महेन्द्रं वाजिने मां धिनुताम्' इति वाजिनयोः। 'अयं यज्ञः समसदत् ०' सर्वेषाम्। सौम्यस्य विहव्यं चतुर्होता। अन्येषां पञ्चहोता। असंभवतां मन्त्रावृत्तिः।

१४. अग्निमन्थनम्

वैश्वदेववन्निर्मन्थ्येन चरतः। अथवाध्वर्योरेव निर्मन्थनम्। विभज्योभौ प्रहरतः। अभि-जुहुतश्च। 'अयं वेदः०' इत्याद्युभयोः। अध्वर्युरेव होतारमामन्त्रयते। पौष्णान्तं वैश्वदेववदुक्त्वा इन्द्राग्नी मरुतो वरुणः क इति प्रधानदेवताः। वैराजस्विष्टकृत्। वैश्वदेववदन्यत्। 'अग्नये समि-ध्यमानायानुब्रूहि' इत्यध्वर्योरेव। प्रणवे प्रणवे समिधमित्याद्युभौ कुरुतः। 'समिध्दो अग्निः०' इति सकृदविकृतं (याजमानम्)। प्रजापतये मनव इदं (न मम)। 'मनसी स्थः प्राजापत्ये मनसा मा भूतेनाविशतम्'। 'अग्नीत् परिधीन्०' इत्यविकृतमध्वर्युरेव। आग्नीध्र उत्तरविहार-स्थस्फ्येध्मसंनहनैरुत्तराग्निपरिधीनग्निं च संमृज्य स्फ्येध्मसंनहनानि निधाय। दक्षिणविहारस्थ-स्फ्येध्मसंनहनैर्दक्षिणाग्निपरिधीन् संमृज्य विरमति।

१५. करम्भपात्रहोमः

प्रतिप्रस्थाताग्रेणोत्तरं विहारमुत्तरतो गत्वा स्वस्थानासीनां पत्नीं पृच्छति। 'पत्नि कति ते जाराः' इति। सा यावतः प्रब्रूयात् 'तान् वरुणो गृह्णातु' इति निर्दिशति। प्रतिप्रस्थातुः जारैकत्वे द्वित्वे वा 'तं (वरुणो गृह्णातु), तौ (वरुणो गृह्णातु)' इत्यूहः। जाराभावे न वरुण-निर्देशः। जारकथने तु तेनैव प्रायश्चित्तमिति वदन्ति। कर्मसमाप्तौ त्वन्यत्कार्यमित्यन्ये। 'प्रघास्यान् हवामहे मरुतो यज्ञवाहसः करम्भेण सजोषसः' (तैसं १.८.३) इत्युत्तरतः पत्नीं प्राचीमुदानयन् प्रतिप्रस्थाता वाचयति। तामग्रेणोत्तरं विहारमानीय द्वयोर्वेद्योर्मध्यतः प्रत्यङ्ङानीय। ऐषीके शूर्पे करम्भपात्राण्युप्तानि पत्नी शीर्षन्नधि निधायान्तरा वेदी गत्वाग्रेण दक्षिण-मग्निं प्रतीची तिष्ठति। यजमानः। द्वयोराहवनीययोरपरेणोदङ्ङत्याक्रम्याग्रेणोत्तरमग्निमा-

गत्यान्तरा वेदी प्रविश्य प्राग्गत्वा पत्न्या दक्षिणतः प्रत्यङ्मुखस्तिष्ठति। 'मो षू ण इन्द्र पृत्सु देवास्तु स्म ते शुष्मिन्नवया। मही ह्यस्य मीढुषो यव्या। हविष्मतो मरुतो वन्दते गीः' (तैसं १.८.३) इति यजमानः पुरोनुवाक्यामन्वाह। 'यद् ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये यच्छूद्रे यदर्य एनश्चकृमा वयम्। यदेकस्याधि धर्मणि तस्यावयजनमसि स्वाहा' (तैसं १.८.३) इति दम्पती तेनैकशूर्पेण करम्भपात्राणि दक्षिणेऽग्नौ जुहुतः। प्रघास्येभ्यो मरुद्भ्य इदं (न मम)। अध्वर्युर्वा जुहोत्यन्वारभेते दम्पती। 'अक्रन् कर्म कर्मकृतः सह वाचा मयोभुवा। देवेभ्यः कर्म कृत्वास्तं प्रेत सुदानवः' (तैसं १.८.३) इति स्वं लोकं गच्छन्तौ जपतः। यथागतं गच्छतः। आग्नीध्रो दक्षिणमग्निं संमार्ष्टि।

१६. प्रयाजयागः

स्रुच्यमाघारयतः। इन्द्रायेदं (न मम)। 'वाचौ स्थ ऐन्द्र्यौ सपत्नक्षयण्यौ वाचा मेन्द्रियेणाविशतम्'। प्रत्याक्रम्येत्यादि। अध्वर्युरेव प्रवरं प्रवृणीते। घृतवतीशब्दे जुहूपभृतावाददाते इत्यादि आज्यभागान्तमुभयोर्वैश्वदेववत्। आग्नीध्रः। अङ्गयागार्थप्रत्याश्रावणे इध्मसंनहनसहितं स्फ्यद्वयं धारयेत्। मारुतीव्यतिरिक्तप्रधाने अध्वर्योरेव स्फ्येध्मसन्नहनानि। मारुतीयागे प्रतिप्रस्थातुरेव। मारुत्यतिरिक्तेषु अङ्गप्रधानयागेष्वध्वर्योरेव संप्रैषाः। मारुतीयागे तु प्रतिप्रस्थातुरेव। तन्त्रेणाविकृता उद्देशत्यागा अनुमन्त्रणानि च।

१७. प्रधानयागः

आज्यभागान्ते स्रुग्घस्त एव प्रतिप्रस्थाता विरमति। अध्वर्योः पौष्णान्तानां वैश्वदेववद्यागः। ऐन्द्राग्नस्य प्रकृतिवत्। अनुमन्त्रणानि च। अध्वर्युः स्रुग्घस्तो विरमति। प्रतिप्रस्थाता। 'आप्यायतां ध्रु(वा घृतेन)०। मा भेर्मा सं(विक्था०)' द्विः। 'मरुद्भ्योऽनुब्रूहि' आमिक्षायाः पूर्वेण सहावदानेन कृत्स्नां मेषीमवद्यति। उत्तमेन शमीपर्णकरीराणि। 'आ प्यायतां ध्रु(वा घृतेन)०। यदवदानानि ०' सकृत्। अत्याक्रम्याश्राव्य प्रत्याश्राविते। 'मरुतो यज'। वषट्कृते दक्षिणेऽग्नौ प्रतिष्ठितां मेषीम् आमिक्षां च जुहोति। मरुद्भ्य इदं (न मम)। 'मरुतामहं (देवयज्य)येन्द्रियावीन्द्रियाव्यन्नादो भूयासम्। (मरुतामहं देवयज्यया) जेमानं महिमानं गमेयमिन्द्रियाव्यन्नादो भूयासम्' इति वा। ततः प्रतिप्रस्थाता उदङ्ङत्याक्रम्य विरमति स्रुग्घस्तः। अध्वर्युः। स्रुच्युपस्तीर्य मारुतीवत् प्रचरति। 'वरुणायानुब्रूहि। वरुणं यज'। वरुणायेदं (न मम)। 'वरुणस्याहं (देवयज्य)येन्द्रियाव्यन्नादो (भूयासम्)। (वरुणस्याहं देवयज्यया) जेमानमन्नादो (भूयासम्)' इति वा। वैश्वदेववदेककपालेन चरति। 'काय' इत्युपांशु 'अनुब्रूहि' इत्युच्चैः। 'कम्' इत्युपांशु 'यज' इत्युच्चैः। कायेदं (न मम)। 'कस्याहं (देवयज्य)यान्नादो (भूयासम्)'। अत्याक्रम्य ध्रौवाच्चतुर्गृहीतेन। 'नभश्च स्वाहा'। नभस इदं (न मम)। 'नभस्यश्च स्वाहा'। नभस्यायेदं (न मम)। 'इषश्च स्वाहा'। इषायेदं (न मम)। 'ऊर्जश्च स्वाहा'। ऊर्जायेदं (न मम)। एककपालमभिजुहोति। स्विष्टकृता चरतः। अध्वर्युरेव संप्रेष्यति। वषट्कृते जुहुतः। अत्याक्रम्य 'वैश्वानर०' इत्युभौ।

अध्वर्युः प्राशित्रमवदाय इडामवद्यति। ऐन्द्राग्नान्तेभ्योऽवदायाग्रेणाग्निं पात्रं प्रतिप्रस्थात्रे प्रयच्छति। प्रतिप्रस्थाता तस्मिन् पात्रे मारुत्या इडाभागमवदायाध्वर्यवे पात्रं प्रयच्छति। अध्वर्युर्वारुण्या अवदाय क्रमेण सर्वेभ्यो हविर्भ्यो यजमानभागमवद्यति। प्रतिप्रस्थाता मारुत्या यजमानभागमवदाय अध्वर्युर्वारुण्या अवद्यति। सर्वं भागं अध्वर्युरेव संतृप्य स्वध्रुवाया उपोहति। पूर्वावदानवद्द्वितीयमिडावदानमवद्यतः। अध्वर्युरेवाभिघारयति। प्रतिप्रस्थातुरिडा प्रज्ञाता भवति। पर्वाञ्जने अवान्तरावदाने चाध्वर्युरेव। ब्रह्मव्यतिरिक्तानामन्वारम्भः। 'उपहूतः पशुमानसानि'

इत्युभौ। प्रतिप्रस्थातृषष्ठा इडां प्राश्नन्ति। दक्षिणवेद्यां प्रतिप्रस्थातुर्मार्जनम्। सौम्यैन्द्राग्नवर्जितानां चतुर्धाकरणम्। 'इदं यजमानस्य'।

'दक्षिणसद्भ्य उपहर्तवै' इत्यध्वर्युरेव। धेनुर्दक्षिणा। 'इयं धेनुरमृतस्य पूर्णा सहस्र-धारोत्साक्षीयमाणा। सा दाधार पृथिवीमन्तरिक्षं दिवं च तया धेन्वातितराणि मृत्युम्। ब्रह्मणी ब्रह्मण्यसि ब्रह्मणे त्वा हुताद्ये मा मा हिँसीरहुता मह्यँ शिवा भव। प्रजापतेः०' इत्यविकृतमुभयोः। केचिदूहमिच्छन्ति। 'प्रजापतेर्भागास्यूर्जस्वती पयस्वती प्रा(णापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाह्य)क्षिता स्यक्षि(त्यै त्वा मा मे क्षेष्ठा अमुत्रामुष्मिल्लोके)'। 'दक्षिण-सद्भ्य' इत्युच्यमाने। 'दक्षिणत एत ब्राह्मणा इयं वो धेनुरहिँसन्तो यथाभागं प्रतिगृह्णीध्वम्'। उभे वेदी दक्षिणतो गत्वा उत्तरस्यां वेद्यामासन्नां गां प्रतिगृह्णन्ति। हविःशेषोद्वासनमुभौ कुरुतः।

१८. अनूयाजयागः

'ब्रह्मन् प्रस्थास्यामः (समिधमाधायाग्नीत् परिधीँश्चाग्निं च सकृत् सकृत् संमृड्ढि)' इत्यध्वर्युः। 'समिधावाधाय' इत्यूहः। ब्रह्मा। 'देव सवितरे(तत्ते प्राह तत्प्र च सुव प्र च यज बृहस्पतिर्ब्रह्मा स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाहि)। ओं प्रतिष्ठतम्'। आग्नीध्र उत्तरदक्षिणयोः क्रमेण समिधावादधाति। याजमानमप्यावर्तते। क्रमेण तैस्तैः सन्नहनैः संमार्ष्टि उत्तरदक्षिणाग्नी। स्वे स्वे अग्नौ संमार्गाननुप्रहरतः। आग्नीध्रो वा क्रमेणानुप्रहरति। भूताना-मधिप(तये रुद्राय तन्तिचरायेदं न मम)। 'वेदिर्बर्हिः०' इत्यविकृतं सकृत्। '(वेदिर्बर्हिः शृतँ० सन्नतयो नमन्ताम्) इध्मसन्नहनयोर्हुतयोः' इति वोहः। आग्नीध्रसंमार्गपक्षे आवृत्तिः। उत्करव्युदसने नास्ति याजमानम्। पृषदाज्याभ्यामनूयाजान् यजतः। अध्वर्युरेव संप्रेष्यति। वषट्कृते जुहुतः। तन्त्रेणाविकृतं वैश्वदेववद्याजमानम्।

'वाजस्य मा प्रसवेन' इत्याद्युभौ प्रतिपद्येते। याजमानमप्यविकृतं सकृत्। 'समञ्जातां बर्हिर्षी हविषा (घृतेन समादित्यैर्वसुभिः सं मरुद्भिः। समिन्द्रेण विश्वेभि)र्देवेभिरञ्जातां दिव्यं नभो गच्छतां यत्स्वाहा। अपि प्रेड्०' इत्यविकृतं सकृत्। सूक्तवाके आश्रावणप्रैषा अध्वर्योरेव। सकृदविकृतं याजमानम्। 'रोहितेन वामग्निर्देवतां गमयतु। हरिभ्यां वामिन्द्रो (देवतां गमयतु)। एतशेन वाँ सूर्यो (देवतां गमयतु)'। 'अग्नीद् गमय, अनुप्रहर' इत्यध्वर्युरेव। समुद्यवन-मनुप्रहरणं च क्रमेण। 'दिवः खीलोऽवततः०' इति पर्यायेण। 'संवदेथाम्' इत्याग्नीध्रः। 'अगा-नग्नीत्' इत्युभयोः। 'अगतम्' इत्याग्नीध्रः। श्रावणप्रैषावध्वर्योरेव। उभयोः परिधिप्रहरणम्। 'विष्णोः शं योः०' इत्यविकृतं सकृत्। 'वि ते मुञ्चामि०, इष्टो यज्ञः०' इति च। 'वि वां मुञ्चामि०' इति केचिदूहमिच्छन्ति।

१९. वाजिनयागः

उभौ वैश्वदेववत् स्वस्ववाजिनेन चरतः। स्वे स्वे बर्हिषि विषिञ्चन् गृह्णीतः। अध्वर्यो-रेव संप्रैषाश्रावणे। दक्षिणविहारवाजिनमुपहूय। 'यन्मे रेतः प्रसिच्यते यन्म आजायते पुनः। यद्वा मे प्रतितिष्ठति तेन मा वाजिनं कुरु तेन सुप्रजसं कुरु। तस्य ते वाजिन् वाजिभिर्भक्षंकृतस्य मधुमत उपहूतस्योपहूतो भक्षयामि' अनेनाध्वर्युरहिताः सर्वे भक्षयन्ति। तत उत्तरविहारस्थमुपहूय सर्वे प्रतिप्रस्थातृरहिता भक्षयन्ति 'आ मा विशन्त्विन्दव आ गल्गा धमनीनाम्। रसेन मे रसं पृण तस्य ते वाजिन् वाजिभिर्भक्षंकृतस्य मधुमत उपहूतस्योपहूतो भक्षयामि' अनेन मन्त्रेण। तत उत्तरविहारस्थस्थालीगतवारुणीनिष्कासवर्जितान् हविःशेषान् वाजिनं च प्रतिप्रस्थातृभिन्ना

ऋत्विजः प्राश्नन्ति। दक्षिणविहारस्थामामिक्षामध्वर्युभिन्ना वाजिनं च। वेदौ पृथगुभयोर्वेद्यो- रभिमृशति यजमानः। स्वस्वस्रुच आददाते। उभौ वेदौ होता। सस्रुवावाज्यस्थाल्यावाग्नीध्रः स्फ्यौ च। प्रतिप्रस्थाताग्रेणोत्तरं विहारमागत्य उभौ दक्षिणेन गार्हपत्यमतिक्रामतः। स्वे स्वे स्फ्ये स्रुचो विमुञ्चतः। 'अग्नेर्वोऽपन्नगृहस्य (सदसि सादयामि सुम्नाय) सुम्निन्यः सुम्ने मा धत्त धुरि धुर्यौ पात' अनेन। यदा न पृषदाज्यधान्यानयनं तदा प्रकृतिवन्मन्त्रः।

२०. पत्नीसंयाजादि

अध्वर्युरेव पत्नीः संयाजयति। संपत्नीयमिडां च । उभौ प्रतिपत्तिहोमौ जुहुतः। होता वेदौ पत्न्यै प्रदीयमानौ यजमानः 'वेदौ स्थो वित्ती स्थो विदेयकर्मणी स्थः करुणे स्थः क्रियासँसनी स्थः सनितारौ स्थः सनेयम्'। उपस्थेऽस्यमानौ 'घृतवन्तं कु(लायिनँ रायस्पोषँ सहस्रिणं) वेदौ दत्तां वाजिनम्। त्वया वेदिम्०' इत्यावर्तते। उभौ यथेतमेत्य सारस्वतादि प्रतिपद्येते। न पार्वणः। नारिष्ठादि प्रतिपद्येते। प्राकृते समिष्टयजुषी जुहुतः। 'अग्नेऽदब्धायो० दिवः खीलोऽवततः' इत्यविकृतौ सकृत्।

यजमानभागप्राशने। 'इदँ हविः' इत्यामिक्षाभागौ तन्त्रेण प्राश्नाति। विभज्य होतृ- षदनैर्वेदी अभिस्तृणीतः। उभौ प्रणीताविमोकौ कुरुतः। पर्यायेणोभयत्र मार्जनम्। आहवनी- योपस्थानान्तं तन्त्रेण। उपसमिन्धनं भेदेन। वेदयोस्तृणान्युपस्थ आधायोत्तरस्यामेव वेद्यामती- मोक्षान् जपति। उभौ उपवेषयोः प्रतिपत्ती कुरुतः। यजमानेन सह यज्ञविमोकौ कुरुतः। कपा- लानि विमुञ्चतः। कुम्भीपाकपक्षे 'यां घर्मे कुम्भीम् (उपचिन्वन्ति वेधसः ०)' इत्यूहः। ब्रह्मणः समिदाधानं दक्षिण आहवनीय एव। उभयत्र वा। उपस्थानपक्षे सकृदेव। यजमानस्य व्रत- विसर्गः। सकृत्प्रयोगपक्षे न पुनरालम्भः। यथेतं प्रतिनिष्क्रामतः। संस्था ब्राह्मणप्रैषश्च। 'सँ- स्थाप्य' इति वचनात्। संतिष्ठते वरुणप्रघासः।

२१. अवभृथसंकल्पः

अथावभृथः। अध्वर्युरेव। उत्तरे विहारेऽग्न्यन्वाधानादि करोति। यावदुक्तम्। यजमानः। 'अवभृथेष्ट्या यक्ष्ये'। अध्वर्युः। 'ममाग्ने० (अग्निं गृह्णामि०) अद्य यज्ञाय (रमतां)०इमामूर्जं' यथातिथि। ('ग्ने प्रविष्टास्तान्)० आवभृथँ हवि(रिदमेषां मयि)'। न व्रतग्रहणम्। न बर्हिराहरणम्। वेदं कृत्वा। 'परि स्तृणीत(परिधत्ताग्निं०)'। न 'उभावग्नी०'।

२२. हविरासादनान्तम्

'कर्मणे वां०। यज्ञस्य ०'। (ब्रह्मयजमानयोः) सदने (करोति)। स्फ्यमग्निहोत्रहवणीँ स्रुवं जुहूमुपभृतं ध्रुवाम् आज्यस्थालीं वेदं वेदाग्रं वस्त्रयुग्ममुदुम्बरशाखां च। न ब्रह्मवरणम्। 'वाचस्पते०' इत्यादि ब्रह्मणः। 'पवित्रे स्थो०। इमौ प्राणा (पानौ)०। विष्णोर्मनसा०। यज- मान वाचं (यच्छ)'। 'संविशन्तां०। दक्षाय वा(नस्पत्यासि)। प्रत्युष्टं०। देवो वः०। अच्छिद्रेण०। वसोः सू(र्यस्य)०। आपो देवी(र्बृहतीर्विश्वशंभुवो)०'। 'ब्रह्मन् प्रोक्षि(ष्यामि)। प्रोक्ष यज्ञं ०। शुन्धध्वम्०'। वाचं विसृज्य।

'देवस्य त्वा ०' स्फ्यमादाय। 'इन्द्रस्य बा(हुरसि दक्षिणः)। सहस्रभृष्टिः०। स्रुवं च स्रुचश्च संमृड्ढ्याज्येनो(देहि)। शतभृष्टिरसि०। अनिशिताः स्थ०। घृताचीरेता(ग्निर्वो)०। प्रत्युष्टं०। गोष्ठं०। वाचं०। चक्षुः० प्रजां०। घृताची०। प्रत्युष्टं०। दिवः शि(ल्पमवततं)०'। 'पूषा ते बिलं (विष्यतु)। इदं विष्णु(र्वि)०। अदितिर(स्यनाच्छिन्नपवित्रा)। महीनां

प(यो) ०। इषे (त्वा)। ऊर्जे (त्वा)। महीनां०। तेजोऽसि। तेजसे (त्वा)। तेजोऽनु (प्रेहि)। अग्निस्ते ०। अग्नेर्जिह्वा (सि)०। आज्यमसि० । शुक्रम(सि)। ज्योति(रसि)। तेजोऽ(सि)'। प्रतिहृत्य गार्हपत्यस्योत्तरत आज्यानि गृह्णाति। सर्वाणि चतुर्गृहीतानि। उपभृति 'ब्रह्मणस्त्वा' इत्यादि चतुर्भिः। द्विर्वोपभृति। तदा 'विशे त्वा ०। सुवीर्याय ०' इति द्वाभ्याम्। वेद्यां पवित्रे अपिसृज्य। निष्कासमन्यस्मिन् पात्र उध्दृत्य 'यस्त आत्मा०' इत्यभिघार्य। वेद्या उत्तरेंसे निष्कासमाज्यानि तुषांश्च तूष्णीं सादयित्वा। नास्ति याजमानम्।

२३. अवभृथोपक्रमः

अध्वर्युः। 'आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमँ स्वाहा' (तैसं ३.३.८) इति शालामुखीये स्रुवाहुतिं जुहोति। आयुर्देऽग्नय इदं (न मम)। ततो निष्कासं तुषान् स्रुचः स्रुवमाज्यस्थालीमुदुम्बरशाखां दधि दर्भमुष्टिं वेदँ स्फ्यमहते वाससी समिधश्चादाय। 'उरुँ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ। अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित्' (तैसं १.४.४५) चात्वालं गत्वा सर्वे वदन्ति। अन्तरेण चात्वालोत्करावुदञ्चो निष्क्रामन्ति। यां दिशं व्रजन्ति सैव प्राची। 'शतं ते राजन् भिषजः सहस्रमुर्वी गम्भीरा सुमतिष्टे अस्तु। बाधस्व द्वेषो निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुग्ध्यस्मत्' (तैसं १.४.४५) अपो दृष्ट्वाध्वर्युर्जपति। 'अभिष्ठितो वरुणस्य पाशः' (तैसं १.४.४५) उदकान्तमभितिष्ठन्ति। अपः प्रगाह्य प्राङ्मुखास्तिष्ठन्तोऽवभृथेन चरन्ति। दक्षिणतोऽध्वर्युब्रह्मयजमानाः पत्नी च। उत्तरत आग्नीध्रः। पश्चाद्धोता। मध्ये आसन्द्याँ हवीँषि। आहवनीयदेशं संलक्ष्याप्सु तृणं प्रास्य तस्मिन् यजति।

२४. प्रधानयागः

होत्रा ओढासु देवतासु। वेदेनोदकमुपवाज्य स्रुवाघारमाघार्य ध्रुवामाप्याय्य। 'अग्नीदुदकं त्रिः संमृड्ढि' संप्रेष्यति। आग्नीध्रः। दर्भान् स्फ्यं च संगृह्य। 'उदकवाजजिद्वाजं त्वा सरिष्यद्वाजं जेष्यद्वाजिवाजजिद्वाजजित्यायै संमार्ज्म्युदकमन्नादमन्नाद्याय' प्राञ्चमुदकं त्रिः संमार्ष्टि। 'सप्रथा नमो देवेभ्यः' इत्यञ्जलिं कृत्वा। 'जुह्वेह्यग्नि(स्त्वाह्वयतु)० उपभृदेहि० सुयमे मे ०'। नाक्रमणं न मन्त्रः। 'विष्णोः स्थान(मसीत इन्द्रो अकृणोद्वी)र्याणि। अग्नेरनीकमप आ विवेश। अपांनपात् प्रतिरक्षन्नसुर्यं दमेदमे समिधं यक्ष्यग्ने प्रति ते जिह्वा घृतमुच्चरण्येत् स्वाहा' (तैसं १.४.४५) स्रुच्यमाघारयति। अग्नय इदं (न मम)। नास्त्यनुमन्त्रणमिति मातृदत्तः। नात्याक्रमणे। 'समक्तमग्निना०। उन्नीतँ (रायः)। सुवीराय (स्वाहा)। यज्ञेन (यज्ञः संततः)'। संमार्गतृणानि स्फ्य उपसंगृह्य। 'क इदम्०' उभयोः। 'आश्रा(वय)। अस्तु (श्रौषट्)। तिष्ठ होतः'। एतावान् प्रवरः। 'मां देवेष्वाश्रा(वयायुषे वर्चसे०)'। बर्हिर्वर्जं चत्वारः प्रयाजाः। नोपभृतँ समानयते। शेषेण ध्रुवां निष्कासमुपभृतं चाभिघार्याज्यभागाविष्ट्वा।

व्याख्याते पञ्चहोतरि। 'आप्यायतां ध्रुवा०। मा भेर्मा सं(विक्था)०'। आमिक्षानिष्कासाद् द्विरवदाय। 'वरुणायानुब्रूहि'। 'यदवदा(नानि ते)०'। 'आश्रावय। अस्तु श्रौ(षट्)। वरुणं यज'। वरुणायेदं (न मम)। 'वरुणस्याहं दे(वयज्य)येन्द्रियावी भूयासम्'। अत्र नारिष्ठान् जुहोति। उपस्तीर्य कृत्स्नं निष्कासमवदाय। द्विरभिघारयति द्वितीयाभिघारणे ध्रौवसमाप्तिः। 'अग्नीवरुणाभ्याँ स्विष्टकृद्भ्यामनुब्रूहि। अग्नीवरुणौ स्विष्टकृतौ यज'।

अग्नीवरुणाभ्याँ स्विष्टकृद्भ्यामिदं (न मम) । 'अग्नीवरुणयोः स्विष्टकृतोरहं (देवयज्य)—यायुष्यमान् यज्ञेन (प्रतिष्ठां गमेयम्)। अग्निर्मा०' इति च। 'वैश्वानरे हवि(रिदं) ०। अग्नीदुदकँ सकृत् संमृड्ढि'। आग्नीध्रः स्फ्यवर्जितैर्दर्भैः । 'उदकवाजजिद्वाजं त्वा ससृवद्वाजं जिगिवद्वाजि वाजजिद्वाजजित्यायै समाजर्म्युदकमन्नाद(मन्नाद्याय)। यो भूतानामधिपती०'। नास्ति 'वेदिर्बर्हिः०'। व्याख्याते सप्तहोतरि। औपभृतं जुह्वां समानीयापबर्हिषावनूयाजौ यजति। 'आश्रा(वय)। अस्तु (श्रौषट्) । देवौ यज यज'। देवाय नराशँसायेदं (न मम)। 'नराशँस्याहं (देवयज्यया) पशुमान् भूयासम्'। 'आ(श्रावय)। अ(स्तु श्रौषट्)। यज'। देवायाग्नये स्विष्टकृ(त इदं न मम)। 'अग्नेः स्विष्टकृतोऽ(हं देवयज्यया)युष्मान् यज्ञेन (प्रतिष्ठां गमेयम्)'। एतावत् क्रियते।

२५. अवशिष्टविधानम्

ततोऽध्वर्युरुदुम्बरशाखया स्रुक्स्थानीयया दध्नर्जीषमभिजुहोति चतसृभिः। 'यद्वो मुसलेन चिच्छिदुर्व्रीहयो यवा राजानः प्रियाण्यङ्गानि स्वधिता परूँषि । तत्संधध्वमाज्येनोत वर्धयध्वमनागसो अधमित् संक्षयेम स्वाहा'। व्रीहियवेभ्य इदं (न मम)। इति सर्वत्र त्यागः । 'यद्वो मुसलं बाहुच्युतमचुच्यवुर्नरो यद्वो दुदुहुर्दक्षिणेन। तद्व आप्यायतां तद्वो निष्ट्यायतां देव व्रीहयो यवाः स्वाहा। यद्वस्त्वचं बिभिदुर्यच्च योनिं यदास्थानात् प्रच्युतो वेनथ त्मना। युष्माभिस्तद् व्रीहयो यवा गुप्तमस्तु नः सा नः संधासत् परमे व्योमन्त्स्वाहा। अहाच्छरीरं पयसा समेत्यान्योऽन्यो भवति वर्णो अस्य। तस्मिन् वयमुपहूता युष्माकँ स्म आ नो भज सदसि विश्वरूपे स्वाहा' (द्र. तैब्रा ३.७.१३)। सर्वयवपक्षे व्रीहिपदत्यागेनोह्यं 'यद्वो मुसलेन चिच्छिदुर्यवा राजानः०' इति। तुषैः स्रुचं पूरयित्वा 'समुद्रे ते हृदयमप्स्वन्तः। सं त्वा विशन्त्वोषधीरुतापो यज्ञस्य त्वा यज्ञपते हविर्भिः। सूक्तवाके नमोवाके विधेम' (तैसं १.४.४५) अप्सूपमारयति। यो बिन्दुनामुच्चरति तूष्णीं तमवजिघ्रेण भक्षयत्युपस्पृशति वा। 'अवभृथ निचङ्कुण निचेरुरसि निचङ्कुणाव देवैर्देवकृतमेनोऽयाडव मर्त्यैर्मर्त्यकृतमुरोरा नो देव रिषस्पाहि' (तैसं १.४.४५) तुषशेषमप्सु न्यस्यति। 'देवीराप एष वो गर्भस्तं वः सुप्रीतँ सुभृतमकर्म देवेषु नः सुकृतो ब्रूतात्' (तैसं १.४.४५) इत्युपतिष्ठन्ते। 'सुमित्रा न आप ओषधयः सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मः' (तैसं १.४.४५) इति मार्जयन्ते। 'सुमित्रा न आप० द्विष्मः' इति दम्पती अभिप्रगाह्य शरीरमलमदूरीकुर्वन्तौ सहशिरस्कौ स्नातः। अन्योन्यस्य पृष्ठे प्रक्षालयतः। प्रतीपमाप्लवमानौ गाहेते। दम्पती अहते वाससी परिदधाते। अहतवाससौ भूत्वा बहिर्जलमाचम्य तज्जलं पुनः प्रविशतः। अध्वर्युः। 'प्रतिप्रस्थातर्वसीयो न उन्नयाम्युदुत्ये मधुमत्तमा गिरः स्तोमास इरते। सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव कण्वा इव भृगवः सूर्या इव विश्वमिद्धितमानशुः' इति प्रतिप्रस्थातारँ संप्रेष्यति। प्रतिप्रस्थाता। 'उदेत प्रजामुत वर्चो दधानायुष्मान् राय उत यज्ञा असृक्षत। गायत्रं छन्दोऽनुसँरभध्वमथा स्याम सुरभयो गृहेषु' सकृदेवोक्त्वा होतृप्रथमान् यजमानप्रथमान् वोन्नयति। निष्क्रामयति। स्नानान्तं सर्वं कुर्वन्ति। 'प्रतियुतो वरुणस्य पाशः' (तैसं १.४.४५) उदकान्तं प्रतियौति। 'प्रत्यस्तो वरुणस्य पाशः' (तैसं १.४.४५) उदकान्तं प्रत्यस्यन्ति। औदुम्बरीः समिधो धारयन्तः प्रतिप्रस्थातारं पुरस्कृत्यानवेक्षमाणा आयन्ति। परोगोष्ठे मार्जयन्ते। ग्रहणक्रमेणौत्तरवेदिके समिधोऽभ्यादधति। 'एधोऽस्येधिषीमहि स्वाहा' (तैसं १.४.४५) प्रथमाम्। 'समिदसि स्वाहा' द्वितीयाम्। 'तेजोऽसि तेजो मयि धेहि स्वाहा' तृतीयाम्। 'अपो अन्वचारिषँ रसेन समसृक्ष्महि।

पयस्वाँ अग्न आगमन्तं मा सँसृज वर्चसा' (तैसं १.४.४५) सर्वे औत्तरवेदिकमुपतिष्ठन्ते। एवं पत्नी गार्हपत्ये समिधोऽभ्याधायोपतिष्ठते। 'अपो अन्वचारिषँ रसेन समसृक्ष्महि। पयस्वत्यग्न आगमं तां मा सँसृज वर्चसा'। ततः परिहिते वाससी अध्वर्यवे दत्तः।

उदवसायानुदवसाय वा 'प्रसूता देवेन०' इत्यादि। 'यद्घर्मः पर्यवर्तयदन्तान् पृथिव्या दिवः। अग्निरीशान ओजसा वरुणो धीतिभिः सह । इन्द्रो मरुद्भिः सखिभिः सह। अग्निस्तिग्मेन०' (तैब्रा १.५.५) इत्यादि वैश्वदेववत् । सांवत्सरिकपक्षे पौर्णमास्येष्ट्वोदवसायेत्यादि । यस्य स्मृत्यादि। समाप्तं वरुणप्रघासपर्व ।

साकमेधपर्व

१. अनीकवतीष्ट्यारम्भः

अथ साकमेधाः। प्राकृतविहार एव। नोदवसानम्। महाहविष एवोदवसानसंबन्धः। सांवत्सरिकप्रयोगपक्षे चतुर्दश्यामेवोदयात् प्रागेव आरम्भः। महाहविष एव पौर्णमासीसंबन्धात्। अहुत्वैवाग्निहोत्रम् । उदयसमये निर्वापपक्षे हुत्वेति केचित्। अहुत्वेति सुवचनम्। 'पुरा प्रातरग्निहोत्रात्' (हिश्रौ ९.१८) इति पौर्णदर्व्ये स्मरणात्। 'ओढासु देवतास्वग्निमुपवाज्य' (हिश्रौ ९.७) इत्येतस्य गृहमेधीयसूत्रस्य प्रकृतावङ्गीकारवत्। दर्भेष्वासीन इत्यादि 'साकमेधैर्यक्ष्ये'। वृता एव ऋत्विजः। अध्वर्युरुध्दरणादि। नाजस्र उध्दरणम्। 'ममाग्ने० अद्य यज्ञाय० इमामूर्जं' यथातिथि। 'साकमेधीयँ हविः०' सर्वेषां साकमेधसंबन्धः। 'द्वयहँ साकमेधैः' (हिश्रौ ८.१) इति वचनात्। पौर्णमासं तन्त्रम्। बर्हिः। 'एकविँशतिधा०' इत्येव। वेदम्। तूष्णीमेवोपवेषः। उपरिष्टाद्वेदकर्मणः परिस्तरणस्य वचनात् परिस्तरणम्।

२. हविर्निर्वापः

'कर्मणे वां०'। अष्टौ कपालानि शेषाणि प्रकृतिवत्। निर्वापे 'देवस्य० (पूष्णो हस्ता)-भ्यामग्नयेऽनीकवते जुष्टं (निर्वपामि)। अग्नेऽनीकवन् हव्यँ (रक्ष)स्व। देवस्य० (पूष्णो हस्ता)भ्यामग्नयेऽनीकवते वो जुष्टं प्रोक्षा(मि)'। न 'यथाभागं०'। अभिघारणे 'आप्यायतां घृ-(तयोनिरग्निर्हव्यानुमन्यताम्। खमङ्क्ष्व त्वचमङ्क्ष्व सुरूपं त्वा वसुविदं पशूनां तेज)साग्नयेऽनीक-वते जुष्टम(भिघारयामि)'। तूष्णीमासादनम्। 'यज्ञोऽसि०। अयं यज्ञः०'। विहव्यम्। चतुर्होता।

३. प्रधानयागः

'अग्नयेऽनीकवतेऽनु(ब्रूहि) । अग्निमनीकवन्तं यज'। अग्नयेऽनीकवत इदं (न मम)। 'अग्नेरनीकवतोऽहं (देवयज्य)यान्नादो (भूयासम्)'। विरुज्य प्राशित्रम्। चतुर्धाकरणम्। अन्वाहार्यो दक्षिणा। न पार्वणः। न बर्हिरनुप्रहरणम्। अस्यामेवेष्टौ स्विष्टकृदुत्तरं हविरासादनोत्तरं वा स्वकाले प्रातरग्निहोत्रं कर्तव्यम्। सिद्धमिष्टिः संतिष्ठते।

४ सान्तपनीयेष्ट्यारम्भः

अथ सान्तपनीयेष्टिः। तत्र यथा मध्याह्ने प्रचारो भवति तथा तत्पूर्वमारम्भः। दर्भेष्वासीनोऽवान्तरसंकल्पं कुर्यात् 'इष्ट्या यक्ष्ये'। अध्वर्युः। विहरणादि। 'ममाग्ने० अद्य यज्ञाय०

इमामूर्जं 'यथातिथि। 'साकमेधीयँ हविः०'। पौर्णमासं तन्त्रम्। आनीकवतस्यैव बर्हिः प्रज्ञातँ स्थापितं भवति। अत्रासिदादानादि प्रस्तरं परिभोजनीं वेदार्थं दर्भाँश्चादायाहरति। असिदादानादि 'आच्छेत्ता (ते मा रिषम्)' इत्यन्तं कृत्वा। प्रस्तरं निधाय परिभोजनीं वेदतृणानि च छित्वा। 'देवबर्हिः शत(वल्शं विरोह)'। न 'सुसंभृता (त्वा संभरामि)'। एकविँशतिदारुकमिध्मम्। वेदमुपवेषं परिस्तरणम्। न 'उभावग्नी०'।

५. हविर्निर्वापः

'कर्मणे वां (देवेभ्यः शकेयम्)'। पात्रासादने कपालस्थाने स्थालीम्। शम्यादृषदुपलाकुटरुमदन्तीवर्जं प्रकृतिवत्। न ब्रह्मवरणम्। न 'अहं भूपति(रहं०)'। 'वाचस्पते०' इत्यादि वर्तते। निर्वपणे 'मरुद्भ्यः सान्तपनेभ्यो जुष्टं निर्व(पामि)। मरुतः सान्तपना हव्यँ रक्षध्वम्। देव(स्य त्वा ० हस्ता)भ्यां वो जुष्टं प्रोक्षामि मरुद्भ्यः सान्तपनेभ्यः'। रक्षोनिनयनान्ते। 'धृष्टिरसि (ब्रह्म यच्छ)' इत्यादि स्थालीमुपधाय प्रथमेन कपालमन्त्रेण। 'ध्रुवासि' इति मन्त्रँ संनमति। शूर्पादेव तण्डुलान् समोप्योत्पूय। 'घर्माः स्थ विश्वायुषः। अन्तरितँ रक्षोऽ(न्तरिता अरातयः)। अग्निस्ते०' श्रपयति। 'अविदह(न्)त (श्रपयत)'। नाप्यनिनयनम्।

स्तीर्णवेदिपक्षे न 'वेदेन वेदिं०'। स्तीर्णाया वेदेः स्तम्बयजुर्हरति। 'देवस्य त्वा०' इत्यादि। उध्दननखननसंमार्जनवर्जं सर्वं करोति। आनीकवतस्य बर्हिःप्रहरणपक्षे अत्र 'वेदेन०' इत्याद्यविकृतम्। 'पुरा क्रूरस्य०' इत्यादि समानमाप्रोक्षणामन्त्रणात्। ब्रह्माणमामन्त्र्येध्मं वेदिं च प्रोक्ष्य। 'बर्हिरसि स्रुचे त्वा (स्वाहा)' इति प्रस्तरं प्रोक्षति। द्वितीयपक्षे अविकृतेन बर्हिःप्रोक्षणम्। शेषनिनयनान्तं समानम्। ततो ब्रह्मणे प्रस्तरदानान्तं समानम्। न बर्हिस्तरणम्। अनूयाजार्थे उल्मुके (उदूह्य) इत्यादि। न 'इदमहं०। सूर्य ज्योति(र्विभाहि०)'। तूष्णीमभिघारणम्। न 'तस्मिन्त्सीद०' इति। न 'इरा भूतिः०'। 'प्रियेण (नाम्ना प्रियँ सद आसी)दतु' इत्यासादनम्। 'प्रजापतिरसि०। अयं यज्ञः०'। विहव्यम्। चतुर्होता।

६. प्रधानयागः

प्रधाने। 'मरुद्भ्यः सान्तपनेभ्योऽनुब्रूहि। मरुतः सान्तपनान् यज'। मरुद्भ्यः सान्तपनेभ्य इदं (न मम)। 'मरुतां सान्तपनानामहं (देवयज्यया) वृत्रहा (भूयासम्)'। अविरुज्य प्राशित्रम्। न चतुर्धाकरणम्। अन्वाहार्यो दक्षिणा। न बर्हिरनुप्रहरति। स्तीर्णमिव स्थापयति। गृहमेधीये स्तीर्णाया वेदेः स्तम्बयजुर्हरतीत्युक्तत्वात्। 'यां घर्मे स्थालीमु(प चिन्वन्ति वेधसः)। पूष्णस्ता(मपिव्रत इन्द्रवायू विमुञ्चताम्)'। पुनरालम्भवर्जम् इष्टिः संतिष्ठते।

७. गृहमेधीयः

अथ गृहमेधीयः। अपराह्णे तूष्णीं शाखामाहृत्य तूष्णीं यजमानस्य सर्वान् वत्सानपाकरोति। सायँ हुतेऽग्निहोत्रे गृहमेधीयस्य तन्त्रं प्रक्रमयति। अपूर्वमिदं दर्विहोमधर्मकं कर्म। तत्र यद्यत्कर्तव्यं तदाचार्यैः (हिश्रौ ८.६) कण्ठत एवोक्तम्। दर्भेष्वासीनो० 'गृहमेधीयेन यक्ष्ये'। अध्वर्युः। विहरणम्। 'ममाग्ने० अद्य यज्ञाय० इमामूर्जं' यथातिथि। 'साकमेधीयँ हविः०'। नास्ति व्रतम्। नापरेण दक्षिणातिक्रामति। नेध्माबर्हिः। परिभोजनीं वेदार्थं दर्भाँश्चाहृत्य। 'वेदोऽसि येन त्वं०' वेदं कृत्वा तूष्णीं शाखामूलं छित्वोपवेषं करोति। तूष्णीं त्रिवृच्छाखापवित्रं करोति। पवित्रेण गां दोहयतीति पक्षे अन्यथा न। 'परिस्तृणीत०'। न 'उभावग्नी०'।

८. हविर्निर्वापः

'कर्मणे वां० । यज्ञस्य सं(ततिरसि०)'। (ब्रह्मयजमानयोः) सदने (करोति)। पात्रसँसादनकाले कपालस्थाने महतीं कुम्भीम्। शम्यादृषदुपलाकुटरुमेक्षणप्रणीताप्रणयनमदन्ती-योवल्लवर्जं प्रकृतिवत्। पात्र्या सह तिस्र उद्धरणपात्रीः मेक्षणस्थाने दर्व्युदायुवनाख्यां दर्वीं शाखापवित्र-मभिधानीं निदाने दोहनमिति। न ब्रह्मवरणम्। न जपः। 'वाचस्पते०' इत्यादि। उभौ ब्रह्मयजमा-नावुपविशतः। 'पवित्रे स्थो०। इमौ (प्राणापानौ०)। विष्णो (मनसा पूते स्थः)'। न प्रणीताः। 'संविशन्तां०। दक्षाय (वानस्पत्यासि)' इत्यादि। पवित्रनिधनान्तं प्रकृतिवत्। 'यच्छन्ताम्०' इत्यादि 'देवस्य (त्वा सवितुः० हस्ता) भ्यां मरुद्भ्यो गृहमेधिभ्यो जुष्टं नि(र्वपामि)' त्रिः। तूष्णीं चतुर्थम्। अन्वावापसमये पयोनुरोधेन यथेष्टमन्वावपति। 'इदं देवानाम्' इत्यादि। 'मरुतो गृहमेधिनो हव्यँ रक्षध्वम्। देवो व०' इत्यादि। 'देवस्य त्वा (सवितुः० हस्ता)भ्यां वो जुष्टं प्रोक्षामि मरुद्भ्यो गृहमेधिभ्यः। शुन्धध्वम्०' इत्यादि। न फलीकरणस्थापनम्। प्रक्षालन-निनयनान्तं प्रकृतिवत्। 'धृष्टिरसि०' इत्यादि स्थालीवत् कुम्भीमुपधाय। 'भृगूणाम(ङ्गिरसां तपसा) तप्यस्व' इत्यन्ते तस्यां तूष्णीं शाखापवित्रमुदगग्रमादधाति। अभिधान्यादानादि तूष्णीं सर्वा दोहयित्वा तूष्णीं संक्षालननिनयनान्तं कृत्वा शूर्पादिव तण्डुलान् समोप्य नोत्पुनाति। 'घर्माः स्थ विश्वायुषः। अन्तरितँ०। अविदहन्त (श्रपयत)'। नाप्यनिनयनम्। दक्षिणाग्नौ प्रतिवेशमोदनं पत्नी तूष्णीं पचति।

न 'वेदेन वेदिम्०'। 'देवस्य त्वा०' इत्यादि स्तीर्णाया वेदेर्लोमभ्यः स्तम्बयजुर्हरति। उध्दननखननसंमार्जनवर्जं करोति। 'पुरा क्रूरस्य०' इति वर्तते। 'प्रोक्षणी (रासादय) स्रुवं च स्रुचश्च संमृड्ढ्याज्येनोदेहि।' प्रोक्षण्यासादनादि पात्राणि संमृज्य संमार्गानग्नौ प्रहृत्य न पत्नीँ संनह्यति। 'अग्ने गृहपत उपमा ह्वयस्व' इत्यादि वर्तते। समानमाज्यप्रोक्षण्युत्पवनात्। आज्यं प्रोक्षणीश्चोत्पूय ध्रुवायामेव गृह्णाति। 'सुप्रजास्त्वाय०' इत्यादि। न जुहूपभृतोः। 'आपो देवी (रग्रेपुवो०)। ब्रह्मन् प्रोक्षि(ष्यामि)। प्रोक्ष यज्ञं०। वेदिरसि बर्हि(षे त्वा स्वाहा)। स्वधा पितृभ्यः०। यजमाने प्राणा(पानौ दधामि)'। वेद्यां प्रज्ञाते पवित्रे अपिसृज्य। विधृती तूष्णीं सादयित्वा। तूष्णीं जुहूपभृतावासाद्य। 'ध्रुवासि घृ(ताची०)। ऋषभोऽसि०। यो मा वाचा०। स्योनो मे०'। तूष्णीमाज्यस्थालीम्। 'एषासदत् सुकृतस्य लोके तां विष्णो (पाहि पाहि यज्ञं०)। विष्ण्वसि वैष्णवं धाम प्राजापत्यम्'।

९. हविरुद्वासनम्

पश्चाद्गार्हपत्यस्योपविश्य। 'सूर्यं ज्योतिर्वि(भाहि महत इन्द्रियाय)'। शृतस्य हविषः किंचित् पौर्णदर्व्यर्थं शरं दर्व्युदायुवनेनोध्दृत्य प्रज्ञातं निधाय। 'स्योनं ते सदनं०' तिसृषु पात्री-षूपस्तीर्य। तूष्णीमभिघार्य। 'आर्द्रो भुवनस्य गोपाः०' इति कुम्भ्या सहोद्वासयति सकृदेव। ततः स्थालीतस्त्रीनोदनान् पात्रान्तरेषु उध्दृत्य उपस्तीर्णासु पात्रीषु 'तस्मिन् सीद०' इति मन्त्रावृत्त्या क्रमेण प्रतिष्ठापयति। तत अनिष्कासितां कुम्भीं प्रज्ञातां निधाय तस्यां चरुलिप्तमेव दर्व्युदायुवन-मवधाय ओदनत्रयं उद्धरणक्रमेण तूष्णीमभिघार्य। वेद्यां प्रज्ञातापिसृष्टपवित्राभ्यां 'हर्योस्त्वा वाराभ्या(मुत्पुनामि)' इति क्रमेणोत्पूय पवित्रे यथास्थाने न्यस्य। अथवा लौकिकदर्भाभ्यां वोत्पु-नाति 'पवित्रे अपिसृज्य ध्रुवाँ स्रुवं च सादयति' (हिश्रौ ८.१७) इत्याचार्यवचनात्। लौकिका-भ्यामेवोत्पवनं साधु। 'देवस्त्वा (सविता मध्वानक्तु)' इति क्रमेणालंकृत्य। 'प्रियेण नाम्ना-

(प्रियॅं सद) आसीदन्तु। प्रजापतयः स्थ सर्वतः श्रिताः स(र्वतो मां भूतं भविष्य)च्छ्रयन्तांॅ शतं (मे सन्त्वाशिषः ०)। अयं यज्ञः ०'। विहव्यम्। चतुर्होता। वेदं निधाय वेद्यन्तान् परिस्तीर्य होतारमामन्त्र्य। ओढासु देवतासु वेदेनाग्निमुपवाज्य।

१०. प्रधानयागः

तत आज्यभागाभ्यां प्रचर्य। व्याख्याते पञ्चहोतरि। जुह्वामुपस्तीर्य। 'मा भेर्मा सं वि-(क्था मा०)' त्रिः। सर्वेषां क्रमेण मध्येभ्योऽवदाय पूर्वार्धेभ्योऽवद्यति। 'मरुद्भ्यो गृहमेधिभ्योऽनु (ब्रूहि)'। अभिघारयति प्रत्यनक्त्यत्याक्रम्याश्राव्य प्रत्याश्राविते। 'मरुतो गृहमेधिनो यज'। मरुद्भ्यो गृहमेधिभ्य इदं (न मम)। 'मरुतां गृहमेधिनामहं (देवयज्यया) वृत्रहा (भूयासम्)'। त्रयाणामुत्तरार्धेभ्यः स्विष्टकृत्। द्वितीयाभिघारणे ध्रौवसमाप्तिः। 'वैश्वानरे हविरि(दं जुहोमि०)'। प्राशित्रमवदायेडामवद्यति। न यजमानभागम्। पर्वणी अनक्ति। अवान्तरेडा-मवदाय 'उपहूतः पशुमान(सानि)' इत्युक्त्वा। 'पयसाभ्यस्मान्' इति यजमानेनोक्ते ब्रह्मणे प्राशित्रं परिहृत्य। 'इडासि०' इतीडां प्राश्नन्ति मार्जयन्ते। प्राशितायामिडायां तानोदनान् हविर्भोजनार्हेभ्योऽमात्येभ्यो भोजनार्थमुपहरन्ति। प्रतिवेशपक्वस्य पत्न्यश्नाति। गृहमेधीय इडान्तः संतिष्ठते।

ततो दम्पत्योरमात्यानामृत्विजां च त्रैककुदेनाञ्जनमभ्यञ्जनं च। मातृभिः सह वत्सान् वास-यन्ति। तत ऋत्विजादीनां तृप्त्यर्थं लौकिकेऽग्नौ प्रतिवेशाख्या ओदनाः अपूपादिव्यञ्जनयुक्ताश्च पच्यन्ते। बहुवचनं व्यञ्जनपरम्। तैरन्नैस्तृप्ता हृष्टवदना एतांॅ रात्रिं वसन्ति। ततः अर्धरात्रोत्तरं महापितृयज्ञार्थदोहाय अभिवान्यवत्साया वत्सं बध्नाति। पयसाग्निहोत्रं चेदग्निहोत्र्या अपि वत्सं बध्नाति।

११. पूर्णदर्व्यः

अथ पूर्णदर्व्यः। पुरा प्रातरग्निहोत्रात् क्रीडिनेष्टिप्रचारपर्याप्तकालात् प्राक् पूर्णदर्व्येण चरन्ति।ॅ गार्हपत्य एव। नाहवनीयप्रणयनम्। गार्हपत्यं परिस्तीर्य तस्य दक्षिणतः सदने करोति। उत्तरेण गार्हपत्यं दर्भान् संॅस्तीर्य दर्व्युदायुवनसंलग्नं लेपं निमृज्य प्रज्ञातं निधाय। तेषु दर्भेषु स्रुवं दर्व्युदायुवनाख्यां दर्वीम् आज्यस्थालीं समिधमग्निहोत्रहवणीमुपवेषं संमार्गदर्भांश्च सादयित्वा। अपरेण गार्हपत्यं दक्षिणातिक्रम्य ब्रह्मयजमानौ सदनयोरुपविशतः। स्मार्तवत् पवित्रे कृत्वा प्रोक्षणीः संॅस्कृ-त्योत्तानानि पात्राणि प्रोक्ष्य स्रुवं दर्वीं च संमृज्याज्यंॅ संॅस्कृत्य पवित्रेऽग्नावाधाय। गार्हपत्यं परिषिच्य दर्व्यामुपस्तीर्य शरं निष्कासं च दर्व्यामवधाय निमृष्टं दर्व्युदायुवनलेपं चावधायाभिघार्य। 'पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत। वस्नेव विक्रीणावहा इषमूर्जंॅ शतक्रतो' (तैसं १.८.४) इत्य-नुद्रुत्य समीपवर्तिनो ऋषभस्य व्यावहारिकेण नाम्ना तमाहूय। आह्वानोत्तरं प्रतिवचनरूपे तस्य रवते जुहोति। 'देहि मे ददामि ते नि मे धेहि नि ते दधे। निहारमिन्नि मे हरा निहारं निहरामि ते स्वाहा' (तैसं १.८.४) गार्हपत्ये आसीन एव जुहोति। इन्द्रायेदं(न मम)। तमृषभमध्वर्यवे ददाति 'अध्वर्यो पूर्णदर्व्यस्य दक्षिणात्वेनर्षभं ते ददामि'। न प्रतिग्रहमन्त्रः। यदा ऋषभः शब्दं न करोति तदा 'ब्रह्मन् होष्यामि' इति ब्रह्माणमामन्त्र्य। 'जुहुधि' इति तेनानुज्ञातो जुहुयात्। तदा सैव दक्षिणोभाभ्याम्। तस्मिन् पक्षे दक्षिणा नास्तीति केचित्। इति पूर्णदर्व्यः।

१२. क्रीडिनेष्टिः

क्रीडिनेष्टिः । अनुदितहोमिनां तु अग्निहोत्रोत्तरमेवारम्भः । उदितहोमिनस्तु नापकर्षः अवचनात् । इष्टेर्निर्वापस्य प्रचारस्य वा उद्यता सूर्येण साकं कालविधानात् । अपकर्षस्यावचनाच्च । स्विष्टकृदुत्तरँ हविरासादनोत्तरं वाग्निहोत्रं होतव्यम् । दर्भेष्वासीन इत्यादि । 'इष्ट्या यक्ष्ये' । अध्वर्युः । विहरणम् । 'ममाग्ने० अद्य यज्ञाय० इमामूर्जं' यथातिथि । 'साकमेधीयँ हविः०' । पौर्णमासं तन्त्रम् । इध्मार्बहिः । बर्हिषा व्रतम् । वेदम् । परिस्तरणम् ।

पाणिसंमर्शनादि । पात्रासादने सप्त कपालानि । शेषाणि प्रकृतिवत् । निर्वापे । 'देवस्य (त्वा सवितुः ० हस्ता)भ्यां मरुद्भ्यः क्रीडिभ्यो जुष्टं निर्व(पामि) । मरुतः क्रीडिनो हव्यँ (रक्ष)ध्वम् । देव(स्य त्वा० हस्ता)भ्यां वो जुष्टं प्रोक्षामि मरुद्भ्यः क्रीडिभ्यः । शुन्धध्वम् ०' इत्यादि । अग्नीषोमीयवत् सप्त कपालान्युपदधाति । न 'यथाभागं०' । तूष्णीमभिघारणम् । '(प्रियेण नाम्ना प्रियँ सद) आसीदतु' इत्यासादनम् । 'प्रजापतिरसि० । अयं यज्ञः०' । विहव्यम् । चतुर्होता ।

'मरुद्भ्यः क्रीडिभ्योऽनुब्रूहि । मरुतः क्रीडिनो यज' । मरुद्भ्यः क्रीडिभ्य इदं (न मम) । 'मरुतां क्रीडिनामहं (देवयज्यया) वृत्रहा (भूयासम्)' । अविरुज्य प्राशित्रम् । न चतुर्धाकरणम् । अन्वाहार्यो दक्षिणा । न पार्वणः । सिद्धमिष्टिः संतिष्ठते ।

१३. महाहविषेष्ट्यारम्भः

अथ महाहविषेष्टिः । उदवसानं वैकल्पिकम् । गार्हपत्यस्याहवनीयस्य वा पुरस्ताद् वारुणप्रघासिकोत्तरविहारवद् वेदिं करोति । अजस्रपक्षे त्वाहवनीयस्यैव पुरस्तात् । गार्हपत्यस्य पश्चाद् दर्भेष्वासीनो० । 'महाहविषेष्ट्या यक्ष्ये' । अध्वर्युः । उद्धरणपक्षे आहवनीयात् प्रणयनपक्षे आहवनीयमुध्दृत्य पात्रासादनादि करोति । गार्हपत्यात् प्रणयनपक्षे अजस्रपक्षे च पात्रासादनप्रभृत्येव करोति । उत्तरेणाग्निं दर्भान् सँस्तीर्येत्यादि । आज्यसंस्कारान्तं कृत्वा । वेदं कृत्वा वेदिं करोति । वारुणप्रघासिकोत्तरविहारवेदिकरणवद् '(देवस्य सवितुः सवे कर्म कृण्वन्ति) वेधसः' (इत्य)न्तं कृत्वा । उत्तरवेदिकरणादि पूर्णाहुत्यन्तं करोति । 'ममाग्ने० अद्य यज्ञाय० इमामूर्जं' यथातिथि । 'साकमेधीयं महाहविषँ हविः०' । सान्नाय्याभावान्न शाखाहरणम् । आमावास्यं तन्त्रम् । अत्र व्रतग्रहणम् । बर्हिः । इध्मा । '(यत् कृष्णो० ततस्त्वां) विँशतिधा०' इत्यूहः । परिस्तरणम् । न 'उभावग्नी०' ।

१४. हविर्निर्वापः

'कर्मणे वां ०' । पात्रासादने द्वात्रिंशत् कपालानि चतस्रः स्थालीः सान्नाय्यामिक्षावाजिनपात्रवर्जितानीतराणि वरुणप्रघासवत् । न ब्रह्मवरणम् । अत्र पवित्रकरणम् । निर्वापे पौष्णान्तान् निरुप्य तान् व्रीहीन् पात्रान्तरे उध्दृत्य पुनः पवित्रे निधाय । ऐन्द्राग्नं निर्वपति । अन्वावापान्तं कृत्वा पात्रान्तरे उध्दृत्य पूर्वोध्दृतान् व्रीहीन् शूर्पे आनीय तत्र । '(देवस्य त्वा०) इन्द्राय जुष्टं नि(र्वपामि)। विश्वकर्मणे जुष्टं (निर्वपामि)' । ऐन्द्राग्नव्रीहिपात्रं शूर्पे निधायोपसादयति । ऐन्द्राग्नान्तमुक्त्वा । 'इन्द्र हव्यँ (रक्षस्व) । विश्वकर्मन् हव्यँ रक्षस्व' । प्रोक्षणे 'देवस्य त्वा (सवितुः ० हस्ता)भ्यामग्नये सवित्रे सरस्वत्यै पूष्णे विश्वकर्मणे वो जुष्टं प्रोक्षामि सोमायेन्द्राग्निभ्यामिन्द्राय । शुन्धध्वम् ०' इत्यादि । ऐन्द्राग्नभिन्नानां व्रीहीणाम् 'अवबाढँ रक्षः' इत्यन्तं कृत्वा । ऐन्द्राग्नानुलूखल आवपति । 'अग्नेस्तनूरसि० । अव रक्षो० । वर्षवृद्ध(मसि) । वर्षवृद्धाः(स्थ) । प्रति त्वा (वर्षवृद्धं वेत्तु) । परापूतँ०' । तान् तुषानवभृथार्थं प्रज्ञातान् निधाय । उभयानेकीकृत्य 'वायुर्वो०' इत्यादि करोति ।

'अँशवः स्थ०' अन्ते राशिद्वयं समं कृत्वा । 'यथाभागं व्यावर्तध्वम्' इत्युक्त्वा । 'इदमग्नये च सवित्रे चेन्द्राग्निभ्यां च विश्वकर्मणे च' पुरोडाशार्थान् । 'इदँ सोमाय च सरस्वत्यै च पूष्णे चेन्द्राय च' चर्वर्थान् । पूर्ववत् पौष्णमपच्छिद्य सह पुरोडाश्यैः पिनष्टि । प्रातर्दोहामिक्षावर्जम् आपृषदाज्यग्रहणात् वरुणप्रघासवत् । यथाप्रयोगे तु पूर्ववत् पृषदाज्यग्रहणम् । सांवत्सरिके कार्तिकीमार्गशीर्ष्योः क्रमेणाषाढीश्रावणीवत् । अभिघारणे । '(आ प्यायतां०) विश्वकर्मणे जुष्टमभिघारयामि' । एककपालधर्माः । '(प्रियेण नाम्ना प्रियँ सद) आसीदन्तु' इत्यासादनम् । 'यज्ञाः स्थ' इति पञ्चानाम् । 'प्रजापतिरसि०' इति सौम्यस्य । 'यो नः कनीय० अपतमिन्द्राग्नीन्द्रो भुवनां नुदन्ताम-(हं प्रजां वीरवतीं विदेय) । अयं यज्ञः०' । पञ्चहोता । विहव्यम् । चतुर्होता ।

निर्मन्थ्यः । समानमा स्रुच्याघारात् । स्रुच्याघारे 'समारभ्यः०' एतस्य स्थाने अनेन मन्त्रेणाघारयेत् 'अग्ने वेर्होत्रं वेर्दूत्यमूर्ध्वो अध्वरेष्ठा अव तां त्वा द्यावापृथिवी अव त्वं द्यावापृथिवी अव स्विष्टकृदिन्द्राय देवेभ्यो भव जुषाणो अस्य हविषो घृतस्य वीहि स्वाहा' (कासं ९.५) । अग्नय इदं (न मम) । 'वागस्याग्नेयी सपत्नक्षयणी (वाचामेन्द्रियेणा विश)' इत्यूहः । 'बृहद्भाः' इत्यादि ।

१५. प्रधानयागः

प्रचारे ऐन्द्राग्नान्तं वरुणप्रघासवत् । 'इन्द्रायानुब्रूहि । इन्द्रं यज' । इन्द्रायेदं (न मम) । 'इन्द्रस्याहं (देवयज्य)येन्द्रियाव्यन्नादो भूयासम्' । एककपालेन चरति । 'विश्वकर्मणे' उपाँशु 'अनुब्रूहि' इत्युच्चैः । 'विश्वकर्माणं' उपाँशु 'यज' इत्युच्चैः । विश्वकर्मण इदं (न मम) । 'विश्वकर्मणोऽहं (देवयज्य)यान्नादो (भूयासम्)' । अत्याक्रम्य ध्रौवाच्चतुर्गृहीतं गृहीत्वा जुहोति 'सहश्च स्वाहा' । सहस इदं (न मम) । 'सहस्यश्च स्वाहा' । सहस्यायेदं (न मम) । 'तपश्च स्वाहा' । तपायेदं (न मम) । 'तपस्यश्च स्वाहा' । तपस्यायेदं (न मम) । स्विष्टकृतादि प्रतिपद्यते । आग्नेयविकाराणां विरुज्य प्राशित्रं चतुर्धाकरणं च । अविरुज्येतरेषाम् । ऋषभः प्रवया दक्षिणा । 'अयमृषभोऽमृतस्य पूर्णः ०' । अन्यदविकृतम् । 'देवस्य त्वा० दक्षिणे रुद्राय गां तेनामृ(तत्वमस्यां वयो)०' । पृषदाज्येन नवानूयाजाः । वाजिनयागपार्वणामिक्षाभागप्राशनवर्जं वरुणप्रघासवत् संतिष्ठते ।

अत्र यावदुक्तोऽवभृथः । न सौमिकावभृथातिदेशः । ऐन्द्राग्नतुषान् आदाय । 'उरुँ हि राजा०(विध)श्चित्' (तैसं १.४.४५) अन्तरेण चात्वालोत्करावुदञ्चो निष्क्रम्य । यत्रापस्तत्र गत्वा अप्सु तूष्णीं तुषान् विकीर्यागच्छन्ति । न समिदाधानादि । 'तुषप्रतिपादनं च क्रियते' (हिश्रौ १०.१०) इति वचनात् । वरुणप्रघासवत् तुषप्रतिपादनं केचिदिच्छन्ति । इति महाहविषेष्टिः ।

१६. महापितृयज्ञारम्भः

अथ तदानीमेव महापितृयज्ञः । 'महापितृयज्ञेन यक्ष्ये' । अध्वर्युः । विहरणपक्षे प्राकृताहवनीयमुद्धृत्य वेदादि करोति । अजस्रपक्षे प्राकृतस्य नोद्धरणम् । उपक्लृप्तायाः पैतृक्या वेदेर्दक्षिणतो ब्रह्मयजमानौ तूष्णीमुपविशतः । 'वेदोऽसि येन' इत्यविकृतमन्त्रेण वेदं करोति । 'इदं तस्मै ह(र्म्यं करोमि) यो वो देवाः पितरश्चरति ब्रह्म(चर्यम्)०' इति पितृयज्ञवेदिदेशमभिमृशति । 'वेदेन वेदिम्०' इति पैतृकीं वेदिं संमार्ष्टि । 'देवस्य त्वा०' इत्यादि । 'पृथिवि देवपितृयजन्योषध्या(स्ते मूलं माहिँसिषम्) । अपहतोऽररुः पृथिव्यै देवपितृयजन्यै । यो मा हृदा० द्वेष्टि देवाः पितरः । अप-

हतोऽररुः पृथिव्या अदेवपितृयजनः । अवबाढा देवपितृयजन्या (यातुधानाः)'। 'ऋतमसि' इति पूर्वपरिग्राहः । यजमानः । 'बृहस्पते परिगृहाण वेदिँ स्वगावो देवाः पितरः सदनानि (सन्तु)० । इमां नराः कृणु(त वेदिमेत्य)० रिष्यादेत देवेभ्यः पितृभ्यो जुष्टामदित्या उपस्थ इमां देवाः पितरोऽजुषन्त सर्वे० । अपहतोऽररुः पृथिव्या आ देवपितृयजं वह । यदुद्धन्तो जिहिँसिम जीव(मस्या वेदिं चक्रमा) मनसा देवपितृयन्तः० '। न खनति । पैतृकीं वेदिं कटादिभिः परिश्रयन्ति । उत्तरस्यां स्रक्तौ द्वारं कुर्वन्ति । ततोऽध्वर्युर्दक्षिणाग्नेरङ्गारान् पात्रे गृहीत्वोपयमनीरुपयम्यापरेण गार्हपत्यमुत्तरेण प्राकृतं विहारमग्रेणाहवनीयं गत्वा द्वारेण पैतृकं विहारं प्रविश्याग्नेय्यभिमुखो वेद्यां मध्य एव निवपति ।

स एवाहवनीयोऽस्यामिष्टौ तमुपसमाधाय इममेवाहवनीयं प्राकृतौ गार्हपत्यदक्षिणाग्नी चान्वादधाति । 'ममाग्ने०'। व्याहृतिभिरन्वाधानमिति केचित् । 'अग्निं गृह्णामि० अद्य यज्ञाय रमतां देवताभ्यः०'। अत्रापि पितृपदस्यानुषङ्गं केचिदिच्छन्ति। देवतापदे सर्वत्र। 'इमामूर्जं' यथातिथि । 'तान् देवान् पितृन् परिगृह्णामि पूर्वः । अग्निर्हव्यव्याडिह तो(नाव)हतु साकमेधीयं महापितृयज्ञँ हविः०'। वैकृताहवनीयप्राकृतगार्हपत्ययोर्मध्ये तिष्ठन्तौ जपतः 'अन्तराग्नी पशवो देवपितृसँसदमागमन् । तान् पूर्वः० । मम देवा०' अविकृत एव । दक्षिणाग्न्यन्वाधानानन्तरं बर्हिराहरणम् । बर्हिः समूलमुपमूललूनं वा । समूलपक्षे असिदादाननिष्टपननिधानछेदनालवाभिमर्शात्मप्रत्याभिमर्शनानि न सन्ति । अभ्र्यादानं करोति । उपमूललूनपक्षे प्रयोगः । 'देवानां पितृणां परि-(षूतमसि)० । इदं देवानां पितृणाम् । देवस्य (त्वा० हस्ता) भ्यां बर्हिर्देवपितृषदनमारभे । देवेभ्यः पितृभ्यस्त्वोर्ध्वबर्हिर्भ्यः । देवपितृर्बर्हिर्मा त्वा (न्वङ्मा) ० । या जाता ओषधयो देवेभ्यः पितृभ्यस्त्रियुगं०'। अत्र बर्हिरेव छिनत्ति । न प्रस्तरः । न 'अलुभितो (योनिः)'। 'देवपितृंगममसि'। बर्हिषा व्रतम् । 'देवा देवेषु०' अनूहेन । प्रकृताद् द्राघीयान् इध्मो दीर्घः स्थूलश्चेत्यर्थः । इध्मे द्वौ परिधी सर्वान् वोपसंनह्यति । 'यत्कृष्णो ० ततस्त्वां विँशतिधा० । द्वौ परिधी तिस्रः समिधो य-(ज्ञायुरनु) संचरान्'। परिधित्रयपक्षे यथाप्रकृतिवत् मन्त्रौ । 'कृष्णोऽस्याखरेष्ठो देवपितृपुरश्चर (सघ्यासं त्वा)'। तूष्णीमुपवेषः । परिस्तरणम् । न प्राकृताहवनीयस्य । न 'उभावग्नी ०'।

१७. हविर्निर्वापः

'कर्मणे वां देवेभ्यः पितृभ्यः शकेयम्'। गार्हपत्यात् पैतृकाहवनीयपर्यन्तमुलपराजीस्तरणम् । दक्षिणाग्न्यायतनमारभ्यैवोलपराजीस्तरणमिति केचित् । तदसंगतम् । दक्षिणाग्नेर्गार्हपत्यत्वानतिदेशात् । सदने तु पैतृक्या वेदेर्दक्षिणतः । पात्रासादने स्फ्यं षट् कपालानि धानाभर्जनार्थं महत्कपालम् । खर्परमित्यर्थः । पात्र्या सह मन्थार्थं वारणं पात्रं मृण्मयं शरावं वा । मेक्षणेन सहेक्षुशलाकाम् उदकुम्भं शलाकास्तम्बम् । योक्त्रप्राशित्रवर्जं प्रकृतिवदितराणि । न ब्रह्मवरणम् । 'वाचस्पते ०' इत्यादि । अपरेण पैतृकमाहवनीयं दक्षिणातिक्रामति । पवित्रकरणादि । अत्र न प्रणीताः प्रणयतीति केचित् । तत्र मूलं मृग्यम् । पितृयज्ञसूत्राशयस्तु कर्तव्यमेव प्रणीताप्रणयनम् ।

अध्वर्युर्दक्षिणतः शकटमारुह्य प्राचीनावीती यवान् निर्वपति । उत्तरतो वा यज्ञोपवीती । अत्र प्राचीनावीती चेदा सामिधेनीप्रैषात् प्राचीनावीतीत्येव । अत्रापि पात्र्यां वा निर्वाप इति वर्तत एव । 'त्वं देवानां पितृणामसि स(स्नितमं पप्रितमं) वह्नितमं देवपितृहूतमम् । देवस्य त्वा० (हस्ता)-भ्याँ सोमाय पितृमते जुष्टं नि(र्वपामि)'। सोमाय पितृमत आज्यपक्षे एतस्य न निर्वापः । उपाँ-

शुंयाजवत् ध्रौवाच्चतुर्गृहीतेन यागः । 'अग्निँ होतार(मिह तँ) हुवे देवान् पितॄन् यज्ञिया(निह-यान् हवामहे) । आयन्तु देवाः पितरः सुमनस्यमाना वियन्तु देवाः पितरो हविषो मे अस्य । देवस्य त्वा ० (हस्ता)भ्यां पितृभ्यो बर्हिषद्भ्यो जुष्टं (निर्वपामि) । देवस्य त्वा ० पितृभ्योऽग्निष्वात्तेभ्यो जु(ष्टं निर्वपामि)'। 'यमाय मन्थम्' इत्यस्मिन् पक्षे 'यमाय जुष्टं नि(र्वपामि)'। एवं सर्वत्र । 'इदं देवानां पितृणाम् । वैश्वानरं ज्योतिः' इति पैतृकाहवनीयमेव परेक्षते । 'सोम पितृमन् हव्यँ रक्षस्व । पितरो बर्हिषदो हव्यँ रक्षध्वम् । पितरोऽग्निष्वात्ता हव्यँ रक्षध्वम्'। प्रोक्षणे 'देवस्य त्वा० (हस्ता) भ्यां वो जुष्टं प्रोक्षामि सोमाय पितृमते पितृभ्यो बर्हिषद्भ्यः पितृभ्योऽग्निष्वात्तेभ्यः । शुन्धध्वं दैव्याय पित्र्याय कर्मणे देवपितृयज्यायै । अग्नेस्तनूरसि०' इत्येतस्य प्राक् प्रोक्षणीशेषेण यवान् संयुत्यावहन्ति । 'अग्नेस्तनूरसि (वाचो विस)र्जनं देवपितृवीतये त्वा गृह्णामि । अद्रिरसि वानस्पत्यः स इदं देवेभ्यः पितृभ्यो हव्यँ सु(शमि शमिष्व) । देवेभ्यः पितृभ्यः शुन्धध्वम् । देवेभ्यः पितृभ्यः शुम्भध्वम् । देवेभ्यः पितृभ्यः शुध्यध्वम्'। 'त्रिष्फलीकृतेषु विभागमन्त्रेण षट्कपाल-मपच्छिद्य पिनष्टि' (हिश्रौ ११.१९)इति पेषणस्याव्यवधानेन विधानात् । प्रक्षालननिनयनोत्तरमेव विभागः । न तु पूर्वम् । परिभाषायां विभागावसरस्योक्तत्वादत्र पुनर्वचनं किमर्थमिति चेत् । तत्र चरुपुरोडाश्यानामुक्तः न धानानाम् । तदर्थं पुनर्वचनमिति । प्रक्षालनं निनीय । 'यथाभागं व्यावर्त-ध्वम्' इति षट्कपालमपच्छिद्य । 'इदँ सोमाय पितृमते च । इदं पितृभ्यो बर्हिषद्भ्यश्च पितृभ्योऽ-ग्निष्वात्तेभ्यश्च'। ततः कृष्णाजिनादानादि । षट्कपालं पिनष्टि । 'देवस्य त्वा० (हस्ता)भ्यामधि-वपामि धान्यमसि धिनुहि देवान् पितॄन्'।

१८. हविःश्रपणादि

दक्षिणार्धे गार्हपत्यस्याग्नीषोमीयवत् 'मरुताँ शर्धः' इत्येतदन्तैरुपदधाति । उपवेषा-दानादि । 'आ देवपितृयजं वह'। ततः दक्षिणाग्नौ प्रथमेन मन्त्रेणोत्तानं कपालं भर्जनार्थमेकमुप-दधाति । 'निर्दग्धँ (रक्षो)० । भृगूणामङ्गिरसां तपसा तप्यस्व'। मदन्तीरधिश्रयति । पिष्टानि समोप्योत्पूय तण्डुलानुत्पुनाति । षट्कपालमधिश्रित्य । 'घर्माः स्थ विश्वायुषः' भजनार्थकपाले धानार्थं तण्डुलानावपति । पुरोडाशस्य प्रथनादि । सर्वत्र पर्यग्निकरणमुभयत्र क्रमेण तेन तेनाग्निना । 'अविदहन्त श्रपयत' इति प्रैषान्ते । यः कश्चित् परिकर्मी कपाल एव भर्जयित्वा उद्वासनपर्यन्तमुप-दाहो न भवति तथा करोति ।

अपरेण गार्हपत्यमाप्येभ्यो निनीय । ब्रह्माणमामन्त्र्य । 'वसवस्त्वा ०' इत्युत्तरं परिग्राहं पूर्ववत् । 'बृहस्पते परिगृहाण०' इति ब्रह्मयजमानयोः पूर्ववदूहः । 'प्रोक्षणीरासादये(ध्माबर्हि-रुपसादय स्रुवं च स्रुचश्च सं)मृड्ढ्याज्येनोदेहि । घृताचीरेताग्निर्वोह्वयति देवपितृयज्यायै'। प्राशित्रवर्जं संमार्ष्टि । संमार्गप्रहरणान्ते । 'आशासाना ०' इत्यादि 'मम पुत्रा ०' इत्येतन्मन्त्रा-न्तं लुप्यते । 'पूषा ते बिलं ०' इत्यादि करोति । 'महीनां पयोऽस्योषधीनाँ (रसस्तस्य तेऽक्षीयमाणस्य निर्वपा)मि देवपितृयज्यायै'। 'ऊर्जे त्वा' इत्यन्तं कृत्वा । यत्र पत्नी गृहमध्ये उपविष्टा भवति तत्रैवाज्यमवेक्षते । एतस्मिन् काले पत्नीविहारमध्ये न कस्यापि व्यवायः । 'तेजोऽसि' इत्यादि पैतृकाहवनीयेऽधिश्रयणम् । 'अग्नेर्जिह्वासि सुभूर्देवानां पितॄणां धाम्ने धाम्ने देवेभ्यः पितृभ्यो य(जुषे यजुषे भ)व'। आज्यमवेक्ष्याज्यं प्रोक्षणीश्चोत्पूय प्रतिहृत्य गार्हपत्यस्य समीप उत्तरत आज्यानि गृह्णाति । सर्वाणि चतुर्गृहीतानि । प्रकृतिवज्जुह्वां गृह्णाति । 'ब्रह्मणस्त्वा ०' इत्यादिभिश्चतुर्भिरुपभृति । 'सुप्रजास्त्वाय ०' इत्यादिभिर्ध्रुवायाम् । 'भूरस्माकँ हविर्देवानां

पितृणामाशिषो यजमानस्य देवानां पितृणां त्वा देवताभ्यः पितृभ्यो गृह्णामि'। प्रोक्षणीरभिमन्त्र्येत्यादि ग्रन्थिं विस्रस्येत्यन्ते बर्हिष्येव पवित्रे अपिसृज्य वेदिं तृणैरन्तर्धाय शुल्वँ स्तीर्त्वा सर्वं बर्हिःसकृदेवाग्रेषु गृहीत्वा । 'देवपितृबर्हिरूर्णा (म्रदसं त्वा स्तृणामि) स्वासस्थं देवेभ्यः पितृभ्यः' सकृदेव मन्त्रमुक्त्वा । दक्षिणस्रक्तिमारभ्य विधून्वन् स्तृणन् प्रसव्यं त्रिः पर्येति । मुष्टिमात्रं प्रस्तरार्थमवशिनष्टि । यजमानः । 'ऊर्णामृदु प्र(थमानँ स्यो) नं देवेभ्यः पितृभ्यो जुष्टँ स(दनाय बर्हिः)० । चतुःशिखण्डा ०। शिवा च मे ०' । प्रस्तरार्थं तृणमौर्ध्वं धारयन्नधून्वन् प्रदक्षिणमग्निं त्रिः प्रतिपर्येति । प्रस्तरहस्त एव द्वौ परिधी सर्वान् वा परिदधाति। अविकृतमाध्वर्यवं याजमानं च । द्विपरिधिपक्षे मध्यमोत्तरौ। समिधावाधाय । विधृती न स्तः । जुह्वासादनस्थाने तूष्णीं प्रस्तरं न्यस्यति । न याजमानम् । प्रस्तरानुमन्त्रणं कर्तव्यमिति केचित् । नास्मिन्नवसरे स्रुगासादनम् ।

१९. हविरुद्वासनादि

उद्वासनप्रभृतीनि कर्माणि प्रतिपद्यते । 'इदमहम् ०' इति पुरोडाशस्य । 'सूर्यं ज्योतिः ०' इति पुरो(डाशस्य) । 'सूर्यं ज्योतिषो विभात महत इन्द्रियाय'। 'स्योनं ते०' इति पुरोडाशस्य । तूष्णीमभिघारणमुभयोः । मन्त्रेण पुरोडाशमुद्वास्य तूष्णीं निदधाति यवमयत्वात् । 'आर्द्रा भुवनस्य गोपाः शृता उत्स्नान्ति जनित्र्यो मतीनाम्' इति धानाः कपालेन सहोद्वास्य चरुवत् । कपालात् पात्रान्तर उद्वासनमिति केचित् । 'तस्मिन् सीद ०' इति मन्त्रो नास्ति । 'यथाभागं व्यावर्तेथाम्' तस्मिन्नेव पात्रे धाना विभज्याभिमृशति 'इदं पितृभ्यो बर्हिषद्भ्यः । इदं पितृभ्योऽग्निष्वात्तेभ्यः'। अग्निष्वात्तभागं कपालात् पात्राद् वा निष्काश्य पिनष्टि पूर्वावस्थितायामेव दृषदि। 'अँ शवः स्थ ०' इत्यादि 'अव्यवकिरन्ती ०' इत्यन्तं पूर्ववत् करोति । अवधूननप्रभृति पूर्ववत् करोतीति केचित् । सक्तून् कृत्वा । अभिवान्यवत्साया अर्धशरावं दुग्धं वारणे पात्रे शरावे वानीय कृष्णाजिनात् तस्मिन् तूष्णीं सक्तूनोप्य एकयेक्षुशलाकयानारभ्योपमन्थति । शलाकाया स्तम्बं मूलप्रदेशं मन्थं मन्थाकारं करोतीत्यर्थः । तया शलाकया रज्वा व्यवधानंकृत्य त्रिः प्रसव्यं दक्षिणाभिमुखो मन्थति । दुग्धेन सक्तून् मिश्रयति । तन्मिश्रितं मन्थाख्यं हविर्भवति । ततः दक्षिणाग्नेः सधूममेकोल्मुकमादाय प्रत्यगानीयापरेण गार्हपत्यम् उत्तरेण प्राक्तं विहारम् अग्रेणोभावाहवनीयौ हृत्वा पैतृकाहवनीयस्य दक्षिणतोऽन्तर्वेदि निदधाति। यथागतमागत्य कपालान्यभिघार्योद्वास्य । पात्रान्तरे धानोद्वासनपक्षे तदपि कपालमभिघार्योद्वासयति । कपालेन सहोद्वासनपक्षे न कपालाभिघारणम्। पुरोडाशमलंकृत्य । 'देवो वः सविता मध्वानक्तु' धाना अलंकरोति। यथा सर्वा धाना स्निग्धा भवन्ति तथा। 'देवस्त्वा ०' इति मन्थम् । एकैकश आज्यानि हवीँषि सादयति । जुहूं गृहीत्वाग्रेणाहवनीयं गत्वा पैतृक्यां वेद्यामपरेणाग्निं प्रस्तरे मन्त्रेण सादयति । यथागतमागत्योपभृतं गृहीत्वोत्तरतो जुह्वाः सादयति । एवमेव ध्रुवाँ स्रुवमाज्यस्थालीं च । ध्रुवानुमन्त्रणे याजमान ऊहः 'ध्रुवासि धर(णी)० स्युप देवान् पितॄन् वैश्वदेवेन (शर्मणा दैव्येन)। एता असदन्० । विष्णूनि स्थ०' । तत आज्यवदेकैकँ हविरासादयति 'प्रियेण०' इति मन्त्रावृत्त्या । 'प्रजापतिरसि ०' इत्येतस्यावृत्तिः । 'अयं यज्ञः०' । विहव्यम् । चतुर्होता । सकृदविकारेण । दक्षिणतो हविषां विपरिहरणार्थं स्थलमवशिष्य तद्दक्षिणतोऽन्तर्वेद्येवाञ्जनमभ्यञ्जनं कशिपूपबर्हणमुदकुम्भं च प्रतिष्ठापयति । 'अयं वेद ०' इत्यादि । निर्वापप्रभृत्येतत्पर्यन्तं प्राचीनावीतयज्ञोपवीतयोर्विकल्पोऽध्वर्योः । आवाहितासु देवतासु सर्वेषां यज्ञोपवीतम् । अत्र सर्वेषां यज्ञोपवीतम् ।

२०. प्रधानयागः

'अग्नये देवेभ्यः पितृभ्यः समिध्यमानायानुब्रूहि'। अनूयाजसमिधमवशिष्य प्रणवे प्रणवे पञ्च पञ्च समिध आदधाति। 'समिद्धो अग्निराहुतः स्वा (हाकृतः पिपर्तु नः। स्व) गादेवेभ्यः पितृभ्य इदं (नमः।) उच्छुष्मो०। अग्ने देवपित्रिध्दम (न्विद्ध) ०'। आवाहितासु देवतासु वेदेनाहवनीयमित्यादि। 'आ प्यायतां ध्रु (वा घृतेन यज्ञं यज्ञं) प्रति देवपितृयद्भ्यः०'। परिधिद्वित्वपक्षे 'अग्नीत् परिधी चाग्निं च०' इति प्रैषः। त्रित्वपक्षे यथाप्रकृति। संमार्गादि प्रवरपर्यन्तं प्रकृतिवत्। प्रवरे प्रत्याश्रावणान्ते 'सीद होतः'। एतावान् प्रवरः। 'अग्निर्देवः०' इत्येतस्य लोपः। न 'देवाः पितरः०'। 'मां देवेष्वा (श्रावय) ०' वर्तते। जुहूपभृतावादायेत्यादि बर्हिर्वर्जं चतुरः प्रयाजान् यजति। नोपभृतँ समानयते। आज्यभागाभ्यां प्रचर्य।

विस्रस्य यज्ञोपवीतानि प्राचीनावीतानि कुर्वते। आज्यानि हवींँषि च विपरिहरन्ति। विपरिक्रामन्त्यृत्विजः। जुह्वाः पृष्ठतो नीत्वोपभृतं दक्षिणतः सादयति। ध्रुवां तयोः पृष्ठतो नीत्वा तयोर्दक्षिणतः सादयति। जुहूर्यथास्थितैव। धानाः पुरोडाशस्य पश्चान्नीत्वा दक्षिणतः सादयति। मन्थं तयोः पश्चान्नीत्वा तयोर्दक्षिणतः सादयति। षट्कपालो यथास्थित एव। होताध्वर्युराग्नीध्रश्चापरेणाहवनीयं गत्वा दक्षिणतस्तिष्ठन्ति। ब्रह्मयजमानावग्रेणाग्निमागत्योत्तरत उपविशतः। यथास्थितावेव ब्रह्मयजमानाविति वा। सर्वे दक्षिणोत्तरभावेन स्वे स्वे स्थाने उपविशन्ति। सर्वेऽप्याहवनीयाभिमुखा एव।

जुह्वामुपस्तीर्य। 'आ प्यायतां (ध्रुवा) ० प्रति देवपितृयद्भ्यः०। सोमाय पितृमतेऽनु स्वाधा। मा भेर्मा सं (विक्था) ०'। सकृत् पुरोडाशस्यावदाय तूष्णीमभिमृश्य धानानां सकृदुपसंगृह्णीतेऽथ मन्थस्य च। द्विरभिघारयति त्रिः पञ्चावत्तिनः। 'यदवदानानि ते०'। धानानां मन्थस्य च तूष्णीं प्रत्यभिघारणम्। एवमुत्तरत्र उपसंग्रहणहविषोरभिमर्शनं प्रत्यभिघारणं च तूष्णीम्। 'परिधीँ रपोर्णु०' इत्युच्यमाने दक्षिणं परिधिं मध्यमपरिधौ स्थापयति। उत्तरसत्वे तमपि। अपरेणाग्निमुदङङत्याक्रम्य दक्षिणामुखः 'आ स्वाधा' आश्रावयति। 'अस्तु स्वाधा' आग्नीध्रो दक्षिणतः उदङमुखस्तिष्ठन् प्रत्याश्रावयति। 'सोमं पितृमन्तँ स्वाधा'। वषट्कृते स्रुग्दक्षिणपार्श्वेन जुहोति। सोमाय पितृमत इदं (न मम)। 'सोमस्य पितृमतोऽहं (देवपितृयज्यया) वृत्रहा (भूयासम्)'। दक्षिणातिक्रम्य जुह्वामुपस्तीर्य। 'पितृभ्यो बर्हिषद्भ्योऽ नु स्वाधा। मा भैष्ट मा संविजिध्वं मा वो हिँसिषं मा वस्तेजोऽपक्रमीत्। भरतमुद्धरते मनुषिञ्चतावदानानि वः प्रत्यवदास्यामि नमो वो अस्तु मा मा हिँसिष्ट' इति धाना अभिमृश्य सकृद्धानानामवदाय पुरोडाशादुपसंगृह्णीतेऽथ मन्थस्य। द्विरभिघार्य। 'यदवदानानि वोऽ व (द्यन् वि लोमाकारिषमात्मनः। आज्येन प्रत्यनज्मे) नत्तद्व आप्याय (तां पुनः)' धानाः प्रत्यभिघार्य तूष्णीं पुरोडाशं मन्थं च। उदङङत्याक्रम्य पूर्ववदाश्राव्य प्रत्याश्राविते। 'पितृन् बर्हिषदः स्वाधा'। पितृभ्यो बर्हिषद्भ्य इदं (न मम)। 'पितृणां बर्हिषदामहं देव (पितृ) यज्ज्यया वृत्रहा भूयासम्'। अत्याक्रम्य जुह्वामुपस्तीर्य। 'पितृभ्योऽग्निष्वात्तेभ्योऽनु स्वाधा। मा भेर्मा सं (विक्था) ०'। सकृन्मन्थादवदाय पुरोडाशादुपसंगृह्णीतेऽथ धानानाम्। 'यदवदानानि ते०'। तूष्णीं पुरोडाशस्य धानानाम्। उदङङत्याक्रम्य पूर्ववदाश्राव्य (प्रत्याश्राविते)। 'पितृनग्निष्वात्तान् स्वाधा'। वषट्कृते जुहोति। पितृभ्योऽग्निष्वात्तेभ्य इदं (न मम)। 'पितृणामग्निष्वात्तानामहं (देवपितृयज्यया) वृत्रहा (भूयासम्)'। यमपक्षे 'यमायानु स्वाधा। यमँ स्वाधा' इति प्रैषौ। यमायेदं (न मम)। 'यमस्याहं (देवपितृयज्यया) न्नादो (भूयासम्)' इति विशेषः।

दक्षिणातिक्रम्य जुह्वामुपस्तीर्य । 'अग्नये कव्यवाहनाय स्विष्टकृतेऽनु स्वाधा' । पुरोडाशस्योत्तरार्धादवदाय धानानामुपसंगृह्णीतेऽथ मन्थस्य । धानानामुत्तरार्धादवदाय पुरोडाशादुपसंगृह्णीतेऽथ मन्थस्य । मन्थस्योत्तरार्धादवदाय पुरोडाशादुपसंगृह्णीतेऽथ धानानाम् । अनेन प्रकारेण स्विष्टकृदवदानं संपन्नं भवति । 'धानानामुपसंगृह्णीतेऽथ मन्थस्य' (हिश्रौ १३.३५) इति संग्रहणवचनात् । अथवा यथाशृतं त्रिभ्यः सकृत् सकृदवदाय यजतीति । द्विरभिघार्य नान्ते ध्रुवाप्यायनम् । अत्र ध्रौवसमाप्तिः । न प्रत्यभिघारणम् । उदङङत्याक्रम्याश्राव्य प्रत्याश्राविते । 'अग्निं कव्यवाहनँ स्विष्टकृतँ स्वाधा' । अग्नये कव्यवाहनाय स्विष्टकृत इदं (न मम) । 'अग्नेः कव्यवाहनस्य स्विष्टकृतोऽहं देवपितृयज्यया (युष्मान् यज्ञेन प्रतिष्ठां गमेयम्)'। अत्याक्रम्य । 'वैश्वानरे०'। न प्राशित्रमवद्यति । इडापात्रमुपस्तीर्य मन्त्रेण सर्वेषां दक्षिणार्धादिडामवद्यति । उपसंग्रहणं स्विष्टकृद्वत् । न द्वितीयावदानम् । न यजमानभागम् । द्विरभिघार्य । पर्वाञ्जनादि । याजमान उहः 'सुरूपवर्ष० यो देवपितृयाणः पन्थास्तेन यज्ञो देवान् पितॄँ अप्येतु० देवीर्देवैः पितृभिरभिमा० इडाया अहं देवपितृयज्यया०'। उपहूतायामिडायाम् इडागतं मन्थमवघ्राणार्थं परिशिष्य ।

२१. पिण्डदानम्

अवशिष्टायामिडायां पात्रगतान् हविःशेषान् संमेलयित्वा निष्पीड्य त्रीन् पिण्डान् कृत्वा तिसृषु स्रक्तिषु त्रीन् पिण्डान् निदधात्यध्वर्युः । 'एतत्ते तत ये च त्वा मनु' (तैसं ३.२.५) पूर्वाध्र्यायाँ स्रक्तौ । 'एतत्ते पितामह ये च त्वामनु' (तैसं ३.२.५) दक्षिणाध्र्यायाँ स्रक्तौ । 'एतत्ते प्रपितामह ये च त्वामनु' (तैसं ३.२.५) पश्चाध्र्यायाँ स्रक्तौ । यजमानः स्वपितुद्देशेन त्यागं कुर्यात् । ध्यानमात्रं न नामग्रहणम् । यजमान एव पिण्डदानं कुर्यादिति केचित् । उत्तरस्याँ स्रक्तौ हस्तसंलग्नं लेपं निमार्ष्टि । 'अत्र पितरो यथाभागं मन्दध्वम्' (तैसं ३.२.५) अध्वर्युरेव वदति । ततः सर्वे उत्तरस्रक्तिद्वारेण विहाराद् बहिर्निष्क्रामन्ति । तत अग्रेण प्राकृताहवनीयमुत्तरत आगत्य सहैवाहवनीयसमीपं गच्छन्ति । 'सुसंदृशं त्वा वयं० वशाँ अनु । योजान्विन्द्र ते हरी' इति प्राकृताहवनीयमुपतिष्ठन्ते । आतमितोरोकारं प्लावयंस्तिष्ठन्ति । 'अक्षन्नमीमदन्त ० मती । योजा(न्विन्द्र ते) हरी' इति गार्हपत्यम् । 'अक्षन् पितरो(ऽमीमदन्त) पितरः' इति यथेतं प्रतिपद्यन्ते । स्वे स्वे स्थाने गच्छन्तीत्यर्थः । ततोऽवशिष्टं मन्थं होत्रध्वर्युब्रह्माग्नीध्रयजमानाः क्रमेणावजिघ्रति मन्त्रेण । ततोऽध्वर्युरुदकुम्भमादाय । 'अया विष्ठा० मैरयत' सकृन्मन्त्रमुक्त्वा त्रिः प्रदक्षिणं पैतृकीं वेदिं परिषिञ्चन् पर्येति । निधाय कुम्भं पुनरादाय यथेतं प्रतिपर्येति प्रसव्यमित्यर्थः । तत्र आञ्जनादि ददाति । 'आङक्ष्व तत । आङक्ष्व पितामह । आङक्ष्व प्रपितामह' प्रतिपिण्डं त्रिस्त्रिराञ्जनम् । 'अभ्यङक्ष्व तत' इत्यादि त्रिरभ्यञ्जनम् । 'एतानि वः पितरो वासाँस्यतो नोऽन्यत् पितरो मायूढ्वम्' मन्त्रावृत्त्या प्रतिपिण्डं दशां छित्त्वा ददाति । सर्वत्र यजमानस्य पितृपितामहप्रपितामहानामुद्देशः । 'नमो वः पितरो रसाय पितरो नमो वो य एतस्मिन् लोके स्थ युष्माँस्तेऽनु येऽस्मिन् लोके मां तेऽनु य एतस्मिन् लोके स्थ यूयं तेषां वसिष्ठा भूयास्त येऽस्मिन् लोकेऽहं तेषां वसिष्ठो भूयासम् । नमो वः पितरः शुष्माय पितरो नमो वो य० । नमो वः पितरो जीवाय पितरो नमो ० । नमो वः पितरः स्वधायै पितरो न (मो)० । नमो वः पितरो मन्यवे पितरो न(मो)० । नमो वः पितरो घोराय पितरो नमो०'। एतैः षड्भिर्मन्त्रैरुपतिष्ठते । यथापाठं वा । 'उत्तिष्ठत पितरः प्रेत पूर्वे यमस्य पन्थामनुयाता पुराणम् । धत्तादस्मासु द्रविणं यच्च भद्रं प्र णो

ब्रूताद्भागधां देवतासु' इति पितृनुत्थापयति । 'परेत पितरः० मदन्ति' इति प्रवाहयति । 'यन्तु पितरो मनसा जवेन' इति पितॄन् सँसाधयति । 'मनोऽन्वाहुवा (महे)० । (आ न एतु०) ज्योक् च सूर्यं दृशे । पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातँ सचेमहि' इति तिसृभिरुपतिष्ठते । 'अक्षन्नमी (मदन्त)० हरी । प्रजापते न० रयीणाम्' इति गार्हपत्यं प्रत्येत्य । 'यदन्तरिक्षं० (मामने)नसम्' इति पङ्क्त्या गार्हपत्यमुपतिष्ठन्ते । एतदन्तं यदध्वर्युसूत्रोक्तमपि यजमान एव करोतीति केचित् ।

२२. अनूयाजादि

व्यवच्छिन्दन्ति परिश्रयणानि । निष्काशयन्तीत्यर्थः । परिधीन् परिधी वा यथास्थानं स्थापयति सर्वे विस्रस्य प्राचीनावीतानि यज्ञोपवीतानि कुर्वते । आज्यानि विपरिहरन्ति । पात्राणीत्यर्थः । यथाहुतानि क्रमेण तेनैव मार्गेणानीय यथास्थानं सादयन्ति । विपरिक्रामन्त्यृत्विजः । येन मार्गेण गतास्तेनैव मार्गेण गमनक्रमेण प्रत्यायन्ति । ततोऽन्वाहार्यमासाद्य प्रतिगृह्य । अनूयाजार्थे उल्मुके अपिसृज्य । 'ब्रह्मन् प्रस्थास्यामः समिधमाधायाग्नीत् परिधी चाग्निं च सकृ(त्सकृत्संमृड्ढि)'। सर्वपक्षे यथाप्रकृति । यदुपभृति तज्जुह्वामानीयापरेणाग्निं दक्षिणातिक्रम्यापवर्हिषावनूयाजौ यजति । आश्राव्य प्रत्याश्राविते । 'दैवौ यज यज' । देवाय नराशँसायेदं (न मम) । 'नराशँसस्याहं (देवयज्यया) पशुमान् (भूयासम्)' । आश्राव्य (प्रत्याश्राविते) । 'यज' । देवायाग्नये स्विष्टकृत इदं (न मम) । 'अग्नेः स्विष्टकृतोऽहं (देवयज्यया)युष्मान् (यज्ञेन प्रतिष्ठां गमेयम्)' । अत्याक्रम्य । वाजवतीव्यूहनादि । परिधिद्वित्वे 'यज्ञस्य पाथ उपसमिहि । यजमानं प्रथतम्' । सँस्रावँ हुत्वा । न प्रत्यग्गमनम् । न स्रुग्विमोकः । न पत्नीसंयाजाः । न संपत्नीयहोमः । नाज्येडा । फलीकरणहोमार्थम् अग्रेण प्राकृताहवनीयमुत्तरत आगत्य गार्हपत्यदक्षिणाग्निमध्यतो गत्वा इध्मप्रव्रश्चनान्याधाय फलीकरणं पिष्टलेपं च जुहोति । यथागतमागत्य पैतृकाहवनीये सारस्वतहोमादि करोति । न पार्वणः । नारिष्ठादि करोति । न समिष्टयजुर्जुहोति । बर्हिःप्रहरणं कर्तव्यम् । ब्राह्मणतर्पणान्ता सिद्धमिष्टिः संतिष्ठते । इति पितृयज्ञः ।

२३. त्र्यम्बका

अथ त्र्यम्बका । प्राकृते विहारे तन्त्रप्रयोगः । आहवनीयं प्रणीय । नान्वाधानम् । न बर्हिः । परिभोजनीं वेदं कृत्वा परिस्तीर्योत्तरेण गार्हपत्यं पात्राणि प्रयुनक्ति । स्फ्यं पुरोडाशसंख्यया कपालानि । अग्निहोत्रहवणीँ शूर्पं कृष्णाजिनँ शम्यामुलूखलं मुसलं दृषदमुपलां स्रुवं पलाशपर्णम् आज्यस्थालीं कुटरूं पात्रीं मेक्षणं वेदमुपवेषं मूतं तृणमयम् । तूष्णीं ब्रह्मोपवेशनम् । सर्वं तूष्णीमेव पवित्रकरणपात्राभिमर्शनाग्निहोत्रहवण्यादानादि । निर्वपणकाले पुरोडाशसंख्यया अन्वावापसहितांश्चतुरश्चतुरो मुष्टीन् निर्वपति । उपधानकाले गार्हपत्यस्य दक्षिणार्धे पुरोडाशसंख्यया प्रतिपुरोडाशमेकैकं कपालमुपदधाति । अङ्गारानधिवर्तयति । मदन्तीरधिश्रित्य समोप्य न प्रणीतानयनम् । पिण्डकरणान्ते करम्भपात्रसंख्यया पुरोडाशान् करोति । 'अयं यजमानस्य । अयं पत्न्याः' इत्यादिक्रमेण चिह्नानि कृत्वा । वेदेनाङ्गारापोहनादि करोति । भस्माध्यूहनान्तं कृत्वा स्रुवं पर्णं च संमृज्य दर्विहोमधर्मेणाज्यँ सँस्कृत्य । अङ्गारापोहनादि । अभिघार्यानभिघार्य वा । मूते मूतयोर्मूतेषु वा सर्वान् पुरोडाशानुद्वास्य कपालान्यभ्यज्योद्वासयति ।

ततः दक्षिणाग्नेरेकोल्मुकं सधूमं गृहीत्वा प्रत्यगानीयापरेण गार्हपत्यमग्रतो हरन्ति । ततः 'यावन्तो गृह्याः स्मस्तेभ्यः कमकरं पशूनाँ शर्मासि शर्म यजमानस्य शर्म मे यच्छैक एव रुद्रो न द्वितीयाय तस्थे' (तैसं १.८.६) यजमानपत्न्यमात्यर्त्विजो गार्हपत्यमुपतिष्ठन्ते । मूतस्थपुरोडाशान् मूतसहितानाज्यस्थालीं पर्णँ स्रुवं दर्भमुष्टिं समिधमुदकुम्भमेकोल्मुकमिन्धनानीत्येतत् समादाय । उत्तरपूर्वमवान्तरदेशं गच्छन्ति । 'आखुस्ते रुद्र पशुस्तं जुषस्व स्वाहा' (तैसं १.८.६) व्रजन्नेवातिरिक्तं पुरोडाशम् आखुबिले न्यस्यति । ततश्चतुष्पथं गच्छन्ति ।

२४. प्रधानकर्म

चतुष्पथमुपलिप्य तत्रैकोल्मुकमुपसमाधाय परिस्तीर्य परिषिच्य पलाशपर्ण उपस्तीर्य सर्वेभ्यः पुरोडाशेभ्यः सकृत्सकृदवदायाभिघार्य । द्विरवदानमपि केचिदिच्छन्ति । 'एष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहा' (तैसं १.८.६) । रुद्रायेदं (न मम) । 'भेषजं गवेऽश्वाय पुरुषाय भेषजमथो अस्मभ्यं भेषजँ सुभेषजं यथासति । सुगं मेषाय मेष्या अवाम्ब रुद्र मदिमह्यव देवं त्र्यम्बकम् । यथा नः श्रेयसः (करद्यथा नो वस्यसः करद्यथा नः पशुमतः करद्यथा नो व्यव)साययात्' (तैसं १.८.६) सर्वे तमग्निमुपतिष्ठन्ते । सर्वेऽमात्यास्त्र्यम्बकान् पुरोडाशान् व्यूह्य एकैकं गृह्णन्ति । अत्रामात्या इति पुंस्त्वमविवक्षितम् । एकैकं पुरोडाशमादाय । 'त्र्यम्बकं (यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय) मामृतात्' (तैसं १.८.६) इति सर्वे चतुष्पथं प्रदक्षिणं परियन्ति । ततस्तानूर्ध्वानुदस्य 'भगवः स्थ भगस्य वो लिप्सीय' इति स्वकीयं स्वकीयं पुरोडाशम् अन्तरिक्षादेव प्रतिगृह्य । यजमानाञ्जलौ समावपन्ति । एवं त्रिः कुर्वन्ति । यदि यजमानस्य दुहिता अविवाहिता चेत् सा विपरीतं मन्त्रं ब्रूयात् । 'त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मा पतेः' (द्र. वासं ३.६०) । तदा तृतीयपरिक्रमणे सर्वान् पुरोडाशान् दुहित्रे समावपन्ति । इति विशेषः । नोचेन्न । सर्वत्र यजमानायैव । तान् सर्वान् पुरोडाशानेकीकृत्य तस्मिन्नेव मूते उपनह्य क्रोशद्वयात् परतो गत्वा वृक्ष आसजति । परोगव्यूतिं वा बध्नाति । 'एष ते रुद्र (भागस्तं जुषस्व तेनावसेन परो मूजवतोऽतीह्यवततधन्वा पिनाकहस्तः) कृत्तिवासोम्' (तैसं १.८.६) इति सर्वे मन्त्रमुक्त्वा श्वासमवरुध्य तिष्ठन्ति । एवं त्रिवारं मन्त्रमुक्त्वा श्वासमवरुन्धन्ति । ततः मूतस्यात्मनश्च मध्ये अपः परिषिच्य पृष्ठतोऽनवेक्षमाणा आगच्छन्ति ।

परोगोष्ठे मार्जयन्ते । ततस्तिस्रस्तिस्रः समिधो गृह्णन्ति तूष्णीम् । आगत्य हस्तपादान् प्रक्षाल्याहवनीये समिधोऽभ्यादधति 'एधोऽस्येधिषीमहि स्वाहा । समिदसि स्वाहा । तेजोऽसि तेजो मयि धेहि स्वाहा । अपो अन्वचारिषं० वर्चसा' (तैसं १.४.४५) सर्वे आहवनीयमुपतिष्ठन्ते । एवं पत्नी गार्हपत्येऽभ्याधायोपतिष्ठते । पत्न्या अपि समिदाधानस्योक्तत्वादवभृथवत् सर्वेषां समिदाधानम् । इति त्र्यम्बकाचर्या ।

२५. आदित्येष्टिः

अथादित्येष्टिः । दर्भेष्वासीनो० 'आदित्येष्ट्या यक्ष्ये' । विहरणम् । 'ममाग्ने० अद्य अज्ञाय० इमामूर्जं' यथातिथि । 'ऐष्टँ हविः । साकमेधीयँ (हविः)' वा । पौर्णमासं तन्त्रम् । बर्हिषा व्रतम् । 'ततस्त्वां त्रयोविँशतिधा०' । स्फ्यँ स्थालीम् । शम्यादृषदुपलाकुटर्वन्वाहार्यस्थालीवर्जम् । आज्यं प्रणयति । 'कस्त्वा गृह्णाति स त्वा गृह्णातु

कस्मै त्वा गृह्णामि तस्मै त्वा गृह्णामि पोषाय त्वा । अनया त्वा गृह्णामि । देवस्त्वा सवितोत्पुनातु । आज्यं देवाग्रेष्वग्रेग्वग्र इमं यज्ञं नयाग्रे यज्ञपतिं धेहि त्वामिन्द्रोऽवृणीत वृत्रतूर्ये त्वमिन्द्रमवृणीथा वृत्रतूर्ये प्रोक्षितमसि । बह्मन्नाज्यं प्रणेष्यामि (यजमान वाचं यच्छ)'। 'को व०' इत्येतस्य स्थाने 'देवा गातुविदो गातुं यज्ञाय विन्दत । मनसस्पतिना देवेन वाताद्यज्ञः प्रयुज्यताम्'। 'ब्रह्मपूतमसि कस्त्वा युनक्ति स त्वा युनक्तु (विश्वेभ्यः कामेभ्यो देवयज्यायै)'। निर्वापे 'देवस्य त्वा० (हस्ता)भ्यामदित्यै जुष्टं निर्वपामि । अदिते ह(व्यँ रक्ष) स्व। देवस्य (त्वा० हस्ता)भ्यामदित्यै वो जुष्टं प्रोक्षामि'। घृते चरुश्रपणम् । मन्त्रेणाभिघारणम्। '(प्रियेण नाम्ना०) आसीदतु' इत्यासादनम् । 'यज्ञोऽसि० । अयं यज्ञः ०' । विहव्यम् । चतुर्होता । 'अदित्या अनुब्रूहि । अदितिं यज' । अदित्या इदं (न मम) । 'अदित्या अहं देव(यज्यया) प्रजनिषीय प्रजया च पशुभिश्च' । इडाभागं ब्रह्मणे परिहृत्य सर्वे प्राश्नन्ति । चतुर्धाकरणेषु 'इदं ब्रह्मणः' इत्येव सर्वान् भागान् ब्रह्मणे परिहरति । अश्वः श्वेतो दक्षिणा । गौर्वा । 'अयमश्वोऽमृतस्य पूर्ण०' । अन्यदविकृतम् । '(देवस्य त्वा०) वरुणायाश्वम्०' इति प्रतिग्रहः । न पार्वणः । सिद्धमिष्टिः संतिष्ठते ।

श्वोभूते पौर्णमासेनेष्ट्वा तदानीं वा उदवसायानुदवसाय वा । 'प्रसूता०' इत्यादि । 'यो अस्याः पृथिव्यास्त्वचि निवर्तयत्योषधीः । अग्निरीशान ओजसा वरुणो धीतिभिः सह । इन्द्रो मरुद्भिः सखिभिः सह । अग्निस्तिग्मेन शोचिषा०' इति निवर्तनं वापनं यथा पुरस्तात् । संतिष्ठते साकमेधः । समाप्तं साकमेधपर्व ।

शुनासीरीयपर्व

१. शुनासीरीयारम्भः

अथ शुनासीरीया । उदवसानं वैकल्पिकम् । प्राचीनप्रवणे वैश्वदेववद्विहारः । 'शुनासीरीयेण यक्ष्ये' । वैश्वदेववत् प्रणयनं पूर्णाहुत्यन्तम् । अन्वादधाति । पयःपक्षे आमावास्यं तन्त्रं द्व्यहकालता । यवागूपक्षे पौर्णमासं तन्त्रँ सद्यस्कालता। पयःपक्षे प्रयोगः । 'ममाग्ने० श्वो यज्ञाय० इमामूर्जं' यथातिथि । 'शुनासीरीयँ हविः०' । शाखाहरणम् । न वत्सापाकरणम् । वेदं कृत्वा वेदिः । नोत्करः । उत्करबर्हिर्वर्जं वैश्वदेववदिध्माबर्हिः । अन्तर्वेदि शाखाया इत्यादि । 'उपवेषोऽसि० वायवे हविः कृण्वन्तः (शिवः शग्मो भवासि नः)'। सायँ हुतेऽग्निहोत्रे । 'इमौ पर्णं च दर्भं च०' । प्रातर्दोहाय वत्सानपाकरोति । न सायंदोहः । परिस्तरणम् । 'उभावग्नी०' ।

२. हविर्निर्वापः

प्रातरग्निहोत्रँ हुत्वा प्रागुदयात् तन्त्रप्रक्रमः । पञ्चत्वारिंशत् कपालानि चतस्रः स्थालीः। आमिक्षावाजिनयोरुद्धरणपात्रचमसवर्जं वैश्वदेववत् । पञ्च संचराणि निरुप्य ऐन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुमिन्द्राय शुनासीराय पुरोडाशं द्वादशकपालं वायव्यं पयः सौर्यमेककपालम् । 'इन्द्राग्निभ्यां जुष्टं (निर्वपामि) । विश्वेभ्यो देवेभ्यो जु(ष्टं निर्वपामि) । इन्द्राय शुनासीराय जु(ष्टं निर्वपामि) । सूर्याय जु(ष्टं निर्वपामि) । विश्वेदेवा ह(व्यँ रक्ष)ध्वम् ।

इन्द्र शुनासीर ह(व्यँ रक्ष)स्व । सूर्य ह(व्यँ रक्ष)स्व । देवस्य (त्वा० हस्ता) भ्यामग्नये सवित्रे सरस्वत्यै पूष्णे सूर्याय वो जुष्टं प्रोक्षामि सोमायेन्द्राग्निभ्यां विश्वेभ्यो देवेभ्य इन्द्राय शुनासीराय'। कपालोपधाने पौष्णान्तान्युपधाय ऐन्द्राग्नस्य द्वादश कपालानि । वैश्वदेवाय चरुस्थालीम् । इन्द्राय शुनासीराय द्वादश कपालान्यैन्द्राग्नवदुपधाय । 'निरूढम्०' इत्यादि प्रातर्दोहं दोहयति । 'कामधुक्षः प्र (णो ब्रू)हि वायवे हविरिन्द्रियम् । बहु दुग्धि वायवे देवेभ्यो हव्य(माप्यायतां) ०। संपृच्यध्वम्०' इत्यन्तं कृत्वा एककपालमुपदधाति । संवपनादि प्रतिपद्यते । नामिक्षाकरणम् । पृषदाज्यवन्त्याज्यानि गृह्णाति पशुवत् । उद्वासनादि । पात्र्यां चतुर्धोपस्तरणम् । भिन्न-पात्र एककपालार्थम् । 'यस्त आत्मा०' इति पयोऽभिघार्य । 'आ प्यायतां घृतयोनि(रग्निर्ह-व्यानुमन्यताम्० तेज)सा सूर्याय जुष्टम(भिघारयामि) । दृँह०' इति पय उद्वासयति । व्या-हृतिभिरासादनम् । 'यस्त आत्मा०' इति पय आसाद्यमानमनुमन्त्रयते । 'यज्ञाः स्थ सर्वतः श्रिताः स(र्वतो मां भूतं भविष्य)च्छ्रयन्ताँ (शतं)०' आग्नेयविकाराणाम् । 'प्रजापती स्थः सर्वतः श्रितौ स(र्वतो) ०च्छ्रयेताँ (शतं)०' सौम्यवैश्वदेवयोः । 'यो नः कनीय इह ० अपतमि-न्द्राग्नीन्द्रशुनासीरौ भुवनान्नुदन्ताम(हं प्रजां वीरवतीं विदेय) । अयं यज्ञः०'। विहव्यम् । चतुर्होता । पञ्चहोता ।

३. प्रधानयगः

निर्मन्थ्यः। नव प्रयाजाः। ऐन्द्राग्नान्तं पूर्ववत् प्रचारः । 'विश्वेभ्यो देवेभ्योऽनुब्रूहि । विश्वान् देवान् यज'। विश्वेभ्यो देवेभ्य इदं (न मम)। 'विश्वेषां देवानामहं देवयज्यया प्राणैः सायुज्यं गमेयम्'। 'इन्द्राय शुनासीरायानुब्रूहि । इन्द्रँ शुनासीरं यज' । इन्द्राय शुना-सीरायेदं (न मम) । 'इन्द्रस्य शुनासीरस्याहं (देवयज्य)येन्द्रियाव्यन्नादो (भूयासम्)'। उपस्तीर्य स्रुवेण द्विः पयसोऽवदायाभिघार्य । 'वायवेऽनुब्रूहि । वायुं यज' । वायव इदं (न मम) । 'वायोरहं देवयज्ययेन्द्रियावी (भूयासम्) । (वायोरहं०) जेमानं (महिमानं गमेयम्)'वा सोमयाजिनः । एककपालेन चरति । 'सूर्याय' उपाँशु 'अनुब्रूहि' इत्युच्चैः । 'सूर्यम्' उपाँशु 'यज' इत्युच्चैः । सूर्यायेदं (न मम) । 'सूर्यस्याहं देव(यज्यया)न्नादो (भूयासम्)'। ध्रौवात् सकृद्गृहीतेनैककपालमभिजुहोति । 'सँ सर्पोऽस्यँहस्पत्याय त्वा स्वाहा'। सँसर्पायाँहस्पत्यायेदं (न मम) ।

द्वादशगवं षड्गवं वा सीरं दक्षिणा । उष्टारौ उष्टारो वा । उष्टारो वोढा महान् बली-वर्दः । अश्वं श्वेतं सौर्ये । गा वा श्वेता । तदभावे अजो वा मेषो वा देयः । 'इमावश्व-सीरावमृतस्य पूर्णौ सहस्रधारावुत्सावक्षीयमाणौ । तौ दध्रतुः पृथिवी(मन्तरिक्षं) दिवं च ताभ्या-मश्वसीराभ्यामतितराणि मृत्युम् । ब्रह्मणी ब्रह्मणी स्थो ब्रह्मणे वाँ हुताद्यौ मा मा हिँसिष्टमहुतौ मह्यँ शिवौ भवताम् । ब्राह्मणा इमावश्वसीरावहिँसन्तो यथा(भागं प्रतिगृह्णीध्वम्) । देवस्य त्वा ० दक्षिण उत्तानायाङ्गीरसायानो वरुणायाश्वं ताभ्याममृतत्वमश्याम्०' । नवानू-याजान् यजति । वाजिनपार्वणवर्जं वैश्वदेववत् । सिद्धमिष्टिः संतिष्ठते । ततः पौर्णमासीयागो-त्तरं तदानीमेव वा उदवसायानुदवसाय वा । 'प्रसूता०' इत्यादि 'एकं मासमुदसृजत्० जीवसे। अग्निस्तिग्मेन शोचिषा०' इति निवर्तनं वापनं यथापुरस्तात् । समाप्तं शुनासीरीयपर्व ।

अन्तरालव्रतानि

यथाप्रयोगपक्षे प्रतिपर्वणि निवर्तनमात्रं वपनं त्वन्त एव इति भारद्वाजः (द्र. भाश्रौपरि १०६)। सर्वपक्षसाधारण्येनाद्योत्तमयोर्वपनमुक्तमाश्वलायनेन (२.१६.२७)। वैश्वदेवादिपर्वसु आन्तरालिकव्रतान्युच्यन्ते। नानृतं वदति। विहितेडामांसप्राशनादिव्यतिरिक्तं न मांसमश्नाति। ऋतुव्यतिरिक्ते काले न स्त्रियमुपैति। मञ्चकाद्युपरि नास्ते। जुगुप्सेतानृतात्। प्राक्शिराः शेते। मधुमाषाद्यमेध्यं नाश्नाति। ऋतुविहितव्यतिरक्तं नाङक्ते नाभ्यङक्ते। एतानि व्रतान्याचरेत्। प्रमादादिना एतेषु व्रतेषु लोपो जातश्चेत् व्रातपती पूर्णाहुतिर्वा कर्तव्या। इति चातुर्मास्यानि समाप्तानि।

।। इति हिरण्यकेशिसूत्रानुसारितमहादेवसोमयाजिविरचितः
चातुर्मास्यप्रयोगः समाप्तिमगमत् ।।

INDEX

The Index contains the important terms standing for the names of sacrifices, deities, oblations, utensils, priests, authorities, etc. The terms are listed in the order of the Roman Alphabets. Numbers refer to the pages.

SELECT BIBLIOGRAPHY

ALTEKAR, A. S. *The Position of Woman in Hindu Civilization*, Banaras, 1956.

AMALNERKAR, T. R. *A Note on the yajñopavīta*, Lucknow, 1910.

AYACIT, R. R. *Caraṇavyūhabhāṣya*, ed. with Marathi translation, Umbarkhed, 1954.

AYACIT, S. M. " Mahādeva Dikshit Somayājin and Hiraṇyakeśi-Śākhā, " *Vidarbha Saṁśodhana Maṇḍala, Vārṣika*, Nagpur, 1965, pp. 116–137.

BHARUCHA, S. D. "The names of the six Gāhambārs or season festivals," *Sir J. J Madressa Jubilee Volume*, Bombay, 1914, pp. 199–203.

BHATTACHARYA, S. *A Bondo Dictionary*, Deccan College, Poona, 1968.

BLEECK, A. H. *Avestā : the religious books of the Parsees*, Vol. III, Hertford, 1864.

BRADKE, P. V. " über das Mānava Gṛhya Sūtra," *ZDMG*, Vol. XXXVI, pp. 417–477.

BÜHLER, G. *Sacred laws of the Aryans*, SBE, Vols. II and XIV, Oxford, 1882; *The laws of Manu*, SBE, Vol. XXV, Delhi, 1964.

CALAND, W. *The Baudhāyana Sūtra*, Bibliotheca Indica, Calcutta, 1903–13; *Das Śrautasūtra des Āpastamba*, Vol. II, Amsterdam, 1928; *Vaikhānasa-Śrautasutram*, Calcutta, 1941; *Vaikhānasa-Smārtasūtram*, Vol. I and II, Calcutta, 1929; *Pitṛmedhasūtrāṇi*, Leipzig, 1896; *Der Ārṣeyakalpa des Sāmaveda*, Leipzig, 1908; *Pañcaviṁśa Brāhmaṇa* (tr), Calcutta, 1931; " Zur exegese und kritik der rituellen Sūtras," *ZDMG*, Vol. II, pp. 425–435; " Über das Vādhūla Śrautasūtra " *Acta Orientalia*, Vol. I pp. 3–11; Vol. II, pp. 142–167; Vol. IV pp. 1–41, 161–213; Vol. VI pp. 97–241; " Das sonderbare Absolutive samplomnāya " *Acta Orientalia*, Vol. I, p. 318.

CHOPRA, R. N. *Glossary of Indian Medicinal Plants*, New Delhi, 1956.

DANDEKAR, R. N. " Rudra in the Veda ", Journal of the University of Poona, Humanities Section No. 1, Poona, 1953.

DEVASTHALI, G. V. *Religion and Mythology of the Brāhmaṇas*, University of Poona, Poona, 1965.

DIXIT, S. B. *Bhāratīya Jyotiṣaśāstrācā Itihāsa*, (Marathi) Poona, 1931.

EGGELING, J. *The Śatapatha-Brāhmaṇa* (tr), SBE, Vol. XII, Oxford, 1882, XLIv, Oxford, 1900.

GAAŚTRA, D. *Das Gopatha Brāhmaṇa*, Leiden, 1919.

GARBE, R. *The Śrautasūtra of Āpastamba*, Vol. III, Calcutta, 1902.

GELDER, J. M. *Mānava Śrautasūtra*, Leiden, 1921; *Mānava Śrautasūtra*, Śata Piṭaka Series, Vol. 27, New Delhi, 1961; *Mānava Śrautasūtra* (tr), Śata Piṭaka series, New Delhi, 1963.

HAUG, M. *Essays on the sacred language, writings and religion of the Parsis*, London, 1878.

HEESTERMAN, J. C. *The Ancient Indian Royal Consecration*, Netherlands, 1957.

HILLERBRANDT, A. *Śāṅkhāyana Śrauta Sūtra*, Bibliotheca Indica, Calcutta, 1888; *Rituallitteratur*, Leipzig, 1913.

KANE, P. V. *History of Dharmashāstra*, Vol. II, IV, Bhandarkar Oriental Research Institute, Poona, 1941.

KANGA, K. E. *A Dictionary of Avestā*, Bombay 1900.

KASHIKAR, C. G. *Sūtras of Bharadvāja*, Part I and II, Vaidika Saṁśodhana Maṇḍala, Poona, 1964; *Śrautakośa*, Vol. 1, Sanskrit Section, Vol. 1, English section, Parts 1 and 2 (incolaboration), Vaidika Saṁśodhana Maṇḍala,Poona, 1958, 1962.

KEITH, A. B. *The Veda of the Black Yajus School entitled Taittirīya Saṁhitā* (tr), Cambridge, 1914; *Ṛgveda Brāhmaṇas*, Cambridge, 1920; *The Religion and Philosophy of the Veda and Upaniṣad*, London, 1924.

KNAUER, F. *Mānava Śrauta Sūtra*, St. Petersbourg, 1900–03.

MACDONELL, A. A. *Vedic Mythology*, Strassburg, 1887.

MACDONELL and KEITH *Vedic Index*, London, 1958.

MASANI, P. S. " The Rationale of Zoroastrial Rituals," *Sir J. J. Madressa Jubilee Volume*, Bombay, 1914, pp. 58–67.

MAX MÜLLER *A History of Ancient Sanskrit Literature*, Leipzig, 1860.

MODI, J. Y. *Religious system of the Paris*, Bombay, 1893.

OLDENBERG, H. *Die Religion des Veda*, Stuttgart und Berlin, 1917.

RAM GOPAL *India of Vedic Kalpasūtras*, Delhi 1959.

SHENDE, N. J. *The Religion and Philosophy of the Atharvaveda*, Poona, 1952.

TARAPOREWALA, I. J. S. *Selections from Avesta and old Persian*, Calcutta, 1922.

TSUJI, N. " Notes on the Rājasūya-section of the Mānava Śuartasūtra, " *Memoirs of the Research Department of the Toyo Bunko*, Tokyo, 1964, pp. 1–34.

VAIDYA, C. V. *A History of Sanskrit literature*, Poona, 1930.

VISHVABANDHU *Vaidikapadānukramakośa*.

WEBER, A. *Indische Studien*, Vol. I, Berlin, 1950.

WHITNEY, W. D. *Atharvaveda Saṁihitā* (tr), Cambridge, 1905.

ERRATA

Page	*Line*	*For*	*Read*
36	10	इत्यतावान्	इत्येतावान्
83	20	n	in
95	6	Prajājas	Prayājas
95	10	sacrifice	sacrificer
95	29	ditction	direction
103	41	*kṣiqreṣu*	*kṣipreṣu*
105	15	mos	most
108	20	Tryambake	Tryambaka
115	4	secrificial	sacrificial
121	24	*Tatraiṣotyantapradesaḥ*	*Tatraiṣotyantapradeśaḥ*
125	6	*yāthā*	*yathā*
125	23	*Alakaraṇakṁāle*	*Alaṅkaraṇakāle*
138	24	*āmikiṣā*	*āmikṣā*
149	21	*drabha*	*darbha*
150	9	*vyākhyūtaḥ*	*vyākhyātaḥ*
167	39	uktha	ukthya
173	4	Pitṛyanjña	Pitṛyajña
186	42	*Āś* 0·7	*AśvŚS* 2·20·7
187	28	ritural	ritual
188	1	utumn	autumn
198	35	mas	must
200	14	injuctions	injunctions
204	42	1894	1864
208	43	*Bond*	*Bondo*
219	25	मुत्युम्	मृत्युम्
221	15	र्बहिराहर	र्बहिराहरति
221	20	भा ये	भागत्रये
223	5	पर्णान्विन्वोप्य	पर्णान्यिन्वोप्य
249	12	अग्निर्हव्यव्याडिह	अग्निर्हव्यवाडिह

Publications of the Centre of Advanced Study in Sanskrit University of Poona

Class A No.	TITLE	AUTHOR	Price Rs.
1.	*Vedic Religion and Mythology*	R. N. Dandekar	3–00
2.	*Post-Vedic Literature*	R. N. Dandekar	2–00
3.	*Śleṣa as a Means of Economy in the Bhāradvāja Maṇḍala*	G. V. Devasthali	1–00
4.	*The Puruṣa-sūkta (ṚV 10·90) in the Vedic Literature*	N. J. Shende	1–00
5.	*Two Methods of Interpreting Pāṇini*	S. D. Joshi	1–00
6.	*The three Pāṇinian Suffixes NaC, in UN, and Ktri*	M. D. Bala-subrahmanyam	1–50
7.	*Mathematical Representation of some Pāṇinian Sūtras*	M. D. Pandit	1–50
8.	*Hinduism and Modern Culture*	R. N. Dandekar	1–50
9.	*Adjectives and Substantives as a Single Class in the " Parts of Speech "*	S. D. Joshi	1–50
10.	*Saṁjñāyām in Pāṇini*	G. B. Palsule	3–00
11.	*Patañjali on the Pre-Pāṇinian Anubandhas Ṅ and C*	M. D. Bala-subrahmanyam	1–00
12.	*Gṛtsamada and Kūrma Gārtsamada—A Statistical Study*	M. D. Pandit	2–00
13.	*Amāvasyā : An Accentual Study*	M. D. Bala-subrahmanyam	1–50
14.	*On the Ṛgvedic denominative adhvarīyá-*	K. P. Jog	1–00
15.	*Some primary and secondary suffixes known to Yāska*	Saroja Bhate	1–50
16.	*A note on the Sandhi ācāryovāca in Gopatha Brāhmaṇa (1·1·31)*	H. C. Patyal	1–00
17.	*The Ritual Teachers cited in the Āśvalāyana Śrauta-Sūtra*	P. D. Navathe	1–00
18.	*Some Primary Nominal Formations missing in Pāṇini*	G. B. Palsule	1–00
19.	*The Avestan Pāθmainyotəma*	M. D. Pandit	1–00
20.	*Word-Integrity and Syntactic Analysis*	S. D. Joshi	1–00
21.	*God in Hindu Thought*	R. N. Dandekar	2–00
22.	*Pāṇini and Ṛgvedic Exegesis*	G. V. Devasthali	1–00

	TITLE	AUTHOR	
46.	*Viśvāmitra in the Brāhmaṇa Texts*	U. C. Sharma	1–00
47.	*Animalism in Ancient India*	G. U. Thite	1–00
48.	*Antipathy to the Rājasūya : Why ?*	G. U. Thite	1–00
49.	*Dvisvabhāva (Double-natured) Music*	G. U. Thite	1–00
50.	*Arising out of Śākalya's use of Íti after rodasī in the Padapāṭha of Ṛgveda* 1.167.4 *and* 10.92.11	K. P. Jog	1–00

Class B
No.

1.	*Kavi and Kāvya in the Atharvaveda*	N. J. Shende	20–00
2.	*Anubandhas of Pāṇini*	G. V. Devasthali	20–00
3.	*Some Aspects of the History of Hinduism*	R. N. Dandekar	15–00
4.	*The Verbal Forms in the Ṛgveda (Maṇḍala VI)*	G. B. Palsule	
5.	*The Cāturmāsya Sacrifices*	V. V. Bhide	

Class C
No.

1.	*The Phiṭsūtras of Śāntanava*	G. V. Devasthali	15–00
2.	*The Sphoṭanirṇaya of Kauṇḍa Bhaṭṭa*	S. D. Joshi	25–00
3.	*Patañjali's Vyākaraṇa-Mahābhāṣya : Samarthāhnika* (*P.* 2.1.1)	S. D. Joshi	25–00
4.	*Sārasiddhāntakaumudī of Varadarāja Bhaṭṭa*	G. V. Devasthali	40–00
5.	*Patañjali's Vyākaraṇa-Mahābhāṣya : Avyayībhāvatatpuruṣāhnika* (*P.* 2.1.2–2.1.49)	S. D. Joshi in collaboration with J. A. F. Roodbergen	40–00
6.	*Patañjali's Vyākaraṇa-Mahābhāṣya : Karmadhārayāhnika* (*P.* 2.1.51–2.1.72)	S. D. Joshi and J. A. F. Roodbergen	30–00
7.	*Patañjali's Vyākaraṇa-Mahābhāṣya : Tatpuruṣāhnika* (*P.* 2.2.2–2.2.23)	S. D. Joshi and J. A. F. Roodbergen	35–00
8.	*Vimalodayamālā of Jayantasvāmin*	K. P. Jog	19–00
9.	*Patañjali's Vyākaraṇa-Mahābhāṣya : Bahuvrīhidvandvāhnika* (*P.* 2.2.23–2.2.38)	J. A. F. Roodbergen. Edited by S. D. Joshi	45–00

	TITLE	AUTHOR	
10.	*Patañjali's Vyākaraṇa-Mahābhāṣya : Kārakāhnika* (*P.* 1.4.23–1.4.55)	S. D. Joshi and J. A. F. Roodbergen	70–00
11.	*Patañjali's Vyākaraṇa-Mahābhāṣya : Anabhihitāhnika* (*P.* 2.3.1–2.3.7)	S. D. Joshi and J. A. F. Roodbergen	60–00

Class E

No.			
1.	*Sanskrit and Maharashtra : A Symposium*	R. N. Dandtkar (Editor)	10–00
2.	*CASS Studies, Number* 1	R. N. Dandekar (Editor)	7–00
3.	*CASS Studies, Number* 2	R. N. Dandekar (Editor)	33–00
4.	*CASS Studies, Number* 3	S. D. Joshi (Editor)	35–00
5.	*CASS Studies, Number* 4	S. D. Joshi (Editor)	18–00

N. B. : **Prices of these publications are subject to revision. These Publications can be had from the Superintendent, Publications Section, University of Poona, Poona–411 007.**